पत्र	पंक्ती	अशुद्धं	शुद्धं
२१	६	खृष्ठ	खृष्ट
—	७	चिक्रमवत्तरं	विक्रमवत्तरं
—	९	आलयं तव	आलयस्तव
२२	१	पश्यत	पश्यतं
२३	५	तच्छुत्वा	तच्छ्रुत्वा
२४	४	पुर्व्वं	पूर्व्वं
२८	६	श्रीयेषूरूवाच	श्रीयेषूरुवाच
—	८	३	१३
३१	५	ऽद्धुत	ऽद्भुत
३२	—	शक्नुयात्	शक्नुयात्

श्रीखृष्टसंगीता

सत्पालकचरित्रपर्व

CHRISTA-SANGÍTÁ,

OR THE

SACRED HISTORY

OF

OUR LORD JESUS CHRIST,

IN SANSCRIT VERSE.

BOOK III.

THE LATER MINISTRY.

CALCUTTA:

BISHOP'S COLLEGE PRESS.

1838.

अशुद्धपत्रं

पत्रे	पंक्तौ	अशुद्धं	शुद्धं
२	४	नैञ्छुद्यो	नैच्छुद्यो
७०	७	यृष्मान	युष्मान्
९३	७	हैरद्यो	हैरोद्यो
१३६	७	येषूरमूत्	येषूरभूत्
१३६	९	प्राग्दृषि	प्राग्दृष्टि

श्रीपित्रे पुत्रायच सदात्मनेच नमः ॥ गुरुरुवाच ॥ ईशैकपुत्रं नरमुक्तये यं सद्राजवंशोद्भव मात्मभूमौ । पिता वयःस्थं परमार्थशक्त्या सदात्मना चाभिषिषेच नित्यः ॥१॥ विश्वोप कृत्यै निजदेशसर्वपुरीपरिव्राजकमाद्रशीलं । दुःखापहारं ददृशुर्नरा यमीशात्मतेजःकरुणा निधानं ॥२॥ भूता अपि व्याकुलतां गता यं वहिर्द्रवन्तो नरदेहवासात् । सर्वोपसर्गान्त कमेकमुग्रं सूनुं महेशस्य समूचुरुच्चैः ॥३॥ तमोविमग्ना अघकारिणो यं गुरुं प्रकाशात्मक मेव मर्त्याः । सुकर्म्मकर्त्तारमपीह दृष्ट्वावमेनिरे हङ्कृतिलोभशत्रुं ॥४॥ ईशात्मकं यं सर लास्तु नम्रमपीह संदृश्य मुदानुजग्मुः । वाक्यानि कामादितमोहराणि निशामयन्तः सततं सुयत्नात् ॥५॥ तमेव सत्पालकमन्धनेत्रं मूकोक्तिरूपं वधिरश्रुतिं च । सुतृप्तये धर्म्मबु भुक्षितानां स्वर्गावतीर्णान्नमनन्तरूपं ॥६॥ अशेषरोगप्रतिकारिणं वै पापौघभारार्त्तविराम

योनिं । अधीनवातोदकमार्य्ययेषूख्रष्टं प्रभुं भूरि नमस्करोमि ॥७॥ तदुत्पन्न्यभिषेको ते पूर्वं शिष्योदितौ मया । अथावशिष्टवाक्यानां किं प्रवाच्यं नु सांप्रतं ॥८॥ शिष्य उवाच ॥ क्यूहान्नदानतः पश्चाद्यद्भून्मरणावधि । सत्पालकचरित्रं मे गुरो तत् कृपया वद ॥९॥ अभिषिक्तो महेशेन नृकार्य्यं त्वभिषेचनं । नैञ्ह्यो दाविदुत्पन्नो राजेत्युक्तो यहूदिनां ॥१०॥ यो गलीलाधिपादेवं दिधीर्षुर्व्यूहतोऽपि च । अन्तर्धाय ततोऽकामः प्रार्थनार्थं वनं गतः ॥ २
११॥ स कथं प्रभुराचार्य्य तत्परे शान्तमानसः । जीवनान्नप्रदानस्याव्यक्तवाचमपूरयत् ॥१२॥ गुरुरुवाच ॥ शेष एव चरित्रस्य ज्ञेयं तद्वाक्यपूरणं । मध्ये यत्त्वभवच्छिष्याधुना वक्ष्यामि विस्तरात् ॥१३॥ आश्चर्य्यकर्म्मणस्तस्मात्परे गालील्यनीवृति । हेरोद्येऽपि स्थिते तत्र बभ्रामैव महाप्रभुः ॥१४॥ नहि तत्काल ऐच्छत्स देशे यातुं यहूदिनां । यतो

चेतञ्जिघांसुत्वं मन्दिरे प्राङ् निदर्शितं ॥१५॥ तत्रैष्यंस्तु प्रभुः पश्चात् कथयिष्ये यथाचिरात् ।
मृतिप्रस्तुतये तत्र प्राग्दूतान्नोतुमैहत ॥१६॥ यथा पूर्वं च गालील्यपुरग्रामेषु भूरिषु ।
श्रेष्ठा द्वादशसंख्यास्ते शिष्यास्तस्याज्ञयाव्रजन् ॥१७॥ तथेदानीं यहूदीयपूर्ग्रामेष्वीरिता नृणां।
सप्ततिर्यत्र यत्रैव स गामी दक्षिणे पथि ॥१८॥ तान् स्वशिष्यगणाद्वृत्वा सर्वान्तर्वित्
प्रभुस्तदा । द्वौ द्वौ कृत्वा च गतये वाक्यमेतदुपादिशत् ॥१९॥ श्रीयेषूरुवाच ॥ बहुलं पक्व ३
शस्यं वै किंत्वल्पे छेदकाः स्थिताः । अतोऽन्यांश्छेदकान्नेतुं शस्याध्यक्षं नु याचत ॥२०॥
यात यूयं मया नुन्ना वृकमध्य इवावयः । रूप्याधारैश्च कोषैश्च विहीना अनुपानहः ॥२१॥
नमस्कुरुत मा कंचित् पदव्यां किंतु यद्गृहं । विशेतादौ तदा ब्रूतास्मिन् गृहे सन्धिरस्त्वि
ति ॥२२॥ सन्धिपुत्रस्तु चेत्तस्मिंस्तिष्ठेदाशीस्तदैव वः । वसेत्तत्र न तु स्याच्चेत् पुनर्वः प्रति

सैष्यति ॥२३॥ तिष्ठतास्मिन् गृहे यच्च दत्तं तत्पिबताश्न च । वेतनार्हो हि भृत्यो ऽस्ति मा यातानेकसद्मसु ॥२४॥ यत्पुरे त्वनुगृह्णीध्वमार्त्तांस्तत्स्थांश्चिकित्सत । दत्तं चाश्नाथ तान्ब्रूत राज्यमीशस्य वो ऽन्तिके ॥२५॥ पुरे यस्मिन्प्रविष्टास्तु नानुगृह्णीध्वमन्तरे । तस्य रथ्यास्वभिद्रुत्य तत्रैवोच्चरत स्फुटं ॥२६॥ अहो नः पत्सु यल्लग्नं नगरोत्थं रजो ऽपि वः । तन्मथ्नीमः किंतु वित्त राज्यमीशस्य सन्निधौ ॥२७॥ विचारार्हे पुरस्तस्या दण्डाल्लघुतरो भवेत् । दुष्टाया अपि सूदूम्या दण्ड इत्येव वच्मि वः ॥२८॥ युष्माकं यः शृणोत्युक्तिं स तथैव शृणोति मे । यो वो ऽवमन्यते चापि स मामेवावमन्यते ॥२९॥ किंतु यो यो जगत्यस्मिन्नवमन्येत मां नरः । मम प्रेरयितारं खल्ववमन्यत एव सः ॥३०॥ गुरुरुवाच ॥ इम लब्धोपदेशं ते नराः सप्ततिसंख्यकाः । दिश्यवाच्यां द्विशो भूत्वा खृष्टाज्ञापूर्त्तये ययुः ॥३१॥ स तु

संस्थो गलीलायां प्रभुर्द्वादशभिः सह । प्रस्तराद्यैस्ततो गन्तुमुदीच्यां समकल्पयत् ॥३२॥

इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (लूकस्य दशमसर्गाद्योहन्नेः सप्तमसर्गाच्चोद्धृतः) परिचारकगणनिर्याणं नाम प्रथमोऽध्यायः ॥

गुरुरुवाच॥ तत्कालेऽध्यापकाः केचित् फरिष्याश्चापि पण्डिताः। यिरूशलेमान्नगराद्गलीलायां समागताः ॥१॥ पारम्पर्य्योपदेशज्ञाः प्रत्नतन्त्रावलम्बिनः । अक्षालितकरैरन्नं न भुञ्जानाः कदाचन ॥२॥ हट्टागतिकृतस्नानाः पित्राद्युक्त्यनुसारतः । पानभोजनपैत्तल्यपात्रपर्य्यङ्कमार्जिनः ॥३॥ इत्यादिधर्म्मिणस्ते वै भुञ्जानान्कांश्चन प्रभोः । शिष्यानालोच्य गच्छन्तो येषु प्रत्यब्रुवन्निदं ॥४॥ फरीष्या ऊचुः ॥ तव शिष्याः किमर्थेऽत्र पूर्व्वेषां निर्म्मलात्मनां । उपदेशं विमन्यन्तेऽदन्तोऽक्षालितपाणयः ॥५॥ गुरुरुवाच॥ इति पृष्टः प्रभुर्विज्ञस्तैः स्व

धर्म्मसमादरैः । फरीष्याध्यापकैरेतद्वचस्तान्प्रत्यवोचत ॥६॥ श्रीयेषूरुवाच ॥ किमर्थं मपि यूयं वै शास्त्रमीशस्य निर्म्मलं । पारम्पर्य्योपदेशैः स्वैर्निराकुरुथ दुर्धियः ॥७॥ आद्रियस्व हि सर्व्वत्र त्वं मातापितराविति । उवाचेशसमादिष्टो मोसिः सीनायपर्व्वते ॥८॥ तथा यः पितरं मर्त्यो मातरं वावमन्यते । म्रियतां स इति प्रोच ईशशास्त्रप्रवाच्यसौ ॥९॥ यूयं त्वध्यापकाः ख्याता एतत्सद्वाक्यलङ्घनं । नवकल्पितधर्म्मेण स्वेन कारयथ ध्रुवं ॥ ६
१०॥ यद्यपि स्याद्धि मे द्रव्यं पितस्त्वदुपकारकं । तथापीशबलिर्भूतं तद्ग्राह्यमत स्त्वया ॥११॥ इति ब्रूयात्कुपुत्रश्चेत् तदा यूयमदोषिणं । पितृपालनधर्म्माच्च किमुक्तं ब्रूथ तं किल ॥१२॥ रे यूयं निजविध्यर्थावमतेशाज्ञकास्तथा । धर्म्मलिङ्गिन उद्दिष्टमिषायोक्त्या विवर्णिताः ॥१३॥ स्वजिह्वाभिरेते ऽत्र मामाश्रयन्ते हृदेषां तु मत्तो ऽतिदूरे ऽपि संस्थं । मृषा

त्वर्न्नयन्तीशशास्त्रस्थले हि नरैः कल्पितांस्ते विधीन् शिक्षयन्ति ॥१४॥ गुरुरुवाच ॥ इति
प्रत्नगिरा येषूरीशाविष्टप्रवाचिनः । वर्णयित्वा मृषाधर्म्ममीषां पात्रमार्जिनां ॥१५॥ तत्स
मीपस्थितान् व्यूहान् समाहूय ततः स्फुटं । एततानब्रवीद्वाक्यं सत्यधर्म्मप्रकाशकं ॥१६॥
श्रीयेषूरुवाच ॥ सुश्रूयतां वै परिबुध्यतां च यद्यत्प्रविष्टं वदने नरो नो । तेनापवित्रीक्रियते
वरंतु तेनैव यद्यद्वदनादपैति ॥१७॥ गुरुरुवाच ॥ इत्युक्तवन्तमभ्यूचुः शिष्यास्तं किं त्वया ७
गुरो । न ज्ञाता रुट् फरीष्याणां त्वद्वाक्यश्रवणादिति ॥१८॥ श्रीयेषूरुवाच ॥ यस्य शाकस्य
नोवाप वीजं स्वःस्थः पिता मम । कोऽप्यन्यस्तु तदेवान्तेऽवश्यमुन्मूलितं भवेत् ॥१९॥ अलं
तैरन्धपान्थानामन्धैरप्यध्वदर्शकैः। अन्धस्त्वन्धाध्वदर्शी स्यादुभौ गर्त्ते पतिष्यतः ॥२०॥ गुरुरु
वाच ॥ इत्युक्त्वा व्यूहसाक्षात्स सशिष्यः प्राविशद्गृहं । ततो द्वादशशिष्याणां पृच्छत्सीमोन एव तं

॥२१॥ प्रस्तर उवाच ॥ सुश्रोतव्यमदो वाक्यं बोधनीयं च यत्नतः । अव्यक्तमपि बोधायास्माकं
व्याख्याहि हे प्रभो ॥२२॥ श्रीयेषूरुवाच ॥ तथा किमधुनाप्यज्ञा यूयं यद्धि मुखोदरे । वाह्या
द्विष्टा नतो गर्भे प्रयाति नतु चेतसि ॥२३॥ तत्कथं मलिनीकुर्य्यान्नरं गर्भोऽखिलानि हि । पुना
त्यन्नानि गर्त्ते तु वहिःक्षिपति तन्मलं ॥२४॥ अपैति वदनाद्यत्तु हृदयोत्थितमेव तत् । तेना
पूतीकृतो मर्त्य इदं यूयं न वित्थ किं ॥२५॥ हृदयोत्थाः कुचिन्ता हि व्यभिचारादिका ८
वधाः । चौर्य्याण्यधिकलोभाश्च शाठ्यानि छलनान्यपि ॥२६॥ कामुकत्वानि हिंसाश्च मिथ्या
साक्ष्याणि चैव हि । परमेशापवादाश्च प्रमादा अप्यहङ्क्रियाः ॥२७॥ सर्वा अभ्यन्तरादेता
निःसृता कच्चरं नरं । कुर्व्वन्ति नत्वधौताभ्यां पाणिभ्यामेव भोजनं ॥२८॥ गुरुरुवाच ॥
इत्येतत्समुपादिश्य प्रभुर्द्वादशभिः सह । सीमोनाद्यैर्गलीलाया उत्तरामचलद्दिशं ॥२९॥ इति

श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मोशिपंचशास्त्राद् इषायभव्यवाक्यानामूनत्रिंशसर्गान्मत्थायस्य पंचदशसर्गान्मार्कस्य सप्तमसर्गाच्चोद्धृतो) वाह्यधर्म्मनिरसनं नाम द्वितीयोऽध्यायः॥

शिष्य उवाच ॥ तस्यां नूत्नसृतौ याते सत्यधर्म्मोपदेष्टरि । के देशा जातयः का वा सत्प्रकाशाश्रिता गुरो ॥१॥ गुरूरुवाच ॥ पुण्यभूमेर्यहूद्यानामुदीच्यां सीम्नि संस्थितः ॥ तूरशीदोनयोर्देशः पुरा प्रख्यातयोः पुरोः ॥२॥ तस्मिन्निवसतां नृणां बहुदेवार्च्चिनां तदा । ९
अन्तिके समुपस्थाय स्वादृश्यत्वचिकीर्षया ॥३॥ कस्मिंश्चित्प्राविशद्गेहे किंतु मोक्तेति कीर्त्तितः । गोपनेच्छुरपि स्थातुं नाशक्नोत्सर्व्वतो रहः ॥४॥ फैणीक्यान्वयजा स्त्री हि सूरराष्ट्रनिवासिनी । काप्यपूतेन भूतेन यस्या बाला प्रधर्षिता ॥५॥ सा प्रभोः कीर्त्तिमाकर्ण्य गालील्येभ्यः सुविस्तृतां । गृहं प्राप्यैतदुच्चैस्तं वचोऽवादीद्बहिःस्थिता ॥६॥ विदेशिन्युवाच ॥

करुणां कुरु दीनायै मह्यं हे दाविदुद्भव । प्रभो मद्दुहिता यस्माद्दुष्टभूतातिपीडिता ॥७॥
गुरुरुवाच ॥ इत्युक्तो मुहुरप्यार्य्यो घोषन्तीं दुहितुः कृते । दीनां प्रतिवचः किंचिन्नाब्रवी
द्देव तां प्रभुः ॥८॥ आश्चर्य्यमपि मौनं तद्दयालोरपि मोचिनः । ज्ञात्वा शिष्या उपेत्यैतद
ब्रुवन्नतिविस्मिताः ॥९॥ श्रीयेषूशिष्या उचुः । कृपयास्यै वरं दत्त्वापैतुमाज्ञापय प्रभो । यतः
सा चलतोऽप्यस्मान् घोषन्त्यन्वेति सर्व्वथा ॥१०॥ गुरुरुवाच ॥ इति शिष्योदितेऽतोऽपि न किं
चित्स्त्रीममूं प्रति । ब्रुवन् येषूरिमान्वाक्यमेतत्प्रत्यब्रवीत्तदा ॥११॥ श्रीयेषूरुवाच ॥ इस्र
येलोद्भवानेवावीन् भ्रान्तान्मतु कांश्चन । अन्यजानहमीशेन पातुं संप्रेरितोऽधुना ॥१२॥
गुरुरुवाच ॥ एतद्वाचा निरुद्धास्ते न किमप्यूचिरेऽधिकं । प्राप्तवन्तः पुरा ह्याज्ञां तादृशीं
नुदतः प्रभोः ॥१३॥ नत्वसौ स्त्री निरुद्धातः प्रभुपादानता तदा । उवाचोच्चैः पुनर्मह्यं करुणा

माय्यं कुर्विति ॥१४॥ ततः स प्रणतां नारीं कन्यार्थे दुःखविप्लुतां । चिरमौनं विहायान्ते रूक्ष
मेतद्वचो ऽब्रवीत् ॥१५॥ श्रीयेषूरुवाच ॥ आदौ तृप्यन्तु भक्ष्येण शिशवो ऽन्नं हि यत्किल । बालेभ्यः
प्रस्तुतं तद्वै न श्वभ्यो दातुमर्हति ॥१६॥ गुरुरुवाच॥ इदं निष्ठुरमाकर्ण्य सा निजप्रार्थनां प्रति ।
प्रभूक्तं न ततो ऽप्याशां परित्यज्याब्रवीत्पुनः ॥१७॥ विदेशिन्युवाच ॥ सत्यमेतत्प्रभो किंतु
स्वामिना यन्निरस्यते । शिशुभुक्तावशिष्टं तत्कुक्कुरा अपि भुञ्जते ॥१८॥ गुरुरुवाच ॥ इत्थं ॥
श्रद्धायुतं तस्या नम्रत्वमनुभूय सः । तदा निर्दयसादृश्यं संविहायाब्रवीन्मुदा ॥१९॥
श्रीयेषूरुवाच ॥ महांस्ते नारि विश्वास एतद्वाक्यप्रबोधितः । कुशलं याहि यद्वच्च त्वदभीष्टं
तथास्तु ते ॥२०॥ गुरुरुवाच ॥ इदमुक्तं वरं श्रुत्वा सश्रद्धासौ विदेशिनी । गृहे दुहितरं
प्राप सुस्थां भूतविवर्जितां ॥२१॥ शिष्य उवाच ॥ अमुष्याः परदेशिन्याः सत्तमं किल विद्यते ।

श्रद्धाविनययोरेव फलप्राप्तिनिदर्शनं ॥२२॥ मनसा तु ममाप्यतेऽवुध्यतेऽन्यद्भुतं गुरो। दया
लोः सर्वथा येभ्यो निर्दयाकारकोत्तरं ॥२३॥ यो ऽन्यवंशभुवेऽपि प्राग्गुल्माधिपतये वरं।
ददौ समार्य्यजेभ्यश्चामृतमप्युपदेशनं ॥२४॥ यस्यैवोत्पत्तिसमये नत्यर्थं दूरदेशतः। कुन्दु
रादिप्रदातारो ज्योतिर्ज्ञा ईशचोदिताः ॥२५॥ यं तदा प्रजगौ वृद्ध ऐस्त्रयेल्योऽपि मन्दिरे।
अन्यलोकतमोनुत्त्यै दीपमीशार्पितं भुवि ॥२६॥ स कथं वक्त्यहं नुन्नः स्वजनानेव रक्षितुं। १२
ऐस्त्रयेल्या हि शिशवः सर्वेऽन्ये कुक्कुरा इति ॥२७॥ गुरुरुवाच ॥ यो भवेद्दीप आसन्ने
ऽखिलभूमिनिवासिनां। उज्ज्वलिष्यन्निति ज्ञातं सिम्योनेन तथा बुधैः ॥२८॥ तस्य स्वजन
मात्रेषु भूतं पूर्वावभासनं। न तु सर्वत्र हे शिष्य मा त्वां विस्मापयत्विदं ॥२९॥ नह्येतत्काल
आयातं भिन्नदिग्वैरनाशिनः। प्रभुयज्ञात् समुत्थेयं तेनोक्तं पूर्णभासनं ॥३०॥ समभ्येति

तु कालोऽसावित्युवाच समार्य्यकां । तद्भिन्नवंशभेदान्तकरो भावी महागुरुः ॥३१॥ यद्गूदि
मध्यतस्त्वेति मुक्तिरित्यब्रवीत्स तां । ततस्तेष्वेव स भ्रान्तावीनन्वेष्यद्भुवि स्थितः ॥३२॥
द्वादशापि वराः शिष्या ये तन्माहात्म्यपूरणं । सर्व्वदिक्षु परे नोद्याः प्रवक्तुं विश्वमुक्तये ॥
३३॥ तान्स पूर्व्वं क्वचिन्मार्गे न्यषेधीदन्यगोत्रिणां । यातुं तथा समार्य्याणां मोसिशास्त्रभृता
मपि ॥३४॥ गुल्मेशोऽपि च रोम्योऽसौ यद्गूदिहितमानसः । तञ्ज्येष्ठान्प्रैरयद्येषूं प्रति स्ववर 13
लब्धये ॥३५॥ शिष्य उवाच ॥ स्मराम्येतद्गुरो किंतु तच्चेत्स्यात् किंकृते प्रभुः । तदान्योर्व्व्य
न्तरेऽगच्छत् स्वगुप्तोच्छुरमित्रवत् ॥३६॥ गुरुरुवाच ॥ नाशक्नोत्स रहःस्थातुं तथावेदपि
सर्व्ववित् । एकां विश्वासिनीं भव्यां फलप्राप्तीमतोऽपि च ॥३७॥ ततो ह्यखिलमोक्ता सो
न्याचिनां नीवृति स्थितः । कनानानामपि भ्रष्टक्रियादुर्यशसां पुरा ॥३८॥ यत्पितृन्दक्षि

णाद्देशादीशाज्ञातोऽब्रहोद्भवाः । येष्वा नूनभुवा नीता वहिश्चक्रुः समन्ततः ॥३९॥ तन्म
ध्येऽपिं वरो येषूर्दुष्टहृच्छुद्धिकारिणः । दिग्गेतुः स्वप्रसादस्यार्हं दृष्टान्तमदित्सत ॥४०॥
अद्वितीयं त्विमं कृत्वाविरतप्रार्थनोत्थितं । भूमिमन्यार्च्चिनां त्यक्त्वा दक्षिणस्यामगात्पुनः ॥
४१॥ गालील्यस्य हृदस्यैव पूर्वदिग्योधसि प्रभुः । दशपुर्य्याख्यदेशस्य सीमानं समुपस्थितः॥
४२॥ तदा तद्वासिजनता मोचकाग्रे समानयत् । स्वभावकाद्दं कंचित्तच्चिकित्सार्थिनो १४
भृशं ॥४३॥ पृथक्तमपनीयाथ सोऽङ्गुलींस्तच्छ्रवोऽन्तरे । निदधेऽथास्पृशत्तस्य जिह्वां स्वमुख
विन्दुना ॥४४॥ तदोर्द्ध्वमवलोक्यैव निःश्वासैश्चेश्वरं प्रति । निर्घोषं प्रार्थ्य जिह्वा ते मुच्य
तामित्युदैरयत् ॥४५॥ तत्क्षणेऽपि श्रुतिस्तस्यास्फुरन्मुक्तं तथैव च । जिह्वाया बन्धनं
सम्यग्वक्तुं चारभत स्फुटं ॥४६॥ तत्काद्दसमानेतॄन्निषिषेध प्रभुस्तदा । इमां ज्ञापयितुं

सम्यक्क्रियां कंचिदपि ध्रुवं ॥४७॥ किंतु यावन्न्यषेधीत्स तांस्तावदधिकं किल । ते तच्चित्र
क्रियावार्तां स्वस्यां यस्तारयन्भुवि ॥४८॥ ततः सन्मोकुरासन्ने गिरिसंस्थस्य दुर्बलान् । अन्या
नपि बहून्यत्नादानयन् भूमिवासिनः ॥४९॥ तान्सर्वांश्चापि खञ्जान्धमूकयङ्गादिकानिह ।
एकैकं स्वपदानीतान्सम्यक् सुस्थीचकार सः ॥५०॥ ततो भूवासिनां व्यूहा यङ्गानालोक्य सु
स्थितान् । पश्यतोऽन्धांस्तथा खञ्जांश्चरतो वदतो जडान् ॥५१॥ अत्यन्तं विस्मयं गत्वा १५
सत्प्रशंसाभिरीश्वरं । इस्रयेलमहानाथं समादद्रिर उच्चकैः ॥५२॥ दशपुरीवासिन ऊचुः ॥
साधु सर्वं चकारेहास्माकं मोक्ता महानयं । श्रुतिवाग्गतिदृष्ट्यादींस्तज्ञेनेष्वादधौ ध्रुवं ॥
५३॥ गुरुरुवाच ॥ इति व्यूहैः स्तुतो येषूर्बहुलैर्दिवसत्रयं । तत्कालान्ते सति स्वीयान् शिष्या
नभ्यब्रवीदिदं ॥५४॥ श्रीयेषूरुवाच ॥ त्रिदिनान्यप्यमी सर्वे मत्समीप इह स्थिताः । न

किंचिद्भुक्तवन्तोऽपि तस्मात्तेषामहं दये ॥५५॥ यदि प्रस्थापयेयं तानभुक्तान्स्वगृहं प्रति ।
क्लमिष्यन्ति सृतौ दूराद्यनेकेऽत्र समागताः ॥५६॥ श्रीयेषूशिष्या ऊचुः ॥ कुतोऽस्माभिरियद्व्यूह
भोजनाय किल प्रभो । प्राप्स्यन्ते पिष्टकादीनि प्रान्तरे संस्थितैरपि ॥५७॥ गुरुरुवाच ॥
इत्युक्तो विस्मरद्भिस्तैः प्राग्व्यूहाद्भुतभोजनं । तानपृच्छत्कियद्भक्ष्यं विद्यते युष्मदन्तिके ॥५८॥
इति पृष्टास्ततः शिष्याः पिष्टकान्यत्र सप्त नः । वर्त्तन्ते क्षुद्रमीनाश्चाप्यल्पा इत्युत्तरं ददुः ॥५९॥ १६
ततः सर्वं प्रभुर्व्यूहं भूमौ स्वाग्रे समासयत् । अमून्पूपांश्च मीनांश्च कोषादानाययत्तदा ॥
६०॥ स्तुतिवाचा निवेद्यैतदीश्वराय विभज्य च । शिष्येभ्योऽदादिमे चापि व्यूहेभ्यः प्रददु
स्तथा ॥६१॥ सर्वे चादन्नतो व्यूहाः सुतृप्ताश्चाभवन्खलु । तैश्चावशिष्टखण्डेभ्यः पूर्णाः सप्तैव
डल्लकाः ॥६२॥ पोषितास्तु नरा ये वै बभूवुः स्त्रीशिशून् विना । चतुःसहस्रसंख्यास्ते येष्वा

प्रस्थापितास्तदा ॥६३॥ यूहं प्रस्थाप्य नावं स आरोहच्छिष्यसंवृतः । दाल्मनूथामगच्छच्च
कूलस्थां मग्दलान्तिके ॥६४॥ शिष्य उवाच ॥ कृते प्राग्वत्पुनर्वीरमङ्गुते भोज्यवर्द्धने । अ
धिकां किं ततः श्रद्धां चक्रुस्तत्तीरवासिनः ॥६५॥ गुरुरुवाच ॥ मग्दलस्था बुधाः केचिद्यद्वयांसः
फरीष्यकाः । कतिचिन्नृपि शादूक्याः परकालविरोधिनः ॥६६॥ ते यशः सर्व्वतः श्रुत्वा
प्रभोराश्चर्य्यकारिणः । तमभ्येत्य परीक्षार्थं वच एतत्समब्रुवन् ॥६७॥ फरीष्यादय ऊचुः ॥ १७
यथा मोसिः पितृभ्यो नस्तथास्मभ्यं महागुरो । त्वं निजैश्वर्य्यसिद्ध्यर्थं स्वर्गाद्दर्शय लक्षणं ॥
६८॥ गुरुरुवाच ॥ इत्येषां वचनं श्रुत्वा दर्शितात्यन्तलक्षणः । सर्व्वमानसविज्ञस्तान्प्रत्यवादी
दिदं वचः ॥६९॥ श्रीयेषूरुवाच ॥ सन्ध्यायां रक्तमाकाशं दृष्ट्वा श्वो भविता शुभं । इति
यूयं ध्रुवं ब्रूथानुमिताकाशलक्षणाः ॥७०॥ प्रातराकाशमारक्तं मेघाच्छन्नं च वीक्ष्य तु ।

अद्यावश्यं भवेद्वात्या चण्डेति ब्रूथ सर्व्वदा ॥७१॥ रे लिङ्गिनो वियद्रीतिं विज्ञातुं किल
शक्नुथ । किंतु चिह्नानि कालानां विबोद्धुं न क्षमाः कथं ॥७२॥ लोकोऽतिदुष्टो व्यभिचारक
श्च चिह्नं समन्विच्छति नूनमेषः । योनस्य चिह्नान्विह भव्यवक्तुर्विना न किंचित्खलु देयम
स्मै ॥७३॥ गुरूरुवाच ॥ इति प्रोच्य सनिःश्वासं तदश्रद्धातिदुःखितः । तान्विहाय पुन
र्नावमारुरोह प्रभुस्तदा ॥७४॥ समारुह्य च तच्छिष्यास्त्वरयान्नं विसस्मरुः । आनेतु १८
मत एवैकमासीत्तन्नावि पिष्टकं ॥७५॥ तर्त्तुकामस्तटं हित्वा ह्रदमध्यस्थितः प्रभुः । शिष्यान्
सहस्थितान्नावि वाक्यमेतदवोचत ॥७६॥ श्रीयेषूरुवाच ॥ सशादूक्यफरीष्याणां रसात्
स्फोतिकरात्खलु । हेरोद्यानां रसाच्चापि सावधानाः स्त यत्नतः ॥७७॥ गुरूरुवाच ॥ इत्य
युक्तं वचः शिष्या बुध्यमाना न किंचन । सुविचार्य्य तदर्थं वै वाक्यमूचुः परस्परं ॥७८॥

श्रीयेषूशिष्या ऊचुः ॥ अवश्यं नो रसस्फीतपिष्टकानामभावतः । तदुक्तं प्रभुणास्माकं
विस्मृतिं परिनिन्दता ॥७९॥ गुरुरुवाच ॥ सुविदंस्तु प्रभुर्विज्ञस्तेषां चेतांस्यबोधिनां ।
संवादांश्चाथ तानेतद्वचनं समभाषत ॥८०॥ श्रीयेषूरुवाच ॥ अल्पश्रद्धाः किमर्थं रे विचार
यथ दुर्विदः । भाषमाणास्तथान्योन्यं पिष्टकाभावदुःखिताः ॥८१॥ किं नेदानीमपि ज्ञानं
न वा सद्बुद्धिरस्ति वः । सनेत्रा अपि नेक्षध्वे न वा शृणुथ कर्णिनः ॥८२॥ दृढं स्तब्धहृदो यूयं वि १९
द्यध्वे मद्धिताः कथं । यद्भूतं चापि वः साक्षात् तन्न स्मरथ किंकृते ॥८३॥ यदापुष्यं नृणां पंच
सहस्रं पंचपिष्टकैः । अपूरयत तच्छेषखण्डैः कत्येव उल्लकान् ॥८४॥ गुरुरुवाच ॥ इति पृष्टाः
सलज्जास्ते उल्लकान् द्वादशेति वै । प्रत्यूचुरथ तान्प्रश्नं प्रभुः पुनरवोचत ॥८५॥ श्रीयेषू
रुवाच ॥ सप्तपूपैर्यदापुष्यं नृसहस्रचतुष्टयं । तदापि शेषखण्डैर्वः पूरिताः कति उल्लकाः ॥

८६॥ गुरुरुवाच ॥ एतन्नूत्नक्रियास्मृत्याब्रुवन्सप्रेति सर्वशः । अथ स्ववचनं तेभ्यः पूरयामास सद्गुरुः ॥८७॥ शीयेषूरुवाच ॥ अथ कस्मान्न बुध्यध्वे यदाहं स्फायकाद्रसात् । सशाद्क्वफरीष्याणां सावधानत्वमादिशं ॥८८॥ तन्मे वाक्यं कथं ज्ञातं युष्माभिः पूपगोचरं । यद्भावे यदभावेऽपि पोषितुं शक्नुयां नरान् ॥८९॥ गुरुरुवाच ॥ इत्यार्य्यगुरुणोक्तं ते शिष्याः संश्रुत्य भर्त्सनं । स्वयमेव ततोऽहार्थं तत्प्रोक्तवचसोऽविदन् ॥९०॥ नह्यैहिकरसात्कस्मात् फरीष्याद्यनुसारिणां । वरं तदुपदेशात्सोऽबोधयत्सावधानतां ॥९१॥ एवमादिश्यमानास्ते नावि स्वगुरुणा सह । परे ह्रदतटं प्राप्ता बेथशैद उपस्थिताः ॥९२॥ तद्ग्रामवासिनः कंचिदन्धं येष्वग्र आनयन् । एनमार्य्य चिकित्सायै स्पृश त्वमिति वादिनः ॥९३॥ गृहीत्वा तस्य पाणिं स ग्रामान्नीत्वा वहिश्च तं । अस्पृशत्तत्र तन्नेत्रे उभे स्वमुखविन्दुभिः ॥९४॥

ततः किमधुना दृष्टं त्वयेत्यन्धमपृच्छत । प्रत्यूचेऽसौ तु चलतो नरान् पश्यामि वृक्षवत् ॥
१५॥ इत्युक्तः स कराभ्यां तच्चक्षुषी पुनरस्पृशत् । दृष्टिदाता परे चासौ स्फुटं सर्व्वान् समै
क्षत ॥१६॥ अथोवाच प्रभुर्गेहेऽधुना गच्छाप्तलोचनः । न तु ग्रामे न वा कांश्चित्तद् ब्रूहि
ग्रामवासिनः ॥१७॥ एवं नृणां महामोक्ता स्वसृतौ कीर्त्यनिच्छुकः । शक्तिप्रसादचिह्नानि
सर्व्वत्र निदधौ भुवि ॥१८॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मत्थायस्य पंचदश २१
षोडशसर्गाभ्यां मार्कस्य सप्तमाष्टमसर्गाभ्यां चोद्धृतः) भक्ष्यावशेषो नाम तृतीयोऽध्यायः ॥

गुरुरुवाच ॥ ततस्त्यक्त्वा पुनर्देशं गालील्यं शिष्यसंवृतः । उपतस्थौ महामोक्ता पानिया
स्यपुरान्तिके ॥१॥ फिलिप्पो राज्यतुर्य्यांशे स्वीये यं संस्थितं नृपः । हेरोदितनयश्चक्रे
केशरीयाभिधानकं ॥२॥ तस्य क्षेत्रे चलन्शिष्यान्स्वीयान्पप्रच्छ वर्त्मनि । मह्यं मानुषपुत्राय

कोऽहमित्युच्यते नरैः ॥३॥ इति पृष्टास्ततः शिष्याः श्रुतवन्तो हि सर्वतः । तत्परिभ्रमणे दीर्घे
नृणां वाचोऽब्रुवंस्तथा ॥४॥ श्रीयेषूशिष्या ऊचुः ॥ योहनिः स्नापकः प्रेत्य पुनःसंपन्नजीवनः ।
त्वमसीति प्रभो कैश्चिदुच्यते भूमिवासिभिः ॥५॥ अलीयस्तु त्वमित्यन्यैर्यिरिमीयस्तु कोऽ
पि वा । प्रत्न ईशप्रवक्तान्यः पुनर्जीवन्नितीतरैः ॥६॥ गुरुरुवाच ॥ इति श्रुत्वा नृणां नाना
वचस्तत्प्राग्विदन्नपि । प्रभुर्विज्ञः परीक्षायै तानपृच्छदिदं पुनः ॥७॥ श्रीयेषूरुवाच ॥ मयि २२
नानानरोक्त्या वः साक्षादित्थमुदीरिते । कोऽहमस्मीति युष्माभिर्मच्छिष्या ध्रुवमुच्यते ॥८॥
गुरुरुवाच ॥ इत्युक्ते नरपुत्रेण तान् वरान् द्वादश प्रति । स्वशिष्यानेक एवैतत्सीमोनः प्रत्यु
वाच तं ॥९॥ सीमोन उवाच ॥ ख्रीष्टनामाभिषिक्तो वै प्रादुर्भूतो महीतले । नित्यजीवन
रूपस्य विश्वेशस्य त्वमात्मजः ॥१०॥ गुरुरुवाच ॥ इदं संश्रुत्य तस्यैव स्थिरविश्वासबोधकं ।

वाक्यं प्रभुरथैतत्तं महद्भयवचोऽब्रवीत् ॥११॥ श्रीयेषूरुवाच ॥ सीमोन योनस्य सुत त्वमेव
धन्यो यतः प्रत्ययवाचमेनां । नाबोधयत्त्वां पलरक्तदेही स्वर्गस्थितस्त्वेव पिता मदीयः ॥
१२॥ त्वं प्रस्तरोऽसीति त एव भाषेऽस्मिन् प्रस्तरे चाप्युरुमण्डलीं स्वां । संस्थापयिष्यामि
दृढामुताहं पातालकद्वारबलैरजेयां ॥१३॥ त्वय्येवाहं निधास्यामि सीमोन प्रस्तराभिध । स्व
र्गीयस्यापि राज्यस्य बन्धमुक्त्यर्थकुञ्चिकाः ॥१४॥ यद्यद्बध्नासि भूमौ च तद्बन्ध्यं स्वर्गमण्डले । २३
यन्मुञ्चसि तथा भूमौ मोक्तव्यं स्वर्ग एव तत् ॥१५॥ गुरुरुवाच ॥ इदमुक्त्वा वृहद्वाक्यं स्वशिष्या
न्निखिलान्प्रभुः । निषिषेध स्वखृष्टत्वं तदा ज्ञापयितुं भुवि ॥१६॥ एतस्मिंश्चापि काले तान्
स्वरहस्यैकवेदिनः । स्वतेजःसंवृतेर्हेतुं वक्तुमारभत स्फुटं ॥१७॥ श्रीयेषूरुवाच ॥ मया यिरू
षलेमं वै गन्तव्यं नरसूनुना । प्राप्तव्यश्चावमानोऽपि तत्र ज्येष्ठादिवर्गतः ॥१८॥ नृपुत्रः स

हि सभ्येभ्यः श्रेष्ठयज्वभ्य एव च । अध्यापकगणाच्चापि नानादुःखं सहिष्यते ॥१९॥
परामर्शेन तेषां स मृत्युं चापि गमिष्यति । मृत्युतस्तु तृतीयेऽह्नि पुनरुत्थास्यति ध्रुवं ॥२०॥
गुरुरुवाच ॥ इति भव्यवचः श्रुत्वा प्रतिरुन्धन्नुवाच तं । प्रस्तरो भद्रमेव स्यात्तव नेत्थं भवे
द्विपत् ॥२१॥ इमं तु प्रतिरोधं स्वशिष्यस्याकर्ण्य मोचकः । अप्रसन्न इदं वाक्यं परा
वृत्तोऽभ्युवाच तं ॥२२॥ श्रीयेषूरुवाच ॥ अभिशापिस्वरूप त्वमपेहि मम संमुखात् । पातकारि २४
मतं ते हि नेशोत्थं नरजं तु तत् ॥२३॥ गुरुरुवाच ॥ इत्युक्त्वा सकलान्शिष्यान् स्वीयान्सव्यूह
कानपि । स्वसमीपे समाहूय वच एतत्ततोऽब्रवीत् ॥२४॥ श्रीयेषूरुवाच ॥ यो योऽनुगन्तु
मिच्छेन्मां स स्वेच्छामपवर्जतु । उत्तोल्यात्मनि शूलं च तथा मां सोऽनुगच्छतु ॥२५॥ यो यः
स्वजीवं परिरक्षितुं हि काङ्क्षेत स स्याद्धतजीव एव । जीवं निरस्येत्तु मदर्थमेवं यो मद्

चोऽर्थं च पुनः स आप्ता ॥२६॥ नरोऽर्जयेच्चेज्जगदप्यशेषं ततः स्वजीवापचयं तु कुर्य्यात् ।
कोऽतोऽस्ति लाभोऽस्य तथा कमर्घं स्वजीवलाभाय नरः प्रदद्यात् ॥२७॥ मदर्थं मद्वचोऽर्थं वा
यो ह्यस्मिन्व्यभिचारिणां । पापिनां चापि संघाते लज्जां गच्छेत्ततः खलु ॥२८॥ तन्नरार्थं
नृपुत्रोऽपि पितृतेजःसमावृतः । पुण्यदूतान्वितश्चापि भवेद्वै लज्जितस्तथा ॥२९॥ स हि
स्वपितुरैश्वर्य्यैः स्वर्ग्यदूतैर्निजैः सह । आगमिष्यति सर्व्वेभ्यः फलं दातुं यथाक्रियं ॥३०॥ २५
केऽप्यत्रस्था नृपुत्रं स्वैशराज्ये यावदागतं । नेक्षेरन्मृत्युदुःखं नास्वदेरन्निति वच्म्यृतं ॥
३१॥ गुरुरुवाच ॥ तथा स स्वपितुः शक्त्या खृष्ट इत्येव संमतः । निजमाहात्म्यविषये
व्यक्तास्तान् प्रावदद्गिरः ॥३२॥ शिष्य उवाच ॥ गुरो तत्सम्यगव्यक्तं सीमोनादिभ्य ईरि
तं । संयुतं दुःखराज्याभ्यां भविष्यद्वचनं प्रभोः ॥३३॥ प्रस्तरेण तु राजत्ववक्ता दुःखा

सहिष्णुना । अपि शेषैश्च शिष्यैस्तद्वाक्यं कथमबुध्यत ॥३४॥ गुरुरुवाच ॥ असौ जीवनि रासो वै शूलोत्तोलनमेव च । दुःखशङ्कान्वितं तेषां विस्मयं हृत्स्वकारयत् ॥३५॥ तत्त्रयाणां तु सान्त्वाय प्रतीत्यै चाद्भुतं प्रभुः । स्वैश्वर्य्यं दर्शयामास शृणु तच्छिष्य सांप्रतं ॥३६॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मत्थायस्य षोडशसर्गान्मार्कस्याष्टमनवमसर्गाभ्यां लूकस्य नवमसर्गाच्चोद्धृतः) खृष्टमण्डलीनिर्म्माणप्रस्तरो नाम चतुर्थोऽध्यायः ॥ २६

गुरुरुवाच ॥ एतेभ्योऽव्यक्तवाक्येभ्यः प्रभूक्तेभ्यः परे यदा । अभवन्परिपूर्णानि शिष्य षड्वासराणि वै ॥१॥ तदा प्रस्तरयोहन्नियाकोबैः स समन्वितः । नव शेषानधस्त्यक्त्वा रुरोहोन्नतपर्व्वतं ॥२॥ तस्मिंस्ताबोरनाम्न्यद्रौ निर्जने सोऽर्थनाकृते । स्थितस्तत्संमुखे ऽकस्माद्विकृताकारकोऽभवत् ॥३॥ तद्वस्त्राणां हि सर्व्वोर्व्वीरजकासाध्यशुक्लता । उज्ज्वलन्ती

हिमानीव बभावास्यं च सूर्य्यवत् ॥४॥ तेन तेजोवृतेनैव वदन्तौ सह मानुषौ । बभतुर्दीप्ति
संपन्नौ मोस्यलीयौ त्वमू किल ॥५॥ यिरूषलेमे ह्यचिराय भाविनी ख्रृष्टस्य या निःसृतिरेव
भूमितः । अतीव तत्तद्विषये महागुरू सहोचतुर्वै गुरुणा महीयसा ॥६॥ तच्चित्रसंवाद
इहानुपस्थिते ऽतिक्लान्तमेवाद्र्यधिरोहणश्रमात् । सुषुप्सुता प्रस्तरमाप तत्र वै तथा सहस्थौ
ज़िबिदीयजावपि ॥७॥ परे तु ते जागरितास्त्रयः सकृत्तेजोवृतं संददृशुर्महाप्रभुं । सह २७
स्थितं चाब्रहवंशशास्त्रदं तथैव तच्छास्त्रपुनर्विधायकं ॥८॥ तद्दीप्तरूपेक्षणतस्त्वतीव ते विमो
हिता विस्मयभीतिहर्षणैः । ततः प्रयान्ताविव तौ महागुरू दृष्ट्वाब्रवीत्प्रस्तर उन्मदः प्रभुं ॥
९॥ हे नाथ नो ऽस्मिन् स्थितिरुत्तमा गिरावतो ऽत्र दूष्यत्रयमेव शोभनं । त्वदर्थमेकं किल मोसये
ऽपिचालीयाय चान्ये परिनिर्म्मिमामहै ॥१०॥ इतीरिते तेन निजोक्त्यबोधिना क्षणे ऽपि

तस्मिन् रुचिमान्महाघनः । आच्छादयंस्तान्परितोऽखिलानथो तन्मध्यतो वाण्युदयन्त्यनु
श्रुता ॥११॥ श्रीपरमेश्वर उवाच ॥ अवभासत एष यो नरः स ममास्त्यात्मज एव सुप्रियः ।
परितुष्टहृदस्म्यनेन वै वचनान्यस्य नरा निशाम्यत ॥१२॥ गुरुरुवाच ॥ इमां तु वाणीं
श्रुतवन्नरत्रयं प्रगाढभीत्या निपपात दण्डवत् । तांस्तु स्पृशन् भूशयिनान् प्रभुस्तदाब्रवीदहो
जागृत मा बिभीत च ॥१३॥ इति श्रुत्वोत्थिताः शिष्याः पर्यैक्षन्त क्षणे तदा । प्रस्तराद्याः २९
प्रभुं त्वेकमपश्यंस्तौ गुरू विना ॥१४॥ सोऽन्तर्हितश्चिरेष्टां यः शिखरे वीक्ष्य नीवृतं । ईश
दूतान्तिके मोऽस्निर्नरादृष्टः पुरामृत ॥१५॥ स तथान्तर्हितोऽलीयः स्थापयित्वा पुनर्हि यः।
ईशार्चां स्वर्गमारोहत्सख्युः साक्षाज्ज्वलद्रथे ॥१६॥ महद्धामपि ताभ्यां तु महीयान्पुरतः
स्थितः । निजशिष्यत्रयं ख्रिष्टः पूर्ववत्सानुतोऽनयत् ॥१७॥ सीमोनादींश्च तावोराद्रितोऽवतर

नस्तदा । विस्मित्यानुक्तवचसः प्रभुरेतद्वचोऽब्रवीत् ॥१८॥ श्रीयेषूरुवाच ॥ यावन्न नर
पुत्रः स्यादुत्थितो मृतभावतः । युष्माभिरिह यद्दृष्टं तन्मा वदत कंचन ॥१९॥ गुरुरुवाच ॥
इत्यादिष्टास्त्रयः श्रेष्ठाः शिष्याणां न किमप्यतः । प्रभुमाहात्म्यपर्य्यन्तं तद्दृष्टिविषयेऽब्रुवन् ॥२०॥
तदर्थाज्ञास्तु तेऽन्योन्यं तन्मृत्यूत्थानमस्ति किं । इति यत्नाद्विचार्य्याथ संपप्रच्छुरिदं प्रभुं ॥
२१॥ प्रस्तरादय ऊचुः ॥ अलीयः ख्रृष्टसाम्राज्यात्पूर्व्वागामी महागुरुः । इति विज्ञैः कथं प्रोक्तं २९
सच्छास्त्राध्यापकैः प्रभो ॥२२॥ गुरुरुवाच ॥ इति पृष्टस्त्रिभिः शिष्यैः पुत्रः स परमात्मनः ।
ख्रृष्ट इत्येव तैर्ज्ञातो वचः प्रत्यब्रवीदिदं ॥२३॥ श्रीयेषूरुवाच ॥ सत्यमेतदलीयो हि यथोक्तं
भव्यवाचिना । सर्व्वप्रस्तुतये पूर्व्वमागामी किल शोधकः ॥२४॥ किंतु तत्प्रस्तुतेनापि किं न
मानुषसूनुना । नानादुःखमवज्ञा च प्राप्येति लिखितं पुरा ॥२५॥ अलीयस्त्वाजगामात्रेति

सत्यं वो ब्रवीम्यहं । तस्मिंश्चक्रुर्यथेष्टं च तज्ज्ञानपरिवर्ज्जिताः ॥२६॥ यत्तु ते ऽचरे चक्रुः
पुण्यग्रन्थानुसारतः । कुमतास्तत्करिष्यन्ति नरसूनौ तथैव च ॥२७॥ गुरूरुवाच ॥ इति
प्रतिवचः प्राप्य शिष्या बुबुधिरे त्रयः । इङ्गितं प्रभुवाक्येन योहन्निं जकरीयजं ॥२८॥
अलीयात्मोपपन्नो हि यः पूर्व्वमपि जन्मनः । इत्युक्तो मन्दिरस्थाय पित्र ईशचरेण वै ॥
२९॥ पुनःसंजीवन इव शक्त्यालीयस्य स क्षितौ । गतवानीशपुत्राग्रे प्रत्यावर्त्तयितुं न ३०
रान् ॥३०॥ मलाकीयस्य सद्वाक्यं पूरयामास सर्व्वशः । स्नापकः स नवो ऽलीयो बहुहृच्छुद्धि
कारकः ॥३१॥ इति श्रीख्रिष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मत्थायस्य सप्तदशसर्गान्मार्क
लूकयोः प्रथमनवमसर्गाभ्यां सीमोनप्रस्तरलिखितद्वितीयसाधारणलिपेः प्रथमसर्गाच्चोद्धृतः) पुत्रै
श्वर्य्याविभासनं नाम पंचमो ऽध्यायः ॥

गुरुरुवाच ॥ एवं शिष्यैस्त्रिभिः सार्द्धं संभाष्य प्रभुरध्वनि । प्रत्यगान्नव तच्छेषान् स्वत्य
क्तान्प्राग्दिनेऽध्वधः ॥१॥ स्थितांस्तु परितस्तेषां बहुलान्स समैक्षत । जनानध्यापकांश्चापि
वितण्डां कुर्वतो भृशं ॥२॥ सर्वव्यूहस्तु तं दृष्ट्वा समागच्छन्तमन्तिके । विस्मयादप्यभिद्रुत्य
नमश्चक्रे महागुरुं ॥३॥ अथोवाच स यूयं किं विवदध्वे परस्परं । इत्युक्ते व्यूहमध्यस्थ
एक उच्चैर्जगाद तं ॥४॥ नर उवाच ॥ एकपुत्रोऽहमाचार्य्य त्वत्समीपे निजात्मजं । आ ३१
नयं मूककृद्भूतयस्तं व्याकुलमानसः ॥५॥ बहुधा स बलाद्भूमौ तत्प्रक्षेपाहताङ्गकः । तत्र नि
ष्पीड्यते तेन मुखनिःसृतफेणकः ॥६॥ विरुत्य रदनैश्चापि घोषन्नुच्चैश्च पीडनात् । श्रमक्षीण
स्ततः कष्टाद्दुष्टभूतेन वर्ज्यते ॥७॥ त्वय्यसन्निहिते बालं तं सुस्थीकर्त्तुमार्थयं । त्वच्छिष्यान्
किंत्वमी हन्त प्रतीकारासमर्थकाः ॥८॥ गुरुरुवाच ॥ इत्युक्तो रोगिणः पित्रा बालस्याकुल

चेतसा । प्रणतेन दयालुः स प्रभुरेतद्वचोऽब्रवीत् ॥९॥ श्रीयेषूरुवाच ॥ रे विरुद्धहृदोऽश्रद्धाः
कियत्कालं हि वोऽन्तिके । तिष्ठन् युष्मान्सहिष्येऽहं बालस्त्वानीयतामिह ॥१०॥ गुरुरुवाच ॥
नीयमानस्तु बालस्तत्क्षणे भूतप्रपीडितः । भूमौ पपात तत्रापि लुलोठास्योत्थफेणकः ॥
११॥ प्रभुस्तं पीडितं दृष्ट्वापृच्छत्तत्पितरं तदा । कति वर्षाणि बालोऽयमियत्क्लेशान्वितो
ऽभवत् ॥१२॥ इति पृष्टः पिता दीनः प्रत्युवाच प्रभुं तदा । आशिशुत्वादपि ग्रस्तोऽनेन ३२
भूतेन मत्सुतः ॥१३॥ तेनाकृष्टोऽप्ययं बालो मुहुर्वैश्वानरोदरे । मुहुश्च सलिलेष्वेवापस्मारो
पतति ध्रुवं ॥१४॥ अतोऽस्मात्सांप्रतं भूताज्जिघांसोर्मामकं किल । संरक्ष तनयं त्वं चेत्कर्त्तुं
किमपि शक्नुयाः ॥१५॥ इत्यभ्युक्तोऽब्रवीन्मोक्ता प्रत्येतुं शक्नुया यदि । सकलान्यपि शक्यानि
विद्धि प्रत्ययता दृढं ॥१६॥ इत्याज्ञाप्तो नरोऽवादीत्क्रन्दनास्रुयुतं वचः । प्रत्येमि त्वं तु नाथ

स्याः सहायो मे प्रतीतये ॥१७॥ इति श्रुत्वा प्रभुर्व्यूहं द्रवन्तमभितस्तदा । समीक्ष्यापूत
भूताय गर्हकं प्रावदद्वचः ॥१८॥ श्रीयेषूरुवाच ॥ अरे मूकत्वकृद्भूत ममाज्ञां त्वं निशा
मय । अस्माद्वालाद्वहिर्याहि पुनरेनं च मा विश ॥१९॥ गुरुरुवाच ॥ इदमाकर्ण्य
भूतः स भूतनाथस्य भर्त्सनं । रुत्वा निष्पीड्य बालं च तत्क्षणेऽस्माद्विनिर्गतः ॥२०॥ भूतहीनः
स आदौ तु मृत इत्येव भूरिभिः । अभाष्यताथ हस्ते तं धृत्वोदस्थापयत्प्रभुः ॥२१॥ गता ३३
पस्मारमपि तं सम्यक् सुस्थं च मोचकः । तत्पितर्य्याप्तकामेऽत्र व्यूहसाक्षात्समार्पयत् ॥२२॥
सर्व्वे चापि तदाश्चर्य्यक्रियाद्रष्टार ईश्वरं । तुष्टुवुर्व्यक्तमाहात्म्यं महाविस्मयसंयुताः ॥२३॥
ततः शिष्यान्विते येष्वि निर्जनालयमाश्रिते । तेन ये नवसंख्या ह्यस्ताबोरारोहिणोज्झिताः ॥
२४॥ ते तदाधिगता यत्नाद्व्यूहहीनं महागुरुं । स्वशङ्कापहरायैतत्पप्रच्छुः सर्व्ववेदिनं ॥

२५॥ अन्द्रियादय ऊचुः ॥ बालं त्वद्वाक्यमात्रेण प्रभो ऽमुं सुचिकित्सितं । प्रतिकर्तुं कुतः
पूर्वं वयं खल्वसमर्थकाः ॥२६॥ गुरूरुवाच ॥ इति पृष्टः प्रभुः स्वीयशिष्येष्वर्पितवान्
पुरा । भूतनिःक्षेपिकां शक्तिं तदा प्रत्यब्रवीदिदं ॥२७॥ श्रीयेषूरुवाच ॥ युष्माकं प्रत्यया
भावादेवासीनदशक्तता । अणुसर्षपतुल्यो हि विश्वासो यदि वो भवेत् ॥२८॥ तदा युष्मा
सु निःशङ्कं ब्रुवत्स्वचलमप्यमुं । इतो विचल तत्रेति ततो ऽयं विचलिष्यति ॥२९॥ तथा वि ३४
श्वासिनां किंचिन्नासाध्यं वो ऽस्ति किंत्वयं । भूतवर्गो न निःक्षेप्यः सोपवासार्थनां विना ॥
३०॥ गुरूरुवाच ॥ इति प्रोच्यान्द्रियादीन् स शिष्यान्नव ततो गतः । पर्यभ्रमद्गलीलायां
सर्वशिष्यसमन्वितः ॥३१॥ तदा गुप्तोक्तुरपि स तत्स्थितैः कर्म्महेतुतः । विस्मितैर्दृश्य
मानो ऽथ स्वानुगानिदमब्रवीत् ॥३२॥ श्रीयेषूरुवाच ॥ युष्माभिः सुनिशम्यन्तां पुरोक्तानि

वचांसि मे । नरपुत्रो नृणां हस्ते निधेयो ह्यचिरादिति ॥३३॥ हन्तव्यश्चापि तैर्नूनं किंत्वा
प्तनिधनोऽपि सः । तृतीये दिवसे मृत्योः पुनरुत्थास्यति ध्रुवं ॥३४॥ गुरुरुवाच ॥ इत्या
कर्ण्य पुनर्वाचं शिष्या गूढार्थिकां प्रभोः । दुःखमाप्त्वापि तस्यार्थं नापृच्छन् भयहेतुतः ॥३५॥
यदा कपर्नहूमं तु प्रत्यगच्छत्स तैः सह । विवादं तेषु दृष्ट्वापि तान्किंचिन्नावदत्तदा ॥
३६॥ प्राविशत्तु यदा तत्र तदा सीमोनसन्निधौ । समेत्याभ्यब्रुवन्नेतदैत्त्रयेल्यबलि ३५
ग्रहाः ॥३७॥ बलिग्राहिण ऊचुः ॥ किं न दत्ते तवाचार्य्यो मोसिशास्त्रानुसारतः । प्रति
वर्षेऽर्द्धकर्षं स्वं मन्दिरार्थं नु रौप्यकं ॥३८॥ गुरुरुवाच ॥ इत्युक्तः प्रस्तरो वाढमित्यवादीत्
ततो गृहे । प्रविष्टं गुरुमुक्त्वा तदथाप्नोदिदमुत्तरं ॥३९॥ श्रीयेषूरुवाच ॥ त्वया सीमोन किं
ज्ञातं भूमिराजाः करं कुतः । लभन्ते स्वसुतेभ्यः किमन्यजातेभ्य एव वा ॥४०॥ गुरुरु

घाच ॥ अन्यजेभ्यः किलेमं ते लभन्ते शाश्वतं करं । इति प्रयुच्य सीमोनस्ततोऽन्यदुक्

णोऽब्रवः ॥४१॥ श्रीयेषूरुवाच ॥ अतो मुक्तकराः पुत्रा न चावश्यमयं बलिः । निजमन्दिर

रक्षार्थं देयो नित्येशसूनुना ॥४२॥ तत्राप्यतिविरोधस्य तैः सार्द्धं पातकारिणः । अभावा

याधुना गच्छ प्रस्तर ह्रदरोधसि ॥४३॥ तत्राप्सु वडिशं क्षिप्त्वा यमादौ मीनमाप्नुयाः ।

तस्य वक्त्रोदरे कर्षं रौप्यं त्वं खल्ववाप्स्यसि ॥४४॥ एनं बलिग्रहीतृभ्योऽमीभ्यः कर्षं प्रदे ३६

ह्यतः । आवयोरुपयुक्तोऽयं बलिरीशस्य शास्त्रतः ॥४५॥ गुरुरुवाच ॥ अस्मिन्कार्य्येऽहुते

पूर्णेऽब्रवीद्येषूर्गृहस्थितः । मार्गे किंविषये यूयं व्यवदध्वं परस्परं ॥४६॥ इति पृष्टास्तु

तच्छिष्या लज्जया नोचुरुत्तरं । श्रेयस्त्वविषयं भूतं स्वविवादं यतोऽस्मरन् ॥४७॥ ततस्तद्धृ

दयज्ञः स समाहूयात्मसन्निधौ । सर्व्वानेतद्वचोऽवादीच्छिष्यान् द्वादशसंख्यकान् ॥४८॥

श्रीयेषूरुवाच ॥ युष्मन्मध्ये ध्रुवं यो य आद्यो भवितुमिच्छति । सर्वेषु चरमः स स्यात्सर्वेषां
दास एव च ॥४९॥ गुरुरुवाच ॥ इदं संश्रुत्य तेऽपृच्छंस्तथा चेत्स्याद्ध्रुवं प्रभो । स्वर्ग
राज्यान्तरे को वै भविष्यति महत्तमः ॥५०॥ इति श्रुत्वा वचस्तेषां शिशुमाहूय कंचन ।
तन्मध्ये चापि संस्थाप्य प्रभुः प्रत्यब्रवीदिदं ॥५१॥ श्रीयेषूरुवाच ॥ परावृत्तहृदो यूयं नि
भाश्च शिशुभिर्यदि । न स्यात स्वर्गराज्यान्तः प्रवेष्टुं न शक्ष्यथ ॥५२॥ इत्यहं वच्मि वः ३७
सत्यमत एष शिशुर्यथा । तद्वन्नम्रो भवेद्यो यः स्वर्गे श्रेयान्स एव हि ॥५३॥ यो योऽपि
प्रतिगृह्णीयादीदृशं मत्कृते शिशुं । स मां वै प्रतिगृह्णाति यस्तु कुर्य्यादिदं नरः ॥५४॥ स
न मां केवलं किंतु गृह्णाति प्रेरकं मम । यो युष्मासु लघीयांश्च स महीयान् भविथति ॥५५॥
गुरुरुवाच ॥ एनामुदीरयत्युक्तिमीश्वरस्यात्मजे प्रभौ । जिबिदीयजयोरेतत्तदा युवतरो

ऽब्रवीत् ॥५६॥ योहन्निरुवाच ॥ त्वन्नाम्ना निःक्षिपन्भूतान् कोऽपि दृष्टः स्मृतो गुरो । स
न्निषिद्धस्ततोऽस्माभिर्यतो नास्मद्गणाश्रितः ॥५७॥ गुरुरुवाच ॥ इदं श्रुत्वा स्वशिष्याणां कुतू
हलयुतं वचः । प्रभुः सर्व्वहितोऽवादीदिदं तत्प्रतिरोधकं ॥५८॥ श्रीयेषूरुवाच ॥ मा निषे
धत यो ह्येव मन्नाम्नाद्भुतकृत्स मां । न निन्द्येत् किंतु यो न स्याद्विपक्षो नो हितोऽस्ति सः ॥५९॥
यो य एषां शिशूनां तु मयि विश्वासकारिणां । एकस्यापि हितान्मार्गात्पतनं कारयेत्खलु ॥ ३८
६०॥ सन्नरं तत्कृतेऽद्रोऽपि यदि संपेषणाश्मना । ग्रीवायां परिबद्धः स प्रक्षिप्येतार्णवेऽतले ॥
६१॥ जनपातनहेतुभ्यो विपद्धस्तमरे जगत् । सर्व्वतो ह्यनिरोध्या वै पातहेत्वागति
र्भुवि ॥६२॥ किंतु येन नरेणैव पातकारणमीदृशं । समानीयेत भूमध्ये तं धिक् स्याद्वै सम
न्ततः ॥६३॥ किंतु त्वां निजहस्तश्चेत्पादो वा हितमार्गतः । पातयेत्तमतो यत्नादुच्छिन्धि

त्वं समन्ततः ॥६४॥ हताङ्गस्य तव श्रेयान्प्रवेशो नित्यजीवने । नरके गमनात्तावद्धस्तपाद
युतस्य ते ॥६५॥ यत्र दंशककीटो हि म्रियते न कदाचन । संदहन्वीतिहोत्रश्च न संनिर्वा
त्यपि ध्रुवं ॥६६॥ तथा त्वां निजचक्षुश्चेत्कुदृष्ट्या हितमार्गतः । पातयेत्तदपि त्वं वै तदा
निःक्षिप निर्द्दयं ॥६७॥ एकाक्षस्यापि ते श्रेय ईशराज्ये प्रवेशनं । नरकान्तर्विनिक्षेपात्तवाक्षि
द्वयभाजिनः ॥६८॥ दंशको यत्र कीटो हि न कदाचिद्विनश्यति । अग्निः संदाहकश्चापि न ३९
निर्व्वाति कथंचन ॥६९॥ इन्द्रियाणामधीना हि दुर्जना नरकाग्निना । समस्ता लवणेनेव
रक्षिष्यन्तेऽक्षताः किल ॥७०॥ किंतु सर्व्वो बलिर्यद्वल्लवणेनाक्षतोऽयते । तथेशोत्सर्जनीया वै
शुद्धज्ञानेन मानुषाः ॥७१॥ शुद्धं लवणमेवास्ति किंत्वेतदपि चेत्परे । रसहीनं भवेत्केन
स्वादु कुर्य्यात तत्पुनः ॥७२॥ अत आत्मसु यूयं तल्लवणं ज्ञानरूपकं । यत्नाद्रक्षत सन्धिं

च पात सर्ब्बे परस्परं ॥७३॥ एतच्छिशुसमानां तु क्षुद्रत्वार्थेऽवहेलनात् । मयि विश्वास
कर्तृणां सावधानाः स्त यत्नतः ॥७४॥ यतस्तद्रक्षका दूताः स्वर्गलोके निरन्तरं । मत्पितुः स्वः
स्थितस्यास्यमीक्षन्त इति वच्मि वः ॥७५॥ यत्क्षुद्रं ह्यबलं चैवापचितिं गच्छदेव च । तदु
द्धर्त्तुं किल स्वर्गादवतीर्णो नरात्मजः ॥७६॥ युष्माभिरनुभूतं किं शतं मेषा नरस्य चेत् ।
वर्त्तेरन् किंतु तन्मध्य एक एव ततो भ्रमेत् ॥७७॥ तदैकोनशतं शेषान्विहायाद्रावसंशयं ।
किं नैकं भ्रान्तमेषं सोऽन्वेष्टुं गच्छति यत्नतः ॥७८॥ दैवात्तु प्राप्नुयाच्चेतं भूयान् हर्षो भवे
त्तदा । एकोनशतमेषाणामभ्रान्तत्वोत्थहर्षणात् ॥७९॥ युष्माभिरिच्छा तु ततोऽनुभया स्वर्ग
स्थितस्यापि पितुर्व एवं । क्षुद्रेष्विहैतेषु न कोऽपि नूनं भ्रान्तोऽपि जीवापचयं प्रकुर्य्यात् ॥
८०॥ यदि त्वद्विषये भ्रातापराध्येत्किमपि स्वयं । तं तदा प्रथमं गत्वा दोषं ज्ञापय नि

ज्ञीने ॥८१॥ ततश्चेत्तव वाक्यं स स्वीकुर्य्याद्दोषलज्जितः । तदा भ्रातरमात्मीयं त्वं पुनः
प्रापिथ ध्रुवं ॥८२॥ नतु चेद्वै तदान्येनान्याभ्यां वा सह तं प्रति । गच्छ कर्म्मदृढीकृत्यै द्वित्र
साक्षिमुखोक्तिभिः ॥८३॥ तदापि यदि दोषं स नाङ्गीकुर्य्यादथ क्रियां । सर्व्वां ज्ञापय विस्ता
रान्मण्डलीं विभुसेविनां ॥८४॥ किंतु सन्मण्डलीवाक्यं न स्वीकुर्य्यात्स चेत्तदा । अन्यार्च्चीव
त्वदये वै करग्राहीव चास्तु सः ॥८५॥ यद्यद्बध्नीथ भूमौ हि तद्बन्ध्यं स्वर्गमण्डले । यन्मुञ्चथ ४१
तथा भूमौ मोक्तव्यं स्वर्ग एव तत् ॥८६॥ इति वो वच्म्यहं सत्यं पुनश्चैतद्ब्रवीम्यपि । द्वावप्येक
मतौ स्यातां युष्मासु प्रार्थने यदि ॥८७॥ तदेच्छत उभौ यद्यत्संस्थितौ भूमिमण्डले । पूरयिष्य
ति तत्ताभ्यां स्वर्गवासी पिता मम ॥८८॥ यत्र यत्र हि मे नाम्ना स्युर्द्वित्रा अपि मानुषाः ।
संगृहीताः स्वयं तत्र तन्मध्येऽहमपि स्थितः ॥८९॥ गुरुरुवाच ॥ इदं प्रोक्तवति श्रेष्ठमीश्व

रैकसुते वचः । तमभ्येत्याथ सीमोनः प्रस्तराख्योऽब्रवीदिदं ॥९०॥ प्रस्तर उवाच ॥
अपराध्यति मह्यं तु कतिधा भ्रातरि प्रभो । अपराधं क्षमिष्येऽहं किं योग्यं सप्तधापि तत् ॥
९१॥ श्रीयेषूरुवाच ॥ सप्तधामात्रपर्य्यन्तं योग्यं तन्न ब्रवीमि ते । सप्ततिघ्नांस्तु सप्तापि
वारान् कर्त्तव्यमेव तत् ॥९२॥ अत एव निभं स्वर्ग्यराज्यं भूपस्य कर्म्मणा । कुर्व्वतो भृत्यवर्गा
यथ्ययसंख्याविवेचनं ॥९३॥ तदन्वेषण आरब्धे भृत्य आनायि तं प्रति । सार्द्धां शोधयि ४२
तुं रौप्यकर्षकोटिं नियोजितः ॥९४॥ इयदर्पयितुं कोषे त्वशक्तं तं समादिशत् । राजा
सस्त्रीसुतद्रव्यं विक्रेतुमृणशुद्धये ॥९५॥ तदासौ प्रणतो भृत्योऽब्रवीद्व्याकुलमानसः । त्वं सह
स्वाधुना स्वामिन् मया शोध्यं च तेऽखिलं ॥९६॥ अतः सर्व्वमृणं तस्य मोचयित्वा दयान्वितः ।
तद्दोषं विस्मरन् राजा तुष्टं प्रास्थापयत् स्वयं ॥९७॥ ततः प्रस्थाय सोऽपश्यत्सहभृत्यं पथि

स्थितं । पुरा यस्मिन्न्यधाद्रौप्यं शतमाषचतुष्टयं ॥९८॥ तमभ्येत्य गृहीत्वा च गले लोभी
स यत्नतः । अब्रवीत्त्वमृणं मेऽद्य यथार्हं परिशोधय ॥९९॥ ततस्तत्पादपतितः सहभृत्यो
ऽब्रवीदिदं । अधुना नु सहस्व त्वं मया शोध्यं च तेऽखिलं ॥१००॥ इदं न स्वीचकारासौ
किंतु यावन्न सर्व्वशः । परिशोध्यमृणं कारागारे तं समबन्धयत् ॥१०१॥ ततस्तत्सहभृत्यानां
वर्गो दृष्ट्वातिदुःखितः । गत्वा तत्सकलं कर्म्म ज्ञापयामास भूमिपं ॥१०२॥ अथ सोऽमुं ४३
समाहूयावदद्रे भृत्य दुष्टहृत् । अहं ते प्रार्थनाहेतोरमुञ्चं वृहदप्यृणं ॥१०३॥ अतस्त्वमि
यतीं मत्तो दयां संप्राप्तवान् यथा । तथैव सहभृत्यं स्वं दयितुं किं स्म नार्हसि ॥१०४॥
इत्युक्त्वा प्राक्तनं यावन्न शोध्यं सर्व्वमप्यृणं । रुषितस्तं नृपः कारारक्षकेषु समार्पयत् ॥१०५॥
तथैव युष्मद्विषये पिता मे स्वर्ग्यः प्रकुर्य्याद्यदि यूयमेवं । भ्रातॄन् स्वकीयानपराधिनोऽपि

नेह क्षमेध्वं हृदयेषु सर्वे ॥१०६॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मोषि पंचशास्त्रस्य निःसृतिस्कन्धान्मत्थायस्य सप्तदशाष्टादशसर्गाभ्यां मार्क्लूकयोर्नवमसर्गाच्चोद्धृतः) शिष्यमल्लनिरोधो नाम षष्ठोऽध्यायः ॥

शिष्य उवाच ॥ एवं कपर्नहूमाख्ये दूरदिग्भ्रमणात्परे । स्वपुरे पुनरागत्य पुण्यादेष्टा चकार किं ॥१॥ गुरुरुवाच॥ न चिरं शिष्य तत्रैव न वा गालील्यनीवृतः। कस्मिंश्चिदपि स स्थाने 44
तद्देशतनयोऽवसत् ॥२॥ कालो ह्युपस्थितस्तर्हि द्वितीयविषुवान्तिकः । दूष्यपर्व्वसमारब्धयै धार्म्मिकाः प्रस्तुता यदा ॥३॥ महापर्व्वत्रयस्यास्मिंश्चरमे हीस्रयेलजाः । सर्व्वे शास्त्रानुसारेण गता ईश्वरमन्दिरं ॥४॥ बन्धुवर्गस्तदा येष्वस्तदविश्वस्तमानसः । यशोलिप्सुस्त्विदं वाक्यं समवादीत्स्वगोत्रजं ॥५॥ श्रीयेषूबान्धवा ऊचुः ॥ यथा क्षुद्रे प्रदेशेऽस्मिन् यत्नात्त्वं परितो भ्रमन् ।

ज्ञापयस्यात्मगुरुतां गालील्यानेव कर्म्मभिः ॥६॥ त्वं यहूद्ये तथा देशे ऽधिकमप्येतुमर्हसि ।
स्वेभ्यस्तत्रस्थशिष्येभ्यो ऽद्भुतकर्म्मप्रदिष्टये ॥७॥ न किंचिद्व्यावृतं कुर्य्यात्सत्प्रकाशहितो नरः ।
कुर्य्याश्चेत्सत्यमेतानि जगत्यात्मानमीक्षय ॥८॥ गुरुरुवाच ॥ इत्युक्तो बन्धुभिः स्वीयैः सत्प्र
काशात्मकस्तदा । पितृकर्म्मसमासक्तः स तान्प्रत्यब्रवीद्वचः ॥९॥ श्रीयेषूरुवाच ॥ मदीयः
समयो नूनमिदानीं नह्युपस्थितः । युष्मदीयस्तु समयः सर्व्वदाप्युपतिष्ठति ॥१०॥ न ४५
द्वेष्टुं शक्नोति युष्मान्हि जगत् किंतु तद्वै द्वेष्टि मे यतः । साक्ष्यं ददाम्यहं तस्य क्रियामन्दत्वगोचरं ॥११॥
यूयं पर्व्वणि यातास्मिन् नतु यूह्यान्वितस्य मे । सुकीर्त्यावृतयात्रायाः संपूर्णः समयो ऽधुना ॥
१२॥ गुरुरुवाच ॥ इत्युक्त्वा स स्वबन्धुभ्यो ऽतिष्ठद्गालील्यनीवृति । महायूह्यान्वितास्ते तु तदा
गच्छन् महापुरं ॥१३॥ भूते महोपवासे तु प्रायश्चित्ताभिधे तदा । सर्व्वे यिरूषलेमान्तरारभन्तैव

मेलितुं ॥१४॥ तत्पश्चात्पंचमेऽह्न्येव गृहत्यक्त्या यहूदिनां । बलीवर्द्दादिमेधैश्चारम्भणीयो
महोत्सवः ॥१५॥ तदा तु समुपस्थातुं तत्र नैच्छद्बुधः प्रभुः । पर्व्वमध्ये तु तत्रैतुं गुप्तवत्सम
कल्पयत् ॥१६॥ अतः सोऽपगतेः पश्चाच्छेषाणां पर्व्वयात्रिणां । शिष्यैः सह गलीलातो दक्षिण
स्यां गतः सृतौ ॥१७॥ तन्मध्यस्थं च सामार्य्यं प्रदेशं स प्रविष्टवान् । तस्य कस्मिन्नपि ग्रामे
स स्वाग्रे प्रैरयच्चरान् ॥१८॥ तद्ग्रामवासिनस्त्वेतैर्याचितं शयनस्थलं । यिरूषलेमयात्र्यर्थेऽनु ४६
माय प्रददुर्न तत् ॥१९॥ इत्थं पाषण्डिनां तेषां सन्मन्दिरविरोधनं । दृष्ट्वा क्रोधान्वितौ येषूं
प्रोचतुर्जिबिदीयजौ ॥२०॥ याकोबयोहन्नी उचतुः ॥ प्रभो त्वदिच्छयामीषां प्रलयायेश
दुर्हृदां । किं नैतर्हि दिवोऽप्यग्निं वयमत्राह्वयामहे ॥२१॥ यथाग्रेऽपि महालीयो दूतौ
राज्ञो विभुद्विषः । सगुल्मौ ध्वंसितुं शक्त्याग्निमाकाशात्समाह्वयत् ॥२२॥ गुरुरुवाच ॥

कुतूहलवचः श्रुत्वा वज्रपुत्राख्ययोस्तयोः । नृपुत्रः स नृजीवानां न हन्ता किंतु रक्षकः ॥
२३॥ सभर्त्सनमिदं वाक्यं प्रोवाच भ्रातरौ प्रति । कीदृगात्मोपपन्नाः स्थ तद्युष्माभिर्न बुध्य
ते ॥२४॥ इत्युक्त्वा दुःसमार्य्याणां ग्राममेनमदण्डितं । दयालुर्मुक्तिदो हित्वाचलद्ग्रामान्तरं
ततः ॥२५॥ अथ कस्मैचिदेतर्हि तमन्वेतुं समिच्छते । यत्र यत्र चलेन्मार्गे प्रभुरेतद्वचो
ऽब्रवीत् ॥२६॥ लोमशैराश्रिता गर्त्ता नीडा अपि च पक्षिभिः । नृसूनोस्तु क्वचिन्नास्ति शिर ४७
सोऽप्यर्पणस्थलं ॥२७॥ अन्यस्मै च तमन्वेतुमाज्ञाप्तायाथ वाञ्छते । पित्रन्त्येष्टिं पुरा कर्त्तुं
तदा प्रभुरवोचत ॥२८॥ मृतकर्म्म मृतैरेव कार्य्यं त्यक्त्वा समन्विहि । मां त्वमीशस्य राज्यं च
जीवनाप्तः प्रचारय ॥२९॥ कोऽप्यन्यस्तु यदावादीत्त्वामन्वेष्याम्यहं प्रभो । प्राक् त्वेतुं मद्गृह
स्थानां नत्यर्थमनुमन्यतां ॥३०॥ इत्युक्तः स तदोवाच यो यः स्पृष्ट्वा हलं ततः । स्यात्पराङ्मुख

त्वात ईशराज्यार्हको न सः ॥३१॥ इत्युक्त्वा सह तैः शिष्यैः प्रावलद्दक्षिणे पथि । देशं
तीर्त्वा च सामार्य्यं यह्रूधे स उपस्थितः ॥३२॥ तदा सप्ततिसंख्या ये प्रभुसंप्रेरिताः पुरा ॥
पुनः प्रापुर्मुदा ते तं महानगरसन्निधौ ॥३३॥ परिचारकगण उवाच ॥ प्रभो यत्कालतोऽस्मांस्त्वं
गलीलायाः समैरयः । त्वन्नाम्नास्मद्वशीभूता भूता अपि समन्ततः ॥३४॥ गुरूरुवाच ॥ इति
श्रुत्वा स्वशिष्याणां पारमार्थिकशक्तिदः । बहूनामपि सद्वार्तां ततः स प्रजगाद तान् ॥३५॥ ४८
यीयेषूरुवाच ॥ भूतनायकमप्युग्रमपश्यमभिशापिनं । अन्तरीक्षात्पतन्तं वै चञ्चत्सौदामिनी
मिव ॥३६॥ अहो वृश्चिकसर्पादींस्तावच्छक्तिं च विद्विषः । अहिंसं मर्द्दितुं सम्यक् सामर्थ्यं
वो ददाम्यहं ॥३७॥ किंतु भूतगणस्यापि युष्मन्निघ्नत्वहेतुतः । मानन्दत वरं स्वर्गे
स्वीयनाम्नां विलेखनात् ॥३८॥ दिवः पृथिव्याश्च सुनाथ मत्पितः सुधीभ्य एतद्यदगोपयो

ऽखिलं । शिशूंस्त्विदं स्पष्टमवेदयस्ततो मुदोतमेच्छा तव शस्यते मया ॥३९॥ तथास्तु सर्व्वाणि हि मे ददौ पिता न वेत्त्यतः कोऽपि सुतं विना पितुः । न कोऽपि विद्यात्पितरं सुताद्विना सुदीक्षिताद्वा सुततुष्टितो नरात् ॥४०॥ यूयं तु मम सच्छिष्या यद्यत्तं पश्यथ ध्रुवं । तद्द्रष्टॄण्येव धन्यानि लोचनानीति वच्म्यहं ॥४१॥ राजाचार्य्यगणोऽग्रे हि युष्मद्दृष्टं श्रुतं च यत् । तद्दृष्टिश्रुतिकामोऽपि तदलब्ध्वा पुरामृत ॥४२॥ गुरुरुवाच ॥ एतदभ्यन्तरे कोऽपि धर्म्म- ४९
शास्त्री समुत्थितः । व्यूहमध्यात्परीक्षार्थमिमं प्रश्नं चकार ह ॥४३॥ हे महाचार्य्य किं कृत्वा प्राप्स्येऽहं नित्यजीवनं । इति पृष्टः स सर्व्वज्ञः प्रत्युवाचाथ शास्त्रिणं ॥४४॥ किमेतद्विषयेऽधीषे लिखितं त्वं विभोर्व्विधौ । इदं श्रुत्वा वचो येष्वः प्रत्यवादीद्यहूद्यसौ ॥४५॥ धर्म्मशास्त्र्युवाच ॥ तावद्धृदा परात्मानं प्रीणयेस्तावदात्मना । तावच्छक्त्या स्वमीशं त्वं तावच्चित्तेन च ध्रुवं ॥४६॥

प्रतिवासिनमेवं स्वं प्रीणयेस्त्वं किलात्मवत् । इति मोसीयशास्त्रे हि विभुनाज्ञापिता नराः ॥
४७॥ गुरुरुवाच॥ इदं श्रुत्वाब्रवीद्येषूः साधु प्रत्युदितं त्वया। एवं कुर्व्वन् विशङ्कं त्वं जीवनं प्राप्नुया
इति ॥४८॥ निजशुद्धीकृतीच्छुस्तु तदापृच्छदसौ गुरो । कोऽस्ति मे प्रतिवासीति प्राप्नो
च्चेदं गुरुन्तरं ॥४९॥ श्रीयेषूरुवाच ॥ पान्थः कोऽपि यहूदीयो यिरीहूनगरं चलन् । यिरूषलेम
तो मार्गे हिंस्रैःप्राप्यत तस्करैः ॥५०॥ तत्र नग्नीकृतस्तैः सोऽत्याहतश्चापि लोटकैः । अत्यज्यत ५०
मृतप्रायः समस्तरहितः मृतौ ॥५१॥ कोऽपि यज्वा तु तत्काले दैवात्तस्मिंश्चलन्पथि । तं
दृष्ट्वासृङ्गलत्रासादन्यपार्श्वेऽत्यगाद्द्रुतं ॥५२॥ तथा तत्समये कश्चिल्लेवीयस्तत्राप्युपस्थितः ।
ईक्षित्वातिततारैवं तमशुद्धत्वशङ्कया ॥५३॥ पान्थः कश्चित्तु सामार्य्यस्तदा गच्छंस्तदध्वनि ।
दृष्ट्वा तं पतितं तत्र भूतस्तत्कारुणार्द्रहृत् ॥५४॥ अतोऽपि समुपासृत्य तत्क्षतेषु सुयत्नतः ।

तैलं द्राक्षारसं चापि न्यस्य चोरैर्बबन्ध सः ॥५५॥ ततस्तं स श्रमाद्दीनमारोप्य स्वीयवाहनं ।
पान्थशाले समानीय तत्र सम्यगपालयत् ॥५६॥ परेऽह्न्यात्मक्रियार्थं तु प्रचलन् स स्वकोषतः ।
रौप्यार्द्धकर्षमुद्धृत्य तच्छालापतये ददौ ॥५७॥ उचे च त्वमिमं दीनं परिपाह्यधिकस्तु चेत् ।
व्ययः स्यात्प्रतिदेयः स पुनरेत्य मयैव ते ॥५८॥ अतस्त्रिषु नरेष्वेषु लेव्यसामार्य्ययज्वसु ।
कतमः प्रतिवास्यासीदमुष्यार्त्तस्य तस्करैः ॥५९॥ गुरुरुवाच ॥ इत्युक्तो धर्म्मशास्त्री सोऽब्रवी ५१
त्सत्यतया जितः । योऽमुष्यासीद्दयाकारी प्रतिवासी स एव हि ॥६०॥ इदं श्रुत्वोत्तरं तस्य
प्रभुरभ्यवदत्तदा । धर्म्मशास्त्रिंस्तथैव त्वमितः प्रस्थाय कुर्व्विति ॥६१॥ भद्रसामार्य्यकथनं तथा
मोचक उक्तवान् । प्रविवेश ततो ग्रामं बेथनीयाभिधानकं ॥६२॥ यिरूषलेमतो यो वै
क्रोशमात्रान्तरे स्थितः । यिरीखूं प्रति मार्गेऽपि संस्थः पूर्व्वदिगाश्रिते ॥६३॥ यो ग्रामः श्रेष्ठ

वृक्षाद्रेर्नितम्बे संस्थितोऽभवत् । महामन्दिरदीपादिवह्निनोज्ज्वलतो निशि ॥६४॥ तत्रो
पस्थाय सन्मोक्ता समये दूथपर्व्वणः । सर्व्वान्प्रास्थापयच्छिष्यान् पृथक् स्थातुं महापुरे ॥६५॥
एकाकी स तु तद्ग्रामवासिन्याः प्राविशद्गृहं । मार्थानाम्न्या अभूद्यस्या भ्राता लाजारसंज्ञकः ॥६६॥
तयोर्भग्नी मरीयाख्या तद्गृहेऽपि स्थिता ध्रुवं । प्रभुपादसमासीना तद्वाक्यान्यशृणोन्मुदा ॥
६७॥ मार्था तु गृहकार्य्येभ्यः परिश्रमसमावृता । येषूं प्रति समागत्य व्यग्रमेतद्वचोऽब्रवीत् ॥ ५२
६८॥ मार्थोवाच ॥ मया केवलया कार्य्यं गृहकर्म्माखिलं स्वसा । मदीया विजहातीति
किं न चिन्तयसि प्रभो ॥६९॥ दययैनां त्वमाचार्य्य त्वद्वाक्याकर्णिनीं सदा । इदानीं मम
साहाय्यं प्रकर्तुं दृढमादिश ॥७०॥ गुरुरुवाच ॥ तथा सोऽभ्यर्थितो यत्नाद्धितकर्म्मोपदेशकः ।
तदा स्वस्रोस्तयोः साक्षात्प्रददाविदमुत्तरं ॥७१॥ श्रीयेषूरुवाच ॥ मार्थे मार्थे किलेदानीं त्वं

नानाकार्य्यहेतुतः। अत्यन्तव्याकुलत्वेन व्याप्ता संपीडितापि च ॥७२॥ किंत्वेकमात्रमावश्यं यो वृतश्च मरीयया। श्रेष्ठो भागः स वै तस्या नापहार्य्यः कदाचन ॥७३॥ गुरुरुवाच॥ इत्युक्त्वा बेथनीयायां संस्थितः स महागुरुः। पर्व्वणोऽष्टाहमध्ये ऽतो गुप्तवत्प्राविशत्पुरे ॥७४॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मोसेः पंचशास्त्रे लैव्यस्कन्धस्योनविंशसर्गादनुवाक्यस्कन्धस्य षष्ठदशमैकादशोनविंशत्रिंशसर्गेभ्यो राजचरित्राल्लूकस्य नवमदशमसर्गाभ्यां योहन्नेः सप्तम ५३
सर्गाच्चोद्धृतः) शान्तधर्म्मप्रशंसा नाम सप्तमोऽध्यायः ॥

गुरुरुवाच॥ ये महानगरस्थास्तु यहूद्याः पूर्वपर्व्वणोः। प्रविष्टं ददृशुर्येषूं दर्शिताद्भुतकर्म्मकं ॥१॥ तेऽस्मिन् पर्व्वण्युपक्रान्ते तृतीये बहुयत्नतः। यात्रिणां बहुलव्यूहे मृगयामासुरेव तं ॥२॥ अप्राप्य त्व ब्रुवन् कुत्र वर्त्तते खल्वसाविति। ततस्तद्विषयेऽत्यन्त उत्थितः कलहो नृणां॥३॥ केचिद्ब्रूवुरसौ भद्रो

विद्यते नर इत्यथ । अन्ये प्रोचुर्न सत्यं तत् स हि लोकप्रवञ्चकः ॥४॥ किंत्वियत्यपि संदेहे सति
भीत्यार्य्ययज्वनां । पुरा तद्द्विषतां स्पष्टं प्राशंसन्नहि को ऽपि तं ॥५॥ पर्व्वणो मध्यकाले तु परमे
श्वरमन्दिरे । अकस्मात्सो ऽखिलैर्दृष्टः शिक्षयन्निर्भयं जनान् ॥६॥ यहूद्या विस्मितास्तूचुरि
यच्छास्त्रसुधीः कुतः । गालील्यो ऽयमहो भूतो न केनाप्यत्र शिक्षितः ॥७॥ इत्यविश्वासिनां तेषां
वाचश्चेतांसि च प्रभुः । अनुभूय तदावादीन्मन्दिरस्थानिदं वचः ॥८॥ श्रीयेषूरुवाच ॥ यां ददा ५४
म्यधुना शिक्षामहं युष्मभ्यमेव हि । शिक्षा ज्ञेया न मे किंतु मत्प्रेरयितुरेव सा ॥९॥ तस्येच्छां यो
नरः कर्त्तुमिच्छेत्स ज्ञास्यति ध्रुवं । एषा शिक्षा किमीशोत्था किं वा प्रोक्ता मया स्वयं ॥१०॥ स्वयं
यो वक्ति स स्वीयकीर्त्तीच्छुर्यस्तु कीर्त्तनं । स्वस्यान्विच्छति नोतुः स सत्यो हीनविधर्म्मकः ॥११॥
मोसिदत्ता व्यवस्था वः किं न सर्व्वैरसंमता । मां तल्लङ्घनतो यूयं किमर्थं हन्तुमिच्छथ ॥१२॥

गुरूरुवाच ॥ इदं प्रभुजिघांसुत्वं यदभूच्छ्रेष्ठयज्वनां । विश्रामविधिलङ्घार्थं पंचाशत्पर्व्वणि
स्फुटं ॥१३॥ तदज्ञो ब्रूह आह स्म भूतयस्तोऽसि केन हि । त्वद्विंसेषत इत्युक्तः प्रभुः प्रत्य
ब्रवीदिदं ॥१४॥ श्रोयेषूरुवाच ॥ एकमत्र मया कर्म्म विश्रामाहे कृतं पुरा । दुर्बलस्य
चिकित्सार्थं तस्माद्यूयं तु विस्मिताः ॥१५॥ ननु वोऽपि परिच्छेदसंस्कारं पितृरीतितः । स्व
पूर्व्वस्थमपि स्वीये मोसिः किं नाददद्विधौ ॥१६॥ किमतो न शिशून् यूयं तद्दिनेऽष्टम ५५
आगते । यद्यपीदं शनेर्वारः स्यात्परिच्छिन्थ सर्व्वथा ॥१७॥ तथा चेत्सर्व्वथा यूयं मोसीयविधि
पूर्त्तये । विश्रामाहेऽपि कुरुथ परिच्छेदनसंस्कृतिं ॥१८॥ कथं क्रुध्यथ मे यूयं धार्म्मिकाख्या
यतो मया । सम्यक् सुस्थीकृतोऽप्यासीन्नरो विश्रामवासरे ॥१९॥ लोकदृष्ट्यनुसारेण मा वि
चारयत क्रियां । मदीयां किंतु तत्त्वेन विचारं कुरुत स्थिरं ॥२०॥ गुरूरुवाच ॥ इदं श्रुत्वा

वचः केचित्तदा यैरूषलेमिनां । तत्पुराकृतकर्म्मज्ञाः समवोचन् परस्परं ॥२१॥ यिरूषलेमीया
ऊचुः ॥ सोऽयं किं नास्ति यं श्रेष्ठा यज्वानो विधिलङ्घनात् । ईशतुल्यत्ववादाच्च मृत्युदण्डार्हमब्रु
वन् ॥२२॥ इदानीं तु स सर्व्वेषां संमुखे वक्ति निर्भयं । न तथापि च तं केचित्प्रत्याहुर्मन्दिर
स्थिताः ॥२३॥ किं नूनं खृष्ट इत्येष मन्यतेऽस्मत्प्रधानकैः । गालील्योऽपि समस्तैश्चास्माभि
र्ज्ञातोद्भवस्थलः ॥२४॥ किंतु खृष्टो यदागामी हठात्प्रादुर्भविष्यति । स कुतोऽस्ति च केनापि ५६
नृणां न ज्ञास्यते क्वचित् ॥२५॥ गुरुरुवाच ॥ इत्यन्योन्यमविज्ञेषु जल्पत्स्वेव यहूदिषु । मन्दिरे
प्रजगादोच्चैर्महाचार्य्यः समुत्थितः ॥२६॥ श्रीयेषूरुवाच ॥ यूयं वित्थ यथोक्तं मां मम चा
प्युद्भवस्थलं । नत्वहं स्वयमायातः प्रेरितस्तु परेण वै ॥२७॥ स वै सत्योऽस्ति यं यूयं न
वित्थाहं तु वेद्मि तं । यतोऽहमागतस्तस्मात्तेन च प्रेरितो भुवि ॥२८॥ गुरुरुवाच ॥ इति

श्रुत्वा दुरात्मानस्तमतो धर्त्तुमुद्यताः । नत्वगृह्णन् यतस्तस्य समयो न ह्युपस्थितः ॥२९॥ यूह
मध्ये तु बहवस्तं विश्वस्याब्रुवन् यदा । खृष्ट आगाम्यथास्मात् किं कर्त्ताश्चर्य्यतराः क्रियाः ॥
३०॥ इत्थं यूहवचः श्रुत्वा येष्वः खृष्टत्वगोचरं । फरीशाः शत्रवस्तस्य भयं क्रोधं च संययुः ॥
३१॥ तं ग्रहीतुमतः पत्तीन् प्रैरयन् श्रेष्ठयाजकाः । सफरीशाः स तांस्तूच्चैरिदं निर्भयम
ब्रवीत् ॥३२॥ श्रीयेषूरुवाच ॥ अल्पमेवाधिकं कालं युष्माभिः स्यां सहस्थितः। ततः प्रेरयितारं ५७
मे ऽधिगमिष्याम्यहं पुनः ॥३३॥ मृगयित्वापि मां यूयं न प्राप्स्यथ तदा क्वचित् । यत्र तिष्ठाम्यहं
ह्येव तत्र गन्तुं न शक्नुथ ॥३४॥ गुरुरुवाच ॥ तद्वाक्याद्विस्मिता यूहाः समवोचन् परस्परं ।
कुत्र यास्यत्ययं यत्र नाप्नुयाम क्वचिद्वयं ॥३५॥ यवनादीन् किमभ्येतुं सर्व्वस्यां भुवि विस्तृतान्।
इदानीं कल्पयत्येष भिन्नदेशोपदिष्टये ॥३६॥ किमेतच्चित्रवाक्यं मां मृगयित्वापि नाप्स्यथ ।

यत्राहं चास्मि तत्रैतुं नहि यूयं क्षमा इति ॥३७॥ गुरुरुवाच ॥ पर्व्वणस्त्वष्टमो घस्रस्तत्कालस्थै
र्यहूदिभिः । सर्व्वेषामुत्तमो ज्ञात उपतस्थौ यदान्तिमः ॥३८॥ तदा खार्ज्जूरिकाः शाखा हस्तैर्धृत्वा
पुरोधसः । होमवेदिं विभोर्गेहे पर्य्यवेष्टन्त सप्तधा ॥३९॥ चलन्तश्च तथा सर्व्वेऽब्रुवन्नुच्चैर्निर
न्तरं । रक्ष नः प्रार्थयामस्त्वां शुभं नो नाथ कुर्व्विति ॥४०॥ तत आह्लादजोन्मादव्याप्तो यूहो यहू
दिनां । सिलोहाख्यसरोऽम्भोभिः पूर्णान् कुम्भान् समानयत् ॥४१॥ तान् यूहहस्ततो लब्ध्वा ५८
वेदेरुपरि याजकाः । सलिलं पातयामासुरुत्सृज्यसुरया युतं ॥४२॥ तत्पुण्यजलपातेन
सदात्मानं च तेऽविदः । प्राप्तं ज्ञात्वा ततो गानं भविष्यद्वक्तुरब्रुवन् ॥४३॥ इषाय उवाच ॥
अहो मुक्तिरूपाकरेभ्योऽपि यूयं जलान्युद्धरिष्यध्व एवातिहृष्टाः । महानिस्त्रयेलार्य्य एवास्ति
मध्ये यतस्तेऽप्यतो गाय शीयोनवासिन् ॥४४॥ गुरुरुवाच ॥ एतत्कर्म्मप्रवृत्तेषु मन्दिरान्तर्यहू

दिषु । यज्वादिषु हठादेत्य तन्मध्येऽघोषयत्प्रभुः ॥४५॥ श्रीयेषूरुवाच ॥ चेत्कोऽपि तृषेदभि
यातु पात्यै मामेव यस्मान्मयि विश्वसेद्यः । तस्योदरादप्यमृतोदनद्यो वहेयुरित्यार्य्यलिपि
प्रगीतं ॥४६॥ गुरुरुवाच ॥ इति येष्वा स्फुटं प्रोक्तमात्मनो विषये किल । तद्विश्वासयुतैः
सर्वैः प्रापणीयस्य निश्चयं ॥४७॥ किंत्वेतत्प्रोक्तिकाले तन्नासीद्दानं सदात्मनः । न तदा
हि स्वमैश्वर्य्यं मोक्तापोत्कृतकर्म्मकः ॥४८॥ मन्दिरस्थास्तु बहुलाः श्रुत्वा तद्वाक्यमद्भुतं । ५९
ऊचुः सोऽस्त्येष वै यो नोऽभीष्ट ईशप्रवाचकः ॥४९॥ अन्ये त्वप्यब्रुवन् ख्रिष्टो राजायं नोऽस्ति
निश्चितं । अन्यैस्तूक्तं गलीलातः ख्रिष्टः किमुदितो भवेत् ॥५०॥ स हि बेथ्लहमग्रामाद्दाविदो
ऽप्युद्भवस्थलात् । दाविञ्जः ख्रिष्ट आगामीत्यार्य्यग्रन्थोदितं न किं ॥५१॥ इत्थं तद्विषये बृह
मतभेदोऽभवत्तदा । केचित्तमदिधीर्षंश्च नतु केऽप्यस्पृशन् करैः ॥५२॥ शिष्य उवाच ॥ तत्स्म

रन्तो ऽप्यमी सर्वे गुरो यैरूषलेमकाः । पुरा मीकेन यत्प्रोक्तं भयत्वृष्टोद्भवस्थलं ॥५३॥ कि
मर्थं नास्मरंस्ते ऽपि त्रिंशदब्दात्पुरा कृतं । राज्ञा तद्विषये प्रश्नं यज्वनां चोत्तरं स्फुटं ॥५४॥
अतोऽन्यदेश्यविज्ञानां चोक्तोत्पत्तिस्थले गतिं । नूत्नराजार्चनायैव हेरोदेर्वाक्यतोऽप्यरेः ॥
५५॥ किमर्थं न स्मृता चापि याभूद् बेथ्लहमात्तदा । येषूत्पत्तेर्महावार्ता विस्तृता मेष
पालकैः ॥५६॥ गुरुरुवाच ॥ नाज्ञाता शिष्य सा किंतु दुर्बोधैर्विस्मृता कथा । स्वर्गदूता ६०
र्चितस्यापि तदा बेथ्लहमे शिशोः ॥५७॥ तत्र जातशिशूनां हि दुर्हेरोद्याज्ञया हतं । शेषा
णां किल मध्ये तं मेनिरे पण्डितार्चितं ॥५८॥ नाजानंस्ते हि दुर्बोधास्तं शिशुं बधर
क्षितं । गलीलायां परे मातापितृभ्यां नीतमेव च ॥५९॥ प्रदेशेऽवमते त्वस्मिन् जातं तं
मेनिरे नरं । यं येष्वाख्यं तदापश्यन्नाचार्यं त्रिंशदब्दकं ॥६०॥ किंतु तद्भूतये नुन्ना

यथोक्तं पत्तयोऽपि ते । तदकृत्वा पुनर्जग्मुः फरीषिश्रेष्ठयज्वनः ॥६१॥ तैस्तु पृष्टाः किमर्थेऽमुं
यूयं नानयतेति ते । ऊचुरेष नरो यादृङ् नेदृग्वादी कदाचन ॥६२॥ इति श्रुत्वोचुरध्यक्षाः
किं भ्रान्ता यूयमप्यरे । कः सभ्यः कः फरीष्यो वा साक्षाद्वो व्यश्वसीदमुं ॥६३॥ किंतु नीचा इमे
सर्व्वे ईशशास्त्राविदः किल । अभिशप्ता भवन्तीति प्रोक्तं दृप्तैः फरीषकैः ॥६४॥ तत्सभास्थस्तु
यो येषूं निश्यगात्राणपर्व्वणि । भीत्या तद्गुप्तविश्वासोऽब्रवीत्तद्द्रोहरुज्ञये ॥६५॥ नीकदेम ६१
उवाच ॥ सद्व्यवस्था किमस्माकं दण्ड्यं वदति कंचन । न श्रुतेऽपि तदीयेऽर्थे न ज्ञाते चापि
कर्म्मणि ॥६६॥ गुरुरुवाच ॥ इत्युक्तं नीकदेमस्य सकोपा इतरेऽखिलाः । सभ्याः फरीषकाः
श्रुत्वा प्रत्यवोचन्निदं वचः ॥६७॥ सभ्या ऊचुः ॥ किं त्वमप्यसि गालील्यस्त्वं कृत्वान्वेषणं
दृढं । गलीलोत्थो न कोऽपीशप्रवाच्यस्तीति विज्ञतः ॥६८॥ गुरुरुवाच ॥ ततः स्वं स्वं

गृहं सर्व्वे जग्मुः सायं तु मोचकः । श्रेष्ठवृक्षाद्रिमारुह्य बेथनीयालये ययौ ॥६९॥ शिष्य उवाच ॥
किं तथा प्रभुरार्य्यः स मार्थागृहमुपस्थितः । ततः सम्यग्जहौ पुण्यं स्वजिघांसूषितं पुरं ॥
७०॥ गुरुरुवाच ॥ तत्रैव क्रोशपर्य्यन्तमगच्छत्स दिने दिने । पर्व्वकाले निशामात्रयापनार्थं
महापुरात् ॥७१॥ न तदा चोत्सवान्तेऽपि स सम्यक् सत्पुरं जहौ । इस्रयेलार्य्य उद्दीप्तो
मध्ये शीयोनवासिनां ॥७२॥ किंतु तत्सभ्यसंवादात्परेऽन्यैरपि मन्दिरे । यैर्व्वाक्यैः स स्व ६२
खृष्टत्वं व्यूहानूचे विरोधिनः ॥७३॥ तानि वक्ष्येऽचिरात् किंतु या कथा कीर्त्तिता प्रभोः ।
तत्रैतस्य परेऽह्येवं तां वदिष्यामि तेऽधुना ॥७४॥ सन्मन्दिरे ह्युपदिशन्तमुषस्यभीतं व्यूहेऽ
खिले समभिगच्छति खृष्टमार्य्यं । अध्यापकाः किल तदा सफरीयकाः स्त्रीमभ्यानयंश्चरधृतां
व्यभिचारहेतोः ॥७५॥ तामन्तरापि च निधाय तमूचुरेषा नारी गुरो व्यभिचरन्त्यृतसाक्षि

दृष्टा । एतादृशोपरि शिलासनमृत्युदण्डो मोऽस्युक्त एव भवता तु किमुच्यतेऽस्मान् ॥७६॥
इत्युक्तमेतदभिशापनिदानलब्ध्यै धूर्तैः परीक्षकगणैः स निशम्य विज्ञः । तिष्ठंस्तथापि तदयुक्त
मना इवात्माङ्गुल्या तदा व्यलिखदक्षररूपमूर्व्यां ॥७७॥ प्रश्नं त्विमं कथितवत्स्वपि तेष्वभीक्ष्णं
शेषे शिरो धरणितो दृढमुद्धरन् सः । तानभ्युवाच निरघत्वमतोऽस्ति यस्य युष्मासु सोऽस्यतु
शिलां प्रथमं किलास्यां ॥७८॥ इत्युक्तवानपि पुनर्नतवक्त्र आत्माङ्गुल्यालिखत्स तदयुक्तमना ६३
इवोर्व्यां । आत्माघसंस्मरणमात्रपराजितास्ते त्वाज्येष्ठमेव सकला ययुरेकशोऽन्तः ॥७९॥
सर्वेषु तेषु वहिरीशगृहाद्गतेषु येषूः शिरो धरणितः पुनरुद्दधार । कंचिच्च तत्र न समीक्ष्य वि
ना स्त्रियं स तामन्तरा प्रणिहितामिदमभ्युवाच ॥८०॥ नारि क्व सन्ति तव खल्वभिशापि
नोऽमी त्वं दण्डिता किमसि नेत्युदिताब्रवीत्सा । केनापि नेत्यथ जगाद स नास्म्यपि त्वं

मद्दण्डिता प्रचल मा पुनरावराधं ॥८१॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मोसि पंचशास्त्रस्य लेव्यानुवाक्यस्कन्धाभ्यां इषायभथवाक्यानां द्वादशसर्गाद्योहन्नेः सप्तमाष्टमसर्गाभ्यां यहूदीयरीतिविवर्णनेभ्यश्चोद्धृतो) मुक्त्याकरप्रदर्शनं नामाष्टमोऽध्यायः ॥

गुरुरुवाच ॥ मन्दिरे शिक्षयन्तं यं न क्षमाः श्रेष्ठयाजकाः । विरोद्धुं स्वचरैस्तत्र स यूहान्
पुनरब्रवीत् ॥१॥ श्रीयेषूरुवाच ॥ जगतोऽहं प्रकाशोऽस्मि मां यश्चान्वेति मानुषः । न चलेत् ६४
स तमोमध्ये लब्धसञ्जीवनद्युतिः ॥२॥ गुरुरुवाच ॥ इति श्रुत्वा फरीशाणां केऽप्यूचुस्त्वं स्व
गोचरं । साक्ष्यं ददासि तस्मात्ते साक्ष्यस्यानृतता स्फुटा ॥३॥ श्रीयेषूरुवाच ॥ यद्यप्यात्मीय
विषये साक्ष्यं दद्यां तदस्त्यृतं । कुतो ह्यायां क्व चैम्येतद्वेद्मि यूयं तु वित्थ न ॥४॥ शरीरविषयं
यूयं विचारं वाह्यदर्शिनः । कुरुथाहं तु विज्ञोऽपि कस्यचिन्न विचारकृत् ॥५॥ विचारं त्व

कारिथं चेत्तदापि स्यादृतो मम । विचारो यत एकाकी नास्मि पित्रा युतस्त्वहं ॥६॥ सर्व्वं
कर्म्म दृढीकार्य्यं द्वित्रसाक्षिमुखोक्तिभिः । इति युष्मद्व्यवस्थायां किं स्फुटं नावलिख्यते ॥७॥
अहमात्मीयविषये साक्ष्येको ऽस्मि पितापि च । यो हि मां प्रेरयामास साक्षी मद्विषये ऽस्ति सः ॥
८॥ गुरूरुवाच ॥ इत्युक्ता विस्मयं गत्वा फरीशाः क्व पितास्ति ते । इत्थं पृच्छन्त ईशस्य
पुत्रादुत्तरमाप्नुवन् ॥९॥ श्रीयेषूरुवाच ॥ न मां न पितरं चापि मदीयं वित्थ चेद्धि मां । ६५
अवेत्स्यत तदा मे ऽपि पितरं खल्ववेत्स्यत ॥१०॥ गुरूरुवाच ॥ इत्युक्तं मन्दिरस्यांशे कोष
शालाभिधानके । तत्रोपदिशता यूहान् प्रभुणार्य्येण निर्भयं ॥११॥ न कश्चिद्दुर्यहूद्यानां दिधीर्षु
रपि तं तदा । समगृह्णाद्यतस्तस्य समयो न ह्युपस्थितः ॥१२॥ अनुभूय तु तेषां स हिंस्रत्वं किल
सर्व्ववित् । यथा पूर्व्वं तथाप्युच्चैरेतद्वाक्यं तदाब्रवीत् ॥१३॥ श्रीयेषूरुवाच ॥ गतं मां मृगयि

त्वापि मरिष्यध्वे स्वकिल्विषैः । ऽव्याप्ता यत्र ह्यहं गामी तत्र गन्तुं न शक्नुथ ॥१४॥
गुरुरुवाच ॥ इत्थं संश्रुत्य केऽप्यूचुः किमात्मवधमानसः । यत्रैष्यामि न तत्रैतुं शक्नुथेति ब्रवी
त्यसौ ॥१५॥ ईदृक्संशयवाक्यानि प्रवदत्सु परस्परं । तेष्वमित्रेषु तद्वाख्यां तद्देशतनयो
ऽब्रवीत् ॥१६॥ श्रीयेषूरुवाच ॥ अधःस्थानोद्भवा यूयमहं तूर्द्ध्वस्थलोद्भवः । यूयमेतज्जग
ज्जाता नाहं त्वेतज्जगद्भवः ॥१७॥ तदर्थं चैव मत्प्रोक्तं मृगयित्वापि मां मृषा । परे यूयं मरिष्य ६६
ध्वे याप्ता वै निजकिल्विषैः ॥१८॥ सोऽहमस्मीति यूयं हि न प्रतीयात चेद्ध्रुवं । तदा सम्य
गपि याप्ता मरिष्यध्वे स्वकिल्विषैः ॥१९॥ गुरुरुवाच ॥ इदमाकर्ण्य दुर्बोधास्ते पप्रच्छुर्यहूदि
नः । त्वं नु कोऽसीत्यथो तेभ्यो ददावुत्तरमीशजः ॥२०॥ श्रीयेषूरुवाच ॥ सोऽहमस्म्येव
यं सम्यगात्मानं वोऽवदं पुरा । विचारे चापि युष्माकं वक्तुं शक्नोम्यहं बहु ॥२१॥ यस्तु मां

प्रेरयामास सत्यरूपोऽस्ति स ध्रुवं । तस्माच्चाशृणवं यानि जगते तानि वच्म्यहं ॥२२॥ गुरुरु
वाच ॥ इत्युक्तमपि शृण्वन्त ईशपुत्रेण ते तदा । नाजानन्नीशविषयं तत् ततः सोऽब्रवीत्पुनः
॥२३॥ श्रीयेषूरुवाच ॥ युष्माभिर्नृसुतो ह्यूर्द्ध्वं भवेदुत्थापितो यदा । तदा सोऽस्म्यहमित्येव
यूयं ज्ञास्यथ दुर्धियः ॥२४॥ न करोमि स्वयं किंचित्पिता यन्मां त्वशिक्षयत् । तद्वच्मीत्यपि
युष्माभिस्तदा ज्ञातं भविष्यति ॥२५॥ यश्च मां प्रेरयामास स मयापि सहस्थितः । न जहौ ६७
मां यतः कुर्वे तत्सन्तोषक्रियाः सदा ॥२६॥ गुरुरुवाच ॥ इदं वाक्यं वदन्तं तं बहवोऽपि
यहूदिषु । प्रतीयुरथ तेषां स मनोदार्ढ्यार्थमब्रवीत् ॥२७॥ श्रीयेषूरुवाच ॥ यूयं मदीये
यदि तत्ववाक्ये तिष्ठत मेऽतः स्थ यथार्थशिष्याः । ततो दृढं ज्ञास्यथ सत्यमेव सत्येन कार्य्या
अपि चानधीनाः ॥२८॥ गुरुरुवाच ॥ इत्युक्तं यूहमध्ये ये प्रतीतिरहिताः स्थिताः । ते

श्रुत्वा प्रतिघाथाप्ता इदमभ्यब्रुवन् प्रभुं ॥२९॥ यहूद्या ऊचुः ॥ वयमब्रहवंशीया नाधीनाः
क्वापि कस्यचित् । तत्कथं वक्षि मद्वाक्यैरनधीना भविष्यथ ॥३०॥ श्रीयेषूरुवाच ॥ सत्यं सत्य
मिदं युष्मान् वच्म्यहं योऽस्ति पापकृत् । स ततः पापदासोऽस्ति तदधीनश्च सर्वदा ॥३१॥
गृहवास्यपि दासस्तु न सदा तत्र तिष्ठति । किंतु तत्स्वामिनः पुत्रस्तस्मिन् वसति सर्वदा ॥
३२॥ अतः स एव पुत्रश्चेद्दासत्वाद्वो विमोचयेत् । तदा स्यात विमुक्ता वै सततं चानधीनकाः ॥ ६८
३३॥ यूयमब्रहवंशीया इति जानामि निश्चितं । जिघांसथ तु मां यस्मान्नास्ते युष्मासु
मद्वचः ॥३४॥ यन्मत्पित्रन्तिके पश्यमहं तत्कथयामि वः । यूयं च स्वपितुः पार्श्वे यद्दृष्टं
कुरुथैव तत् ॥३५॥ यहूद्या ऊचुः ॥ कोऽर्थोऽस्ति तव वाक्यानामब्रहो ह्यस्ति नः पिता ।
तत्पुण्यपरिवारान्तःस्थिताश्चापि वयं सदा ॥३६॥ श्रीयेषूरुवाच ॥ चेदब्रहसुता यूयं तदा

तस्य क्रिया अपि। कुर्य्यात तेन तु क्वापि न कृतां कुरुथ क्रियां ॥३७॥ यो नरोऽकथयद्वो हि
सत्यं श्रुत्वेश्वरान्तिके। तं मां जिघांसथातो वै कुरुथ स्वपितुः क्रियाः ॥३८॥ यहूद्या ऊचुः ॥
जारजाता वयं न स्मो न वा सद्धर्म्मवर्ज्जिनः। इस्रयेलादिकानां नः पितैकोऽस्ति किले
श्वरः ॥३९॥ यीशुरुवाच ॥ ईश्वरश्चेत्पिता वः स्यात्तदैव प्रीणयेत मां। यतोऽहं निःसृतः
सम्यगीश्वरादागतोऽत्र च ॥४०॥ न स्वयं ह्युपतिष्ठामि तन्नुन्नस्त्वथ मे कुतः। न बुध्यध्वे गिरो ६१
यूयं मद्वाक्यश्रवणाक्षमाः ॥४१॥ अन्यस्माद्धि पितुर्यूयमुद्भूता अभिशापकात्। तथा स्वीय
पितुः कामान् संपूरयितुमिच्छथ ॥४२॥ नरघात्यादितोऽभूत्स सत्यभावेऽपितोऽपि च। ना
तिष्ठत्तत्र यस्मान्न सत्यतासीत्तदन्तरे ॥४३॥ तादृशश्च यदा मिथ्या वक्त्यात्मीयं तदा गुणं।
उदीरयति यस्मात्स मिथ्यावाङ् निजताततत् ॥४४॥ अहं तु यत एवेह सत्यं युष्मानुदे

रयं। तद्धेतोरपि यूयं मां न विश्वसिथ दुर्हृदः ॥४५॥ युष्माकं कोऽपकर्तृत्वं मम साधयितुं
क्षमः। अतः सत्यं यदि ब्रूयां कस्माद्ध न प्रतीथ मां ॥४६॥ ईश्वरीयो हि संभूत ईशोक्तिं
स निशामयेत्। यत ईशोद्भवा न स्थ ततो न शृणुथ ध्रुवं ॥४७॥ यहूद्या ऊचुः॥ वयं किं नेश
संभूता यहूदीया अतो न किं। त्वं समार्य्यमतो भूतग्रस्तश्चेत्यृतमुच्यते ॥४८॥ श्रीयेषूरु
वाच ॥ भूतग्रस्तोऽस्मि नाहं वै पितरं त्वाद्रिये निजं। यूयं चानादरं कर्तुं मामीशोद्भूत
मिच्छथ ॥४९॥ नतु स्वीयामहं कीर्त्तिमन्विच्छामि कदाचन। तामन्विच्छन् किलान्योऽस्ति
विचारं च समाचरन् ॥५०॥ सत्यं सत्यमिदं युष्मान् वच्मि यो यो वचो मम। पालयेत्
स ततो मृत्युं न पश्येदेव शाश्वतं ॥५१॥ यहूद्या ऊचुः॥ भूतग्रस्तस्त्वमित्येव निश्चितं वचसो
ऽपि ते। इदानीं विद्म गालील्य वयं खल्विस्रयेलजाः ॥५२॥ अब्रहो हि मृतस्तद्वन्मृताश्चेश

प्रवाचिनः । त्वद्वचःपालकस्त्वन्तं न स्वदेतेति जल्पसि ॥५३॥ पितुर्नोऽप्यब्रहात्प्रेतात्सत्यप्रव
कृगणाच्च किं । त्वं श्रेयानस्यथात्मानं कियन्तं किल कत्थसे ॥५४॥ श्रीयेषूरुवाच ॥ आद्रि
येयाहमात्मानं चेत्तदा नादरोऽस्ति मे । यं स्वेशं वक्थ यूयं तु स मामाद्रियते पिता ॥५५॥
युष्मदज्ञातमपि तं वेद्मि चेत्तु न वेद्मि तं । इति ब्रूयां तदा मिथ्यावाक् स्यां यूयमिव ध्रुवं ॥
५६॥ किंतु जानाम्यहं सत्यं पितरं निजमेव तं । तच्छ्रुतं पुण्यवाक्यं च पालयामि भुवि ७१
स्थितः ॥५७॥ अब्रहश्च पिता वोऽपि मद्वासरदिदृक्षया । उल्लासैव तद्दृष्टिं प्राप्नुवांश्चाप्य
मोदत ॥५८॥ यहूद्या ऊचुः ॥ पंचाशद्वर्षको नासि संप्रत्यपि ततोऽब्रहं । समपश्यः कथं
प्रेतं सहस्राब्दद्वयात्पुरा ॥५९॥ श्रीयेषूरुवाच ॥ सत्यं सत्यमिदं युष्मान् प्रब्रवीम्यब्रहो
द्भवान् । अब्रहस्य समुत्पत्तेः पूर्वमप्यस्म्यहं सदा ॥६०॥ गुरुरुवाच ॥ इत्युक्तास्तद्वधार्थि

ते शिलाः क्षेप्तुमतोलयन् । आत्मानं गोपयित्वा तु मन्दिरात्स वहिर्ययौ ॥६१॥ शिष्य उवाच ॥
प्रभुः किमवतीर्णस्तान् स्वनित्यत्वविरोधिनः । जहौ यैरूशलेमीयान्जिघांसूनुत्सवे गते ॥
६२॥ गुरुरुवाच ॥ अन्यदप्यधिकं कर्म्म साक्षाच्छीयोनवासिनां । ईशोद्भूतः प्रकाशः स स्व
गतेः प्रागदर्शयत् ॥६३॥ मन्दिराद्धि तदा गच्छन् स्वशिष्यैः पुनरन्वितः । आजन्मान्धं
नरं कंचित्स ददर्श महापुरे ॥६४॥ तं समालोच्य शिष्याणां केचिद्दीनं पथि स्थितं । समपृच्छ ७२
न्महाचार्य्यं तस्य दुर्भाग्यकारणं ॥६५॥ श्रीयेषूशिष्या ऊचुः ॥ अस्य जन्मान्धता केषां फलं
प्राक्तनकर्म्मणां । किं स्वीयानां गुरो किं वा मातापितृकृतागसां ॥६६॥ श्रीयेषूरुवाच ॥
न तस्यैव न तन्मातापित्रोर्वा पापभुक्तये । तज्जन्मान्धत्वमस्तीशक्रियाणां दर्शनाय तु ॥६७॥
यावदास्ते दिनं तावन्मया प्रेरयितुः क्रियाः । कर्तव्याः सुमहायत्नाद्रजनी ह्युपतिष्ठति ॥६८॥

तस्यां कोऽपि न शक्नोति ध्रुवमाचरितुं क्रियाः। यावज्जगति तिष्ठामि तावत्स्यां तु जगद्युतिः॥
६९॥ गुरूरुवाच॥ इत्युक्त्वा मोचको भूमौ क्षिप्तैः स्वमुखबिन्दुभिः। कृत्वा कर्द्दममन्धस्य
नेत्रयोरन्वलिम्पत ॥७०॥ अथ तं सोऽभ्युवाच त्वमितः प्रस्थाय सांप्रतं। सिलोहसरसि
स्नानं शुद्धये किल कुर्विति ॥७१॥ एतद्वाक्यानुसारेण गतोऽन्धः प्रेषिताभिधे। तस्मिन् स
रसि स स्नात्वा दृष्टिमान् पुनरागमत् ॥७२॥ प्रतिवासिगणास्तस्य पूर्व्वद्रष्टृगणास्तथा। ७३
ऊचुः सोऽयं न किं योऽग्रे समासीनोऽत्र भिक्षुकः ॥७३॥ सशङ्केष्विति पृच्छत्सु तेषु केचिद्विनि
श्चितं। स एषोऽस्तीत्यवोचन्तान्ये तु कोऽप्यस्ति तन्निभः ॥७४॥ विस्मितानामिमं श्रुत्वा संलापं
प्रतिवासिनां। स नरः प्रावदत्स्पष्टं यं संस्मरथ सोऽस्म्यहं ॥७५॥ इत्याश्चर्य्यवचःश्रुत्या
निश्चयं प्राप्य ते जनाः। पप्रच्छुस्तं कथं दृष्टिमथाप्नोस्त्वं हठादिति ॥७६॥ भिक्षुक उवाच॥

येषूर्नाम नरः कश्चित् स्वयं कृत्वा हि कर्द्दमं । मन्नेत्रे चावलिप्यैव सिलोहे स्नातुमादिशत् ॥
७७॥ तस्यादेशानुसारेण प्रस्थायाहं सरोऽम्भसि । स्नानं कृत्वा ततः सम्यगच्छां दृष्टिमवाप्नवं ॥
७८॥ गुरुरुवाच ॥ इति संश्रुत्य तेऽपृच्छन् कुत्र ते सोऽस्ति दृष्टिदः । प्रत्युवाचाप्तदृष्टिस्तु न
जानामीति भिक्षुकः ॥७९॥ ततस्ते तमवाप्ताक्षं फरीशान् श्रेयसः प्रति । आनयन् येऽपि
संपृच्छ्य तादृशं प्रापुरुत्तरं ॥८०॥ भिक्षुक उवाच ॥ मम नेत्रद्वयेऽलिम्पत्कर्द्दमं खल्वसौ नरः । ७४
ततः स्नानमहं कृत्वा स्वच्छां दृष्टिमवाप्नवं ॥८१॥ गुरुरुवाच ॥ प्रधानेष्वथ पृच्छत्सु तत्क्रिया
तु कदाभवत् । ज्ञापितेषु च तां भूतां विश्रामदिवसे किल ॥८२॥ मतभेदोऽभवत्तेषु केचि
द्गूचुरसंशयं । नेशनुन्नोऽस्त्यसौ यस्माद्विश्रामाहं न मन्यते ॥८३॥ इति श्रुत्वा परे तूचुर्नरः
पापी कथं क्षमः । इयदैश्वर्य्यचिह्नानि स्वयं दर्शयितुं जनान् ॥८४॥ इत्थं भूते विवादेऽतो

भिक्षुकं पुनरब्रुवन् । तव दृष्टेः प्रदातासौ कीदृशो मन्यते त्वया ॥८५॥ तथा पृष्टोऽब्रवीद्भिक्षु
र्मेयेवेशप्रवाच्यसौ । सुमन्यत इति श्रुत्वा कुपितास्तेषु भूरयः ॥८६॥ आशशङ्किरएवातस्त
द्दृष्टिप्राप्तिसत्यतां । तन्मातापितरौ चैतन्निश्चयार्थं समाहृयन् ॥८७॥ तौ तु भीत्या प्रधाना
नां येषूख्रृष्टत्ववादिनः । प्रागादिष्टवतां क्षेप्तुं मठात्प्रत्यूचतुस्तथा ॥८८॥ भिक्षुकपितरा
वूचतुः ॥ पुत्रोऽयं नाविति ज्ञातं तज्जन्मान्धत्वमेव च । निश्चितं ननु तद्दृष्टिर्भूता साक्षा ७५
त्किलावयोः ॥८९॥ तदुपायं न जानीवो न वा तत्कारिणं स तु । युवा प्राप्तवया वक्तुं क्षमः
प्रष्टव्य एव सः ॥९०॥ गुरूरुवाच ॥ इत्युक्तं भीतयोः श्रुत्वा तयोर्भूयः समाहृयन् । फरीशाः
प्राप्तदृष्टिं तमिदं चाभ्यब्रुवंस्तदा ॥९१॥ फरीशा ऊचुः ॥ ईश्वरः केवलः स्तव्यस्त्वया दृष्ट्या
प्तिहेतुतः । नरोऽसौ पापकारीति ज्ञातमस्माभिरेव तु ॥९२॥ भिक्षुक उवाच ॥ किमसौ

पापकारी स्यान्नवेत्यज्ञोऽस्मि खल्वहं । अन्धो भूत्वा तु पश्यामीदानीमित्येव वेद्म्यहं ॥१३॥
फरीशा ऊचुः ॥ किं चकार त्वसौ तुभ्यं नरो भिक्षुक निश्चितं । तव वा नेत्रयोस्तेन कथं दृष्टिः
समर्पिता ॥१४॥ भिक्षुक उवाच ॥ पूर्वं तद्वदं युष्मान् नतु शुश्रुव मे वचः । भूयः शुश्रू
षवः किं स्थ तच्छिष्योभवनेच्छया ॥१५॥ फरीशा ऊचुः ॥ त्वमेवामुष्य निर्लज्ज मूढ शिष्यो बभू
विथ । मोसिमात्रस्य शिष्यास्तु तच्छास्त्रालम्बिनो वयं ॥१६॥ मोसिमीशोऽभ्युवाचेति जानीमो ७६
निश्चयाद्वयं । किंत्वसौ कुत आयातोऽस्माभिर्न ज्ञायतेऽपि तत् ॥१७॥ भिक्षुक उवाच ॥
मच्चक्षुर्दायको योऽस्ति स युष्माभिर्न बुध्यते । भुवने कुत आयात इत्याश्चर्य्यवचः स्थितं ॥१८॥
पापिनां न शृणोतीशोऽर्थिनां किंतु तदर्च्चिनः । तदिच्छापालकस्यापि जनस्यैव शृणोति सः ॥
१९॥ इति विद्मो ध्रुवं किंतु जन्मान्धायापि केनचित् । दृष्टिर्दत्तेति न क्वापि श्रुतमाऽऽग

दुङ्गवात् ॥१००॥ ईश्वरेण स चेन्नुन्नो न स्यान्मद्दृष्टिदायकः । तदा नाचरितुं किंचिच्छक्
यात्स ह्यसंशयं ॥१०१॥ फरीष्या ऊचुः ॥ पापैर्जल्पाक सम्यक् त्वं याप्तो जनिमवापिथ ।
ततस्त्वं कथमस्मान् रे समुपादेष्टुमर्हसि ॥१०२॥ गुरुरुवाच ॥ इत्युक्त्वा प्राप्तदृष्टिं तं दम्भक्रोधा
न्विता नराः । वहिश्चक्रुर्मठात्सम्यग् येषूविश्वासकारणात् ॥१०३॥ तत्क्रियां तु प्रभुः श्रुत्वा
नरं वर्त्मन्यवाप्तवान् । अभ्युवाच किमीशस्य पुत्रं विश्वसिषि ध्रुवं ॥१०४॥ इति पृष्टः ७७
पुरान्धो यो॰भवत्स प्रत्यवोचत । मद्विश्वास्यः प्रभो कः स इत्युक्तो॰थाब्रवीत्प्रभुः ॥१०५॥ त्व
दृष्टः स तथा सार्द्धं त्वया वदति यो॰स्ति सः । अथासौ प्रणतो॰वादीत्प्रभो विश्वसिमीत्यतः ॥
१०६॥ श्रीयेषूरुवाच ॥ अदृशां दृष्टये नूनमन्धीभूत्यै च दर्शिनां । विचारार्थं किलैतस्मिन्
भुवने॰हं समागतः ॥१०७॥ गुरुरुवाच ॥ प्रभूक्तमिदमाकर्ण्य फरीष्याः के॰प्युपस्थिताः ।

तत्र प्रोचुः किमन्धाः स्मस्तथा त्वद्गोचरे वयं ॥१०८॥ श्रीयेषूरुवाच ॥ यद्यन्धाः स्यात
यूयं वै तदा स्यातानघा अपि । किंतु पश्याम इत्युक्तेऽधुना युष्मदघं स्थितं ॥१०९॥ सत्यं
तु वो वच्म्यधुनाहमेतद् द्वारैव शालां न विशेदवीनां । किंत्वन्यमार्गेण य एव तत्रारो
हेत्स चोरोऽस्त्यपि तस्करश्च ॥११०॥ द्वारा तु यस्तत्र विशेन्नरो वै सत्योऽत एवास्ति स मेष
पालः । सोऽन्तश्च दौवारिकवेशितोऽवीन् स्वान् वक्ति नाम्ना नयते वहिश्च ॥१११॥ तथा ७b
निजावींस्तु नयन्पुरस्ताच्चलंश्च तैः सोऽनुसृतोऽप्यशङ्कं । तच्छब्दविज्ञैर्ह्यपरं तु ते नान्वियुर्वि
रज्ञा हि ततो द्रवेयुः ॥११२॥ गुरुरुवाच ॥ इत्युक्तं प्रभुणा श्रुत्वा फरोष्या नावजग्मिरे ।
तस्यार्थमत एवैतत्तान्पुनः सोऽब्रवीद्वचः ॥११३॥ श्रीयेषूरुवाच ॥ सत्यं तु वो वच्म्यहमेव सत्यं
द्वारं भवामीह सदा ह्यवीनां । ये मत्पुरासन्नखिलास्तु चोरास्ते संश्रुता नत्वविभिः कदा

चित् ॥११४॥ द्वारस्म्यवीनां हि तया च यो यः प्रवेष्टुमिच्छेद्विशालमध्ये । तदा स भुक्तिं
किल सुप्रवेशं सुनिर्गतिं चाप्स्यति भोजनं च ॥११५॥ तांश्चोरितुं त्वेव विनिग्रहीतुं हन्तुं च
चोरः समुपैति धूर्तः । अहं तु तज्जीवनलब्धयेऽस्मि तद्वर्द्धनार्थे च समागतोऽत्र ॥११६॥
सत्पालको योऽविकृते प्रदद्यात् स्वजीवनं सोऽस्म्यहमेव भद्रः । यो नाविपालो भृतकस्तु वै
स्याद् वृकं स दृष्ट्वा विजहाति मेषान् ॥११७॥ अतो वृकेणावय आहता वै विच्छिन्नभिन्नाश्च ७९
भवन्ति भूमौ । भृतो यतो वेतनमात्रचेता न मेषपालस्तु पलायितोऽस्ति ॥११८॥ सत्पाल
कोऽहं निजमेषबोद्धा तथैव सम्यङ् निजमेषबुद्धः । ज्ञाये हि पित्रा पितरं तथाहं वेद्म्यात्मजीवां
निदधाम्यविभ्यः ॥११९॥ अन्ये तु मे सन्त्यवयो य एतच्छालान्तरे न स्थितिमाप्नुवन्तः ।
तेऽप्यत्र नेयाः शृणुयुर्गिरं मे स्यादेकवृन्दं च तथैकपालः ॥१२०॥ अहं स्वजीवां निदधामि नूनं

तस्याः पुनर्लब्धय एव पश्चात् । नान्यैर्हृता सा निहिता स्वयं तु तस्मात्पिता प्रीणयति ध्रुवं मां ॥१२१॥ स्वयं स्वजीवां ह्यधुना निधातुं पुनश्च तां लब्धुमपि क्षमोऽस्मि । निजाज्ञयाहं पितुरेव पूर्वमवाप्नवं प्रेरयितुः समाज्ञां ॥१२२॥ गुरुरुवाच ॥ इत्युक्तान्मतभेदोऽभूत् केऽप्यूचुर्हि यहूदिनः । भूतग्रस्तस्तथोन्मत्तोऽस्त्ययं शृणुथ तत्कुतः ॥१२३॥ इत्युक्तास्त्वब्रुवन्नन्ये भूतग्रस्त वचो नहि । इदं दृष्टिं कथं भूतोऽन्धेभ्यो दातुं क्षमो भवेत् ॥१२४॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्वणि (मोसिपंचशास्त्रस्य योन्यनुवाक्यस्कन्धाभ्यां योहन्नेरष्टमनवमदशम सर्गेभ्यश्चोद्धृतो) जगत्प्रकाशो नाम नवमोऽध्यायः ॥

शिष्य उवाच ॥ अवतीर्णः प्रकाशः स सत्पालकवचस्तथा । प्रोच्य यैरूषलेमीयान् किं चकार परे गुरो ॥१॥ गुरुरुवाच ॥ तथा कस्मिन्नपि स्थाने गालील्ये स उपादिशत् ।

यूहान् पूर्वसमैर्वाक्यैरेकशो वै महागुरुः ॥२॥ श्रीयेषूरुवाच ॥ नेत्रं ते देहदीपोऽस्ति तस्मिं
श्वाच्छे स्थितेऽखिलं । द्युतिपूर्णं वपुस्तस्मिन्मलिने तु तमःप्लुतं ॥३॥ तस्मादन्तःस्थितो यस्ते
दीपोऽस्त्येकः स एव न । तमोरूपो भवेदित्थं सावधानस्त्वमेध्यतः ॥४॥ तव देहेऽथ को
ऽप्यंशो यदि न स्यात्तमोऽन्वितः । तदा दीपोज्ज्वलेनेव सम्यग्द्युत्यावृतो भवेः ॥५॥ गुरु
रुवाच ॥ इत्येवोपदिशन् येषूः फरीष्यस्य निमन्त्रणं । भोजनाय प्रतिश्रुत्य ततस्तस्यावि ८१
शद्गृहं ॥६॥ भक्ष्यलब्ध्यै समासीनमस्नातं तु समीक्ष्य तं । विस्मितोऽतो गृहस्वामी प्रभुणा
समभाष्यत ॥७॥ श्रीयेषूरुवाच ॥ वाह्यं पानान्नपात्राणां फरीष्या मृष्ठ यत्नतः । किंतु वो
ऽभ्यन्तरं सम्यग् लोभादिमलपूरितं ॥८॥ यो वाह्यमङ्गा रचयांचकार सोऽभ्यन्तरं किं न
तथा ससर्ज । दानं तु यूयं कुरुत स्वरिक्थात्तदा पवित्रं सकलं भवेद्वः ॥९॥ गुरुरुवाच

इदं निन्दावचः श्रुत्वा कोऽपि तत्र निमन्त्रितः। धर्म्मशास्त्री तदावादीत् प्रभुवाक्यासहिष्णु
हन् ॥१०॥ धर्म्मशास्त्र्युवाच ॥ एतैर्वाक्यैस्त्वमाचार्य्य फरीष्यान्नहि केवलं। गर्हसे किंतु
नः सर्व्वान्नियमाद्युपदेशिनः ॥११॥ श्रीयेषूरुवाच ॥ गर्हणीया मया यूयं तथा रे धर्म्मशास्त्रि
णः। शिष्यवर्गं हि दुःसाध्यभारान् वाहयथाधिकान् ॥१२॥ इयतः कार्य्यभारांस्तु
तदाज्ञादायकाः स्फुटं। अङ्गुल्यग्रैरपि स्वीयैर्यूयं न स्पृशथ कुचित् ॥१३॥ गुरूरुवाच ॥ ६४
इदं गर्हणमापन्नाः शास्त्रिणः सफरीष्यकाः। विविधप्रश्नसंघैस्तमपिपीडयिषंस्तदा ॥१४॥
तन्मुखाच्चोत्तराण्येवापेक्षमाणा निरन्तरं। तथा तदभिशापस्य निदानं विविचेष्टिरे ॥१५॥
तादृश्या हिंसया त्वेषां सर्व्ववित् सोऽपराजितः। परे गेहात्फरीशस्य निर्गतः सात्मशिष्यकः ॥
१६॥ ततोऽतिवृहति व्यूहेऽन्योन्यं संमर्द्दयत्यपि। तं प्रत्येव समायाते स्वशिष्यान् स तदा

ब्रवीत् ॥१७॥ श्रीयेषूरुवाच ॥ धर्म्मच्छद्म फरीशाणां यो ऽस्ति स्फीतिकरो रसः । तस्माद्वै प्रथमं यूयं सावधानाः स्त हे हिताः ॥१८॥ छन्नं ह्यस्त्यधुना यद्यत्तत्परे स्यात्प्रकाशितं । गुप्यते चाधुना यद्यत्सर्व्वैस्तज्ज्ञास्यते परे ॥१९॥ गुरुरुवाच ॥ तदा को ऽप्यब्रवीद्व्यूहमध्ये मद्भ्रातरं गुरो । आज्ञापय मया सार्द्धं विभक्तुं पैतृकं धनं ॥२०॥ इत्यर्थितो ऽब्रवीद्येषूर्नर मां को ऽत्र दर्शने । विभागादेशने वापि युष्माकं हि न्ययोजयत् ॥२१॥ इत्युक्त्वाधिकदायेच्छुममुं काम ८३
हरः प्रभुः । ततः सर्व्वानपि व्यूहांस्तत्स्थितानिदमब्रवीत् ॥२२॥ श्रीयेषूरुवाच ॥ धनलोभादतो यूयं सावधानाः स्त यत्नतः । नहि द्रव्याधिकत्वेन कस्यचिज्जीवनस्थितिः ॥२३॥ कथां मे शृणुत क्षेत्रं कस्यापि धनिनः क्वचित् । बहु शस्यं ददौ सो ऽथ चिन्तयामास तुष्टहृत् ॥२४॥ किं करिष्याम्यहं स्वीयबहुशस्यार्पणाय ह । इयत्स्थानं न मे ह्यस्तीति संचिन्त्य परे

वदन् ॥२५॥ इदं कार्य्यं मया भङ्क्त्वा कुशूलानधुना स्थितान् । निर्मेया नूतनाः श्रेष्ठाः
सर्वद्रव्यधृतिक्षमाः ॥२६॥ स्वं जीवं च तदा वक्ष्ये संचिता प्रचुराधुना । तवैव प्रिय संपत्ति
र्बहुवत्सरभुक्तये ॥२७॥ इतो विश्राम्य खाद त्वं पिव क्रीडस्व सन्ततं । इति संचिन्तयन्तं
तु मर्त्यमीशस्तमब्रवीत् ॥२८॥ अद्य निश्यपि ते जीवो याचितव्योऽज्ञ निश्चितं । ततस्त्वत्सं
चिता सम्पदेषा कस्य भविष्यति ॥२९॥ इत्युक्तनरतुल्योऽस्ति स वै यो यः स्वभुक्तये । संचि ८४
नोति धनं किंतु नास्तीशविषये धनी ॥३०॥ गुरुरुवाच ॥ तथा स सकलान् शूहान् प्रोच्य
लोभविगर्हणं । आत्मविश्वासिनां वर्गं तत्परेभ्यब्रवीदिदं ॥३१॥ श्रीयेषूरुवाच ॥ मा
भैषीः क्षुद्र वृन्द त्वं यतो युष्मत्पिता महान् । स्वेच्छया परमं राज्यं युष्मभ्यं संप्रदास्यति ॥
३२॥ स्वान्यशेषाणि विक्रीय दानं दत्त तथाप्नुत । रौप्याधाराण्यजीर्णानि स्वर्गे च निधि

भयर्यं ॥३३॥ तत्र चोरो हि नायाति न कीटो वाग्नि यत्र च । तिष्ठेद्युष्मन्निधिस्तत्र भवेद्वो

हृदयं तथा ॥३४॥ निबद्धकटयो यूयं ज्वलद्दीपाश्च तिष्ठत । भृत्या इव विवाहाद् यैरायास्यन्

स्वाम्यपेक्ष्यते ॥३५॥ ततस्तेनाहते द्वारे सद्यस्तं वेशयन्ति ते । प्रहरे स्याद्द्वितीयेऽपि तृतीये

वा तदागतिः ॥३६॥ मङ्गला ये तथा प्राप्ता अनिद्राः स्वामिना स हि । तान्निबद्धकटीभूतः

समासीनान् प्रसेविता ॥३७॥ इति वो वच्म्यहं सत्यं भवनस्वामिना तु चेत् । आयास्यति ८५

कदा चोर इत्यज्ञास्यत निश्चितं ॥३८॥ जागरित्वा तदा गेहं स नाहास्यत्कदाचन । न

चोरैर्वापि तद्भित्तिर्भेदनीयाभवत्क्वचित् ॥३९॥ प्रस्तुतास्तु तथा यूयं तिष्ठेत यत एव हि ।

नरपुत्रः कदागामीति विज्ञातुं न शक्नुथ ॥४०॥ गुरुरुवाच ॥ इत्युक्ते प्रस्तरोऽवादीत्प्रभो

ऽस्मान् किं विशेषतः । एतदादिशसि त्वं नु किं वा सर्वजनांस्तथा ॥४१॥ श्रीयेषूरुवाच ॥

यं स्वे विशिष्टं परिवारवर्गे प्रत्येकयोग्यान्नविभागदत्यै । स्वामी करिष्यत्यधिपं स कोऽस्ति
न्यस्यप्रतीतिः किल बुद्धिमांश्च ॥४२॥ तथा स्ववर्गे हितकालभक्ष्यं यं स्वाम्युपायन् विभजन्त
माप्ता । स एव धन्यः प्रभुणा च तस्मात् सर्वाधिकारेऽपि नियोजनीयः ॥४३॥ स चिन्त
येत्वेतु विलम्ब्यतेऽत्रागन्तुं गृहे वै प्रभुणा ममेति । अतोऽपि भृत्यान्भृतिकांश्च हन्यात् खादेत्पि
वेत्त्वामदमेव चेतसः ॥४४॥ तदैव तस्य प्रभुरेत्य गेहं स्वीयं हठादत्यनपेक्षितेऽह्नि । क्षणे ८६
ऽप्रतीष्टे च तमाशु भिन्देद्द्विधाप्रतीतैर्विभजेच्च सार्द्धं ॥४५॥ आत्मप्रभोस्तु प्रविदन् य इच्छां
न प्रस्तुतोऽभून्न च तामकार्षीत् । बह्वाहतः स्यात्स वरं तदज्ञो यो दण्ड्यकर्त्ताल्पमथाहतः सः ॥
४६॥ यस्मै हि भृत्याय बहु प्रदत्तं तथैव तस्माद्बहु याचनीयं । यस्मिंश्च केचिन्निदधुर्भृशं वै
प्रतीक्षितारो भृशमेव तस्मात् ॥४७॥ भूमावग्निमहं नूनं सन्निक्षेप्तुं समागतः । ज्वलितो

ऽप्यधुना भूयात्स इतीच्छाम्यहं कथं ॥४८॥ स्नानरूपेण संस्कार्य्यः संस्कारेणाचिरादहं। याव द्देष न पूर्णः स्यात्तावत्पीड्ये कियद्दृढं ॥४९॥ भुव्यहं सन्धिमाधातुमागतोऽस्मीति वित्थ किं। नेति वो वच्म्यहं किंतु तत्राधास्यामि भिन्नतां ॥५०॥ एकस्मिन् हि गृहे पंच विभिन्नाः स्युः परस्परं। विरुन्धीरंस्त्रयो द्वाभ्यां सह द्वावपि च त्रिभिः ॥५१॥ पिता पुत्रेण पुत्रश्च पित्रा मातापि कन्यया। कन्या मात्रा वधूः श्वश्वा श्वश्रूर्वध्वा विरोधकृत् ॥५२॥ इति श्रीखृष्ट संगीतायां सत्पालकचरित्रपर्व्वणि (लूकस्यैकादशद्वादशसर्गाभ्यामुद्धृतो) लोभादिविरोधनं नाम दशमोऽध्यायः॥

गुरुरुवाच॥ इत्थं शिष्यान् विशिष्टान्स समुच्य प्रस्तरादिकान्। आत्मीयागमनार्थाय सुप्र स्तुत्युपदेशनं ॥१॥ स्वागतेः प्रागपि प्रोच्य यद्भवं भूमिमण्डले। प्रत्येतृभिः सहाप्रत्येतृणां

घोरविरोधनं ॥२॥ ततः कृत्स्नानपि यूहांस्तत्रीमागतिलक्ष्मणां । अविवेचिन एवेमं प्र
स्तुत्यादेशमब्रवीत् ॥३॥ श्रोयेषूरुवाच ॥ पश्चाद्दिशि यदा मेघमुदयन्तं प्रपश्यथ । तदा
ब्रूथ भवेद्वृष्टिरित्यथैषा भवत्यपि ॥४॥ यदा दक्षिणवायुं च वान्तं संपश्यथ ध्रुवं । तदा ब्रूथ
भवेद्ग्रीष्म इत्येवं स भवत्यपि ॥५॥ अन्तरीक्षभुवोर्लक्ष्माण्यनुमातुं ध्रुवं क्षमाः । यूयं कथमिमं
कालं विवेक्तुं नैव शक्नुथ ॥६॥ किं स्वयं चापि यूयं रे यथार्थं सुविविङ्क्थ न । अतः स्वीया
रिभिः सार्द्धं सन्धिं कुरुत यत्नतः ॥७॥ यद्येतत्समये नैष कार्य्यः कारान्तरे तदा । बन्धनी
याः स्थ हिंसाया दण्डार्थं ह्यक्षदर्शिना ॥८॥ गुरुरुवाच ॥ मनसामाशुशुश्रथमेतत् प्रवदति प्र
भौ । ईशपुत्रे ऽखिलाज्ञातद्वितीयागत्यनेहसि ॥९॥ तं प्रत्युपस्थिताः केचित्पीलाताचरितं बधं ।
गालील्यानामनेकेषां कथयामासुरद्भुतं ॥१०॥ रोम्यो ऽसौ हि तिबर्य्येण सम्राजा क्रूरमानसः ।

स्थापितो योऽभवद् भूपः ससामार्य्ययहूदिनां ॥११॥ स गालील्यान् हि तान्स्वीयप्रदेशादागतान्
पुरे । यिरूषलेमके तत्र कलहं चापि कुर्वतः ॥१२॥ हठादाक्रम्य शस्त्रास्त्रैः प्रवृत्तान् यज्ञकर्म्म
सु । तन्मेध्यमानपश्वस्रैस्तद्रक्तान्यप्यमिश्रयत् ॥१३॥ तद्गालील्यक्रतुध्वंसकथामाकर्ण्य भैरवीं।
तस्याः कथयितॄन् वाक्यमेतत्प्रत्यवदत्तदा ॥१४॥ श्रीयेषूरुवाच ॥ गालील्येष्वखिलेष्वासन्
पापकारितमा अमी । इयदापत्प्रपत्यर्थमिति मन्यध्व एव किं ॥१५॥ नेति युष्मानहं ८९
वच्मि किंतु यद्यद्धसां कृते । यूयं नानुतपेतैवं नङ्क्ष्यथाप्यखिलास्तदा ॥१६॥ येऽप्यष्टादशास
स्याश्च सिलोहसरसोऽन्तिके । चूर्णिता अभवन्सम्यक् पतनादुच्चसद्मनः ॥१७॥ त एवेत्थं हता
मर्त्याः पापकारितमाः स्थिताः । सर्व्वैर्यिरूषलेमीयेष्विति किं ह्यनुभूयते ॥१८॥ नेति वो
वच्म्यहं किंतु यूयं चेदङ्घसां कृते । अनुतापं न कुर्य्यात नङ्क्ष्यथैवं तदाखिलाः ॥१९॥ गुरुः

वाच ॥ तथा सौम्यासिभिः कार्य्यं प्रोच्य सोऽननुतापिनां । सम्यङ्नाशं यदूद्यानां पश्चात् सपुरसद्मनां ॥२०॥ ततस्तदनुतापस्य हितकाले समाप्तये । एतद्दृष्टान्तवचनं तान् समभ्यवदत् प्रभुः ॥२१॥ श्रीयेषूरुवाच ॥ उडुम्बरतरुर्द्राक्षोद्याने कस्यापि संस्थितः । तत्रान्विच्छन्फलं स्वामी न प्राप्नोदथ सोऽब्रवीत् ॥२२॥ उद्यानाध्यक्ष वृक्षेऽस्मिन्नहो संवत्सरत्रयं । फलमेवाहमन्वैच्छं नाप्नवं तु कदाचन ॥२३॥ अतस्तं छिन्धि भूमिं सोऽवरुणद्धि हि किंकृते । इत्युक्तः स्वामिनोद्यानाध्यक्षः प्रत्यवदत्तदा ॥२४॥ एनमप्यधिकं वर्षमनुमन्यस्व तत्स्थितिं । स्वामिन् यावदहं तस्य खनेयं परितः श्रमात् ॥२५॥ गोमयादि च तत्स्थाने निदध्यां स ततो यदि । फलं दद्यात्तदा भद्रं न चेत् तं छेत्स्यसि ध्रुवं ॥२६॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्वणि (लूकस्य द्वादशत्रयोदशसर्गाभ्यामुद्धृतो) नाशनिवारणहितसमयादेशो नामैकादशोऽध्यायः ॥

गुरुरुवाच ॥ उपदेष्टा महान्पूर्षु गालील्यासु परिभ्रमन् । तत्रैकस्मिन् शनेर्घस्त्रे विवेशैक
मठान्तरं ॥१॥ तद्दृष्टा तत्र भूतेनार्त्ता स्त्री दौर्बल्यकारिणा । याष्टादशसमाः कुब्जा सम्य
गुत्थातुमक्षमा ॥२॥ मोक्त्राभ्यैरत सद्यः सा मुक्ता त्वं स्वामयादिति । करस्पृष्टार्जवं चातः
प्राप तुष्टाव चेश्वरं ॥३॥ तद्दृष्ट्वा तु मठाध्यक्षः शनिविश्रामलङ्घनात् । कुपितः सकलं व्यूहमतो
ऽवादोन्मठस्थितं ॥४॥ मठाध्यक्ष उवाच ॥ ईशाज्ञयाहानि षडेव सन्ति प्रवृत्तये सर्व्वहितक्रिया ९१
णां । तेष्वेव सुस्थीभवितुं गदार्त्तैर्युष्माभिरेत्यं न तु विश्रमाहे ॥५॥ गुरुरुवाच ॥ निषेधमिममा
कर्ण्य वाह्यधर्म्मोपदेशिनः । अमुष्मान्मोचको विज्ञ इदं प्रत्यब्रवीद्वचः ॥६॥ श्रीयेषूरुवाच ॥ धर्म्म
लिङ्गिन्न किं विश्रामाहे वोऽप्यखिलो नरः । बन्धनाद् गां खरं वा स्वं मुक्त्वा पाययितुं नयेत् ॥
७॥ इमां त्वब्रहपुत्रीं वै बद्धामप्यभिशापिना । अष्टादशसमा मोक्तुं विश्रामाहेऽर्हते न किं ॥

८॥ गुरुरुवाच ॥ इत्युक्त्वापत्रपाथाप्ता भूता येषूविरोधिनः । सर्व्वस्त्वानन्दत यूहो नानात
च्छुभकर्म्मतः ॥९॥ तथा विश्वासवीजानि तत्पुरान्तः समर्प्य सः । अन्यपुर्ग्राममध्ये ऽपीश
राज्योक्तोरुपादिशत् ॥१०॥ यरूशाभिमुखे मार्गे चलन् पृष्टः स केनचित् । किं मोक्तव्यगणो
ऽल्पो ऽस्ति प्रभो इत्यथ सो ऽब्रवीत् ॥११॥ श्रीयेषूरुवाच ॥ प्रवेष्टुं संकटे द्वारे यूयमेव सु
यत्नतः । चेष्टध्वं बहवो ह्येतदिच्छवो ऽपि न शक्नुयुः ॥१२॥ उत्थितो हि गृहस्वामी यदा ०२
द्वारं बबन्ध वै । तदा यूयं तदाहत्य ब्रूयातोच्चैर्वहिःस्थिताः ॥१३॥ स्वामिन् स्वामिन् गृहे
ऽस्मांस्त्वं वेशयानुग्रहादिति । युष्मांस्त्वभ्यन्तरस्थः स वदेत् सम्यङ् न वेद्मि वः ॥१४॥ इति
प्रत्युदिता यूयं ब्रूयात भवदन्तिके । आघ्रापिवाम च त्वं वास्मत्प्रतोलीष्ववशिक्षयः ॥१५॥ इत्थं
श्रुत्वापि स ब्रूयाद् युष्मद्वासं न वेद्म्यहं । मत्तो दूरमपेतैव विधर्म्माचारिणो ऽखिलाः ॥१६॥ तर्हि

स्यात् क्रन्दनं घोरं दन्ताघातस्वनश्च वः । ईशराज्यान्निरस्तानां तदन्तःस्थांश्च पश्यतां ॥१७॥
अब्रहेमहकौ भद्रौ याकोबं चैव तादृशं । तैस्त्रिभिः सह मोस्यादीन् सर्व्वांश्चेशप्रवाचिनः ॥१८॥
भूयसोऽन्यांस्तथा ये ये प्रतीच्याः प्राग्दिशोऽपि च । उदीच्या दक्षिणस्याश्चैत्यासीरन् राज्य
ईश्वरे ॥१९॥ अहो केचिदिदानीं ये पश्चिमास्ते स्युरादिमाः । आदिमा अधुना ये च सन्ति
स्युस्तेऽपि पश्चिमाः ॥२०॥ गुरुरुवाच ॥ इत्युक्तवन्तमभ्येत्य प्रभुं केचित्फरीषकाः । गालील्या ९३
इदमभ्यूचुर्भयकृत्यै वचस्तदा ॥२१॥ फरीषा ऊचुः ॥ प्रदेशाद्गुतमस्मात्त्वं वहिर्याह्यन्यनीवृतं ।
हैरद्यो ह्यन्तिपा भूपोऽस्मदीयस्त्वां जिघांसति ॥२२॥ गुरुरुवाच ॥ श्रुत्वेत्थं तान् प्रभुर्नुन्नान् भू
भुजा वेद बिभ्यता । स्वयं हन्तुं यहूद्यैस्तु कार्य्यमन्विच्छतैव तत् ॥२३॥ अतः सोऽखिलभवज्ञो
न वा हैरोद्यकाद्दलात् । न वा पैलातकात्त्रस्यन्निदं धूर्त्तानुवाच तान् ॥२४॥ श्रीयेषूरुवाच ॥ गं

त्वा यूयमिदं फेरं तं ज्ञापयत वञ्चकं। हेरोदितनयं वाक्यं तत्प्रदेशस्थितस्य मे ॥२५॥ अत्राद्य
च श्वश्च विनिःक्षिपामि भूतानहं नृन्प्रतिकुर्व एवं। अहो परश्वस्तु समाप्य सर्वं चरित्रमेत
द्भवितास्मि सिद्धः ॥२६॥ किंत्वद्य च श्वश्च परश्व एवं मयात्र कार्य्यं भ्रमणं विहिंसं। नेशप्र
वक्तुर्हि बधो वहिः स्याद्यन्तूस्थलात् क्वापि यिरूषलेमात् ॥२७॥ अहो विहेयोऽस्ति मयाल
यो वो न द्रक्ष्यथेतश्च गलीलका मां। यावन्न तर्ह्येव यिरूषलेमे कुर्य्यात मत्स्वागतिगानमैशं॥ ९४
२८॥ त्राहीश्वरास्मानथ सोऽस्तु धन्य आयाति नो यः परमेशनाम्ना। इत्युक्तिमीशात्मवृतस्य
राज्ञो जयात्मिकां मद्विषये वदेत ॥२९॥ शिष्य उवाच ॥ गलीलाभ्रमणं स्तोकं भया च श्वः
परेऽहनि। जयात्मिका चरित्रान्ते सिद्धिः कीदृगभूद्गुरो ॥३०॥ गुरुरुवाच ॥ मोक्तृमाहात्म्य
कथने सिद्धिः सा पारमार्थिकी। वक्तव्या ते परे शिष्य न बोद्धया हि सांप्रतं ॥३१॥ तस्या

रम्भेऽपि मद्वाच्या गीता या दाविदुक्तिभिः । दावित्पुत्रस्य खृष्टस्य स्वागतिः सा महापुरे ॥३२॥
तत्पूर्वं त्ववशिष्टं यच्चरित्रं सन्नृपस्य वै । अल्पमासीयमेवातोऽहस्त्रयोक्तोद्गितं तदा ॥३३॥
गलीलायां पिराये च यहूद्ये चापि नीवृति । तत्सर्वमधुना शिष्य कथयिष्याम्यनुक्रमात् ॥३४॥
इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्वणि (दाविदीयगीतानामष्टादशाधिकशततमाङ्कस्य
त्रयोदशसर्गाच्चोद्धृतो) गलीलान्तिमभ्रमणं नाम द्वादशोऽध्यायः ॥

गुरुरुवाच ॥ प्रधानेन फरीशेण गलीलास्थेन केनचित् । विश्रामदिवसे येषूर्भोजनाय
निमन्त्रितः ॥१॥ तद्गृहे तु गतं सर्वे तं निन्दाहेत्ववाप्तये । समैक्षन्त तदग्रे हि कोऽप्यतिष्ठज्जलो
दरी ॥२॥ अथ तज्ज्ञः प्रभुः प्रोचे फरीशान् शास्त्रिणोऽपि च ॥ किं विश्रामदिने योग्या
चिकित्सा रोगिणां न वा ॥३॥ इति पृष्टास्तु ते किंचिन्न प्रत्यूचुरथ प्रभुः । तं जलोदरिणं

स्पृष्ट्वा सुस्थं प्रास्थापयत्तदा ॥४॥ ततस्तानवदत् को वो गर्त्ते निपतितं हठात् । गर्द्दभं गामविं
वा स्वं शनौ नोत्थापयेद्द्रुतं ॥५॥ एतत्प्रश्नोत्तरं दातुं न क्षमास्तेऽथ सोऽखिलान् । दृष्ट्वा निम
न्त्रितान् श्रेष्ठपीठान्विचक्रून् समब्रवीत् ॥६॥ श्रीयेषूरुवाच ॥ त्वं विवाहोत्सवाय स्या यदै केन
निमन्त्रितः । श्रेष्ठपीठान्तरे तर्हि मा चेष्टस्व समासितुं ॥७॥ न चेत् त्वत्तो नरः श्रेयानागच्छेद्
युवयोस्त्वतः । निमन्त्रको गृहस्वामी त्वां वदेत्सर्व्वसम्मुखे ॥८॥ प्रधानाय स्थलं देयं त्वयैतस्मा ९६
इतीरितः । त्वं तदा लज्जितो भूत्वान्त्यस्थाने प्रचलिष्यसि ॥९॥ किंतु तत्र समाहूतोऽन्त्ये त्वं
ह्युपविश स्थले । अतो निमन्त्रकर्त्ता ते त्वामभ्येत्य वदेद्गृही ॥१०॥ हे प्रियोच्चतरस्थानमारोहे
ति त्वमीरितः । लप्स्यसे किल मर्य्यादां निमन्त्रितगणान्तिके ॥११॥ आत्मगौरवकारी हि
परैः क्षुद्रीकरिष्यते । आत्मक्षुद्रत्वकारी तु गुरूकार्य्यः परैस्तथा ॥१२॥ गुरुरुवाच ॥ एत

दृष्टान्तवाचा स उपादिश्य निमन्त्रितान् । तथान्यैर्वचनैरेव गृहस्वामिनमादिशत् ॥
१३॥ श्रीयेषूरुवाच ॥ त्वं महाभोजनं दद्याश्चेत्तदा मा निमन्त्रय । वयस्यभ्रातृबन्धून् स्वाना
ढ्यान् वा प्रतिवासिनः ॥१४॥ न चेत् त्वां ते तथा सर्वे स्वेष्वतो भोजनेष्वपि । निमन्त्रयें
युरत्यन्तं तव स्याच्चैहिकं फलं ॥१५॥ किंतु स्वयं यदा दद्यास्त्वं महाभोजनं तदा । दरि
द्रान् दुर्बलान् खञ्जानन्धांश्चापि निमन्त्रय ॥१६॥ धन्योऽतः स्या न किंचिद्धि प्रतिदातुं क्षमा ९७
अमी । भव्यं कर्म्मफलं ते तु पुनःसंजीवने सतां ॥१७॥ गुरूरुवाच ॥ इति श्रुत्वाब्रवी
त्कश्चिद्भोजिनां राज्य ऐश्वरे । भक्ष्यं योऽद्यात् स धन्योऽस्तीत्याकर्ण्योवाच तं प्रभुः ॥१८॥
श्रीयेषूरुवाच ॥ सुमहद्भोजनं कुर्वन् बहूंस्तत्र न्यमन्त्रयत् । नरः कोऽपि परे त्वस्य योग्यकाल
उपस्थिते ॥१९॥ तान्सर्वान् प्रति भृत्यं स्वमाह्वातुं प्रैरयत्तथा । अहो भोक्तुं समायात प्रस्तु

तान्यखिलानि हि ॥२०॥ इदं श्रुत्वापि सर्वे ते स्वस्य कल्पयितुं तदा । हेतूनगमनस्यैवारे
भिरे सकृदेकशः ॥२१॥ आद्योऽवादीन्मया क्षेत्रं क्रीतं तच्च समीक्षितुं । सम्यग्गन्तव्यमेवातः
कृपया त्वं क्षमस्व मां ॥२२॥ अन्योऽवादीत्तथाक्रीणां गवां पंचयुगान्यहं । तान्परीक्षितुमे
वैमि कृपयातः क्षमस्व मां ॥२३॥ उचेऽन्यः स्त्री मयोढातो न गन्तुं शक्यतेऽधुना । इत्थं
सर्वोत्तराणि स्वाद्भृत्यात् स्वाम्यशृणोत्ततः ॥२४॥ कुपित्वा चाब्रवीद्गच्छ पुर्य्यां रथ्याध्वसु १८
द्रुतं । निःस्वदुर्बलखञ्जान्धान् समाहूय च मद्गृहे ॥२५॥ इदं कृत्वाब्रवीद्भृत्यः स्वामिन्नाज्ञाप
यो यथा । तथा कृतमिदानीं तु स्थानमप्यवशिष्यते ॥२६॥ ततः स्वाम्यादिशद् वाह्याध्वसु
सीमासु च व्रज । मद्गेहपूर्तिपर्य्यन्तं नरांश्चाकृष्य वेशय ॥२७॥ पूर्वं निमन्त्रितानां हि कोऽप्य
मीषां नृणां ध्रुवं । मदीयाद्भोजनाद्द्रान्नास्वदिष्यति किंचन ॥२८॥ गुरुरुवाच ॥ इत्थमुक्त्वा

प्रभुर्वर्गमीशाह्वानावमानिनां । परीक्षाध्यापकादीनां शास्त्रं श्रुतवतां मुहुः ॥२९॥ परे नि
र्गत्य तद्गेहाद्रथ्यावर्त्मस्ववर्तिव्रजन् । अन्वितो बहुभिर्व्यूहैर्वचः प्रोवाच तान्प्रति ॥३०॥
श्रीयेषूरुवाच ॥ मामन्वेतुमना यः स्वं पितरं मातरं स्त्रियं । सन्ततिं सोदरान् भग्नीस्तथा स्वं
जीवमेव च ॥३१॥ न सम्यगवमन्येतात्यासक्तिविषये मम । स वै मे भवितुं शिष्यो न शक्नोति
कदाचन ॥३२॥ यश्च स्वशूलमुत्थाप्य नानुगच्छति मां ध्रुवं । सोऽपि मे भवितुं शिष्यो न शक्नोति ९९
कदाचन ॥३३॥ को ह्युच्चसद्म युष्मासु निर्म्मित्सुस्तद्धयं पुरा । समासीनः किलैकाकी न सं
ख्याति सुयत्नतः ॥३४॥ न चेत् तन्मूलमाधाय समाप्तुं त्वक्षमः परे । अवहस्येत सर्वैः स उच्च
भित्तिप्रदर्शिभिः ॥३५॥ ते हि ब्रूयुर्महाकर्म्म समारेभे पुमानसौ । स्वशक्त्यज्ञः समाप्तुं तु ना
शक्नोत्स्वधनैरिति ॥३६॥ को वा राजेतरेणापि राज्ञा योद्धुमधिक्रमन् । अयतद्वयसेनेवा

युतमात्रबलान्वितः ॥३७॥ न पुरैवं समासीनश्चिन्तयत्यतियत्नतः । चेच्छक्तः स्यान्न वा
स्वीयशत्रोर्वारयितुं बलं ॥३८॥ न चेद् दूतान् स राजानं दूरस्थमपि तं प्रति । प्रेरयेद्यत्नतः
सन्धेरुपायान् याचितुं द्रुतं ॥३९॥ तथा युष्मासु यः पूर्वं स्वचिन्ताभिर्न संत्यजेत् । सर्वद्रव्यं
स मे शिष्यो भवितुं न क्षमो ध्रुवं ॥४०॥ लवणं शुद्धमेवास्ति किंत्वेतदपि चेत्परे । विरसं
स्यात्तदा भूयः कथं स्वादु करिष्यते ॥४१॥ न क्षित्यै सफलं तत्स्यान्न वा गोमयराशये । वहिः १००
क्षिप्यं तु यस्य स्तः श्रुत्यै कर्णौ शृणोतु सः ॥४२॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्वणि
(लूकस्य चतुर्दशसर्गादुद्धृत) ईश्वराह्वानं नाम त्रयोदशोऽध्यायः ॥

गुरुरुवाच ॥ एतस्मिंस्तु गलीलायां चरमे भ्रमणे प्रभोः । करसंग्राहिणोऽनेके वाचः श्रोतुं
समागताः ॥१॥ तद्घृणायाः समूचुस्तु फरीष्याध्यापकास्तदा । पापिनोऽप्यनुगृह्णाति तैः

साद्धैं चात्यसौ ध्रुवं ॥२॥ इति तेषां वचः श्रुत्वा रौम्यभृत्यान् यहूदिकान् । सदावमन्यमानानां
स तदा प्रत्यवोचत ॥३॥ श्रीयेषूरुवाच ॥ शतमेषेश्वरः को वो मध्येऽपचिनुयाद्यदि । तदेकं
न तदन्विष्यै शेषांस्त्यजति कानने ॥४॥ यत्नात्तं चानुमृग्यैकं प्राप्नुयाच्चेत्तदा मुदा । स्कन्धो
परि समारुह्य नयति स्वनिकेतने ॥५॥ प्रतिवासिन आहूय तत्र बन्धूंश्च वक्ति सः । मया
त्यानन्दत सहापचितावि ह्यवाप्तवं ॥६॥ तथा नूनं परावृत्तैरनुतप्तैकपापिनः । उत्थितो यो १०१
भवेद्धर्षस्तावति स्वर्गमण्डले ॥७॥ सोऽनावश्यानुतापानामेकोनशतधर्म्मिणां । सुस्थितेरुत्थि
ताद्धर्षाच्छ्रेयान्स्यादिति वच्मि वः ॥८॥ दशानां कर्षपादानां क्षुद्रकोषस्य वेश्वरी । का
दैवात्तद्गणस्यैकं परेऽपचिनुयाद्यदि ॥९॥ न तदा दीपमुज्ज्वाल्य गृहं सम्मार्ज्य चाखिलं ।
तन्मात्रप्राप्तिपर्य्यन्तं यत्नतः परिचेष्टते ॥१०॥ आप्त्वा त्वाहूय सा वक्ति सखीः सम्प्रति

वासिनीः । मयानन्दत सार्द्धं मेऽपचितार्थाप्तिहेतुतः ॥११॥ तादृङ् नूनं परावृत्तेरनुतप्तैक
पापिनः । भवति स्वर्ग्यदूतानां हर्ष इत्येव वच्मि वः ॥१२॥ कथां मे शृणुत द्वौ स्तः पुंसः
पुत्रावथो तयोः । कनिष्ठः पैतृकद्रव्यांशं स्वं पितरमार्थयत् ॥१३॥ भागमाप्त्वाचिराद्दूरदेशे
प्रस्थाय तत्र सः । कामेनातिव्ययं कुर्व्वन् सर्व्वद्रव्यमपाचिनोत् ॥१४॥ दुर्भिक्षे तत्र जाते तु दीनो
भूत्वा स कस्यचित् । तद्देशवासिनो भृत्योऽभवद्वेतनलब्धये ॥१५॥ तेन नुन्नश्च तत्क्षेत्रे कोलानां १०२
पालनाय सः । अलब्धान्नोऽनुमत्यैच्छत्कोलखाद्यबुसान्यपि ॥१६॥ अतः सोऽचिन्तयद्गेहे
पितुर्मे भृतकाः कति । प्रचुरं भक्षयन्त्यन्नमहं तु क्षुधया म्रिये ॥१७॥ उत्थाय पितरं स्वीयं
गतो वक्ष्यामि हे पितः । पापकार्य्यस्मि ते साक्षात् स्वर्गस्य विषयेऽप्यहं ॥१८॥ तव पुत्रस्य
नामाहं धर्त्तुं नार्होऽस्मि सांप्रतं । अतो वैतनिकानां ते गणे मां दययार्पय ॥१९॥ इत्युक्त्वा

स इतः सद्यो ऽवलत्पैत्रालयं प्रति । तद्दूरस्थो ऽपि मार्गे तु पित्रा स समदृश्यत ॥२०॥ यः
पुत्रकरुणाविष्टो ऽभिद्रुत्यालिङ्ग्य चापि तं । गले धृत्वा सचुम्बं च ततो ऽभाषत सूनुना ॥२१॥ हे
पितः स्वर्गविषये साक्षात्ते चापि पापकृत् । अहं त्वत्पुत्रनामापि धर्तुं नार्हो ऽस्मि सांप्रतं ॥२२॥
इति श्रुत्वा पिताहूय स्वभृत्यानादिशद् वहिः । वस्त्रमानयत श्रेष्ठं साङ्गुलीयकपादुकं ॥२३॥
तत्सर्वं परिधाप्यैनं ततो वत्सं सुपोषितं । समानीय घ्नतास्माकं सहर्षायै हि भुक्तये ॥२४॥ यत १०३
एवैष पुत्रो मे मृतो भूत्वानुजीवति । स तथापवितो भूत्वा प्राप्तो भवति सांप्रतं ॥२५॥ इत्युक्ता
नुक्रमेणैवारेभिरे हृष्टभोजनं । ज्येष्ठपुत्रस्तु तत्काले क्षेत्रे वहिरवर्त्तत ॥२६॥ उपतिष्ठंस्तु
गेहे स वाद्यनृत्यरवश्रुतः । विस्मयं प्राप्य पप्रच्छैकं भृत्यमिदमस्ति किं ॥२७॥ स प्रत्यूचे
तव भ्राता पुनरेतस्ततः पिता । तं सुस्थं प्राप्य सन्तुष्ट आदिशद्वत्समारणं ॥२८॥ इत्थं

श्रुत्वा सरोषः स नैच्छद्वेष्टुं गृहान्तरे । अतोऽन्तस्तं समाह्वातुमायातस्तत्पिता वहिः ॥२९॥
ज्येष्ठोऽवादीत्तु कत्यब्दांस्त्वत्सेवाकार्यहं स्थितः । नापि लङ्घितवान् नूनं तवादेशं कदाचन
॥३०॥ तथापि सखिभिः स्वीयैः सह कर्तुं मुदोत्सवं । नैकं क्षुद्रमपिच्छागं त्वत्तः क्वचिद
वाप्नवं ॥३१॥ यदा तु तव पुत्रोऽयं वेश्यासंगेन ते धनं । वितीर्य्यायाति तस्मै तं वत्सं
हंसि सुपोषितं ॥३२॥ इत्यभ्युक्तः पितावादीद्धे पुत्र त्वं मया सह । सदा तिष्ठसि यद्य १०४
च्च विद्यते मे तवापि तत् ॥३३॥ मुदोत्सवाह्लादकृतिस्तु नोऽर्ह्या भ्राता त्वदीयो यत एष
नूनं । मृतोऽपि भूत्वा पुनराप जीवं भूत्वा तथैवापचितः स आप्तः ॥३४॥ इति श्रीखृष्ट
संगीतायां सत्पालकचरित्रपर्व्वणि (लूकस्य पंचदशसर्गादुद्धृतो) ऽपचितात्प्तिहर्षो नाम चतु
र्दशोऽध्यायः ॥

गुरुरुवाच ॥ एवं प्रोच्यानुतप्तेषु मोक्ता सर्वपितुर्दयां । स्वशिष्यान् नूत्नदृष्टान्तकथामेतां
समब्रवीत् ॥१॥ श्रीयेषूरुवाच ॥ आसीत्कस्यापि धनिनः कर्म्माध्यक्षोऽव्यवस्थितः । संप
द्वितरणात्सोऽतोऽभिशप्तः स्वामिनं प्रति ॥२॥ अथाहूयाब्रवीत्तं स शृणोमि किमिदं त्वयि ।
देह्यायव्ययसंख्यां स्वां स्यान्नेतोऽध्यक्षता हि ते ॥३॥ इत्याज्ञां प्राप्य सोऽध्यक्षोऽचिन्तयद्व्या
कुलात्मकः । करणीयमितः किं हा मया प्रच्युतकर्म्मणा ॥४॥ स्वामी मेऽध्यक्षताध्वंसी खनितुं १०५
त्वक्षमोऽस्म्यहं । वृत्त्यर्थं भिक्षितुं चैव न शक्नोम्यतिलज्जया ॥५॥ अहो मे स्थिरसंकल्पो
मनस्येतर्ह्युपस्थितः । ततोऽहं हतकर्म्मापि नृभिर्गृह्येय सद्मसु ॥६॥ इति संचिन्त्य सर्व्वान् सोऽधम
र्णानेकशः प्रभोः । समाहूयाद्यमप्राक्षीत् त्वं कियद्धारयस्यृणं ॥७॥ तेनोक्तो द्विशतद्रोणं तैलस्येति
तदाब्रवीत् । स्वसंख्यापत्रमादाय त्वमाश्वेकशतं लिख ॥८॥ इत्यादिश्य तथापृच्छद्द्वितीय

ऽधमर्णकं । त्वद्गृहीतमृणं नाथात्कियदित्यथ सो ऽब्रवीत् ॥९॥ शस्यगोणीसहस्रे द्वे इत्यु
क्तो ऽध्यक्ष आदिशत् । स्वसंख्यापत्र आशु त्वं द्विगुणाष्टशतं लिख ॥१०॥ एतत्तु छलमा
कर्ण्य स्वाध्यक्षस्याप्यधर्म्मिणः । स्वामी तं प्रशशंसैव महादक्षत्वहेतुतः ॥११॥ स्वजातेर्व्यवहारे
हि संसारतनयाः सदा । सत्प्रकाशात्मजेभ्यो वै क्रियादक्षतराः स्थिताः ॥१२॥ वच्मि वो ऽहं
तथाधर्म्म्यात्कौवेरिकधनात् सखीन् । लभध्वं यैर्हतप्राणा गृह्णीध्वं नित्यसद्मसु ॥१३॥ यः क्षुद्रे १०६
ऽर्थेऽस्ति विश्वास्यः स विश्वास्यो महत्यपि । क्षुद्रे यश्चास्त्यधर्म्म्यो ऽर्थे स महत्यप्यधर्म्मकः ॥
१४॥ अतो यूयमधर्म्म्येऽपि कौवेरिकधने न चेत् । विश्वास्याः स्यात युष्मासु सद्धनं को नि
धास्यति ॥१५॥ अविश्वास्याश्च चेद्यूयं स्यातान्यस्यापि वस्तुनि । तदा यत्सन्निजं प्राप्यं
तद्वः को वस्तु दास्यति ॥१६॥ न निजं यच्चसद्द्रव्यं तदध्यक्षाः स्थ खल्पतः । द्वयोर्नाचरितुं

सेवां शक्रुथेशकुवेरयोः ॥१७॥ गुरूरुवाच ॥ इदं सर्वं तु संश्रुत्य फरीषा धनलोभिनः ।
तस्मिन् हासमुपक्रान्तास्ततः सत्प्रभुणोदिताः ॥१८॥ श्रीयेषूरुवाच ॥ नृसाक्षादेव यूयं स्थ
स्वशुद्धीकारिणो ध्रुवं । हृदयानि तु युष्माकं जानात्येव महेश्वरः ॥१९॥ अपि चादरणीयं
यद्विद्यते नरगोचरे । समीपे परमेशस्य घृणितं खलु तद्भवेत् ॥२०॥ मोस्युक्तं शास्त्रमीशस्य
तथा चेशप्रवाचिनः । भूमौ स्नापकयोहन्नेः कालपर्य्यन्तसंस्थिताः ॥२१॥ तत्परे त्वीशराज्य १०७
स्य सुवार्त्ता भासते भुवि । धार्म्मिकाश्चाखिलास्तत्र प्रविशन्ति बलादपि ॥२२॥ मोसेस्तु
धर्म्मशास्त्रस्यैकविन्दोरपि लोपनात् । भवेच्छक्यतरो लोपो ह्यन्तरीक्षभुवोरपि ॥२३॥
यो यो विवर्जयेत्पत्नीं स्वां स व्यभिचरत्यतः । तथा व्यभिचरत्येवमुद्वहेद्यो विवर्जितां ॥२४॥
नर आसीद्धनी कश्चित् सूक्ष्मधूमलवस्त्रभृत् । स्वादुभोजनसारेण तृप्यमाणो दिने दिने ॥२५॥

तद्द्वारस्थश्च लाजारो नाम भिक्षुर्व्रणैर्वृतः । तदुच्छिष्टान्नभुक्तीच्छुः श्वभिर्लीढव्रणः सदा ॥२६॥
पश्चात्स्वमृत भिक्षुः सो ऽब्रहजानां सुखान्विते । सकलानां सतां स्थाने स्वर्गदूतैरनायि च ॥२७॥
असावपि धनी प्रेतो ऽर्पितो भूमौ च बन्धुभिः । पातालस्थस्तु दुःखैः स उग्रैः संपीडितो ऽभवत् ॥
२८॥ ऊर्द्ध्वचक्षुस्ततो भूत्वा सो ऽब्रहं दूरसंस्थितं । तत्क्रोडस्थं च लाजारं दृष्ट्वोच्चैरवदत्तदा ॥
२९॥ पितरब्रह कारुण्यादेतज्ज्वालार्द्दितस्य मे । जिह्वां सेक्तुं नु लाजारं जलार्द्राङ्गुलिना नुद ॥ १०८
३०॥ इत्थं प्रार्थितवान् स्मृत्वा स्वद्वारे पतितं पुरा । भिक्षुं सो ऽथाब्रहेणेदं सत्पित्रा प्रत्यभा
ष्यत ॥३१॥ पुत्र स्वानि शुभानि त्वमवाप्नोः पूर्वजीवने । अशुभानि तु तद्वाप्नोल्लाजार इति सं
स्मर ॥३२॥ इदानीं तु पुराक्लिष्टः शान्तिसौख्यं भुनक्त्यसौ । गतसर्वसुखस्त्वं तु व्यथया पीड्य
से तथा ॥३३॥ वरमप्यन्तरे ऽस्माकं युष्माकं च स्थितं महत् । कुहरं ह्यनतिक्राम्यं तन्नैकामै

रपि ध्रुवं ॥३४॥ अतो येऽत्र स्थिता गन्तुं शक्नुवन्ति न वोऽन्तिके । न च नोऽन्तिक आयातुं
युष्मत्पार्श्वस्थिताः क्षमाः ॥३५॥ इत्युक्तः स तदावादीदतो हे पितरब्रह । मत्पित्रालयमध्ये
त्वं लाजारं दयया नुद ॥३६॥ तेन मे भ्रातरः पंच भूस्थिताः सत्यसाक्षिणा । आदेष्टव्या
इदं पोडास्थानं नैतुं कदाचन ॥३७॥ इत्याकर्ण्याब्रहोऽवादीन्मोसिस्तेषां किलान्तिके । तथा
चेशप्रवक्तारः श्राव्यं तद्वच एव तैः ॥३८॥ इत्युक्तः सोऽब्रवीदार्त्तो नैवमब्रह चेन्वियात् । को १०९
ऽपि तान् प्रेतलोकात् तेऽनुतपेयुर्ध्रुवं तदा ॥३९॥ इत्थं श्रुत्वाब्रहोऽवादीन्मोसेर्यदि वचांसि ते ।
नचापीशप्रवक्तॄणां शृणुयुः स्तब्धमानसाः ॥४०॥ तदा यद्यपि तत्साक्षात् प्रेतलोकात्समुत्थितः ।
कोऽप्यागच्छेत्तथाप्येवं न मन्येरन्कदाचन ॥४१॥ गुरुरुवाच ॥ ईशराज्याविदां तद्वन्मोसिशास्त्रा
वमानिनां । संसारासक्तमनसां व्यभिचारादिकारिणां ॥४२॥ पाताले भावि दौर्भाग्यं प्रोच्य तान्

धनलोभिनः । फरीष्यान् प्रति गालील्यान् भ्रष्टैरोग्यसेविनः ॥४३॥ सर्व्वज्ञो मोक्षकः पश्चात्
स्वीयानामुपदिष्टये । शिष्याणां वच एतन्तान् पूर्व्ववत् समवोचत ॥४४॥ श्रीयेषूरुवाच ॥
धर्म्मपातनहेतूनामनिरोध्या किलागतिः । आनीयन्ते त्विमे येन भूमौ धिङ्नरमेव तं ॥४५॥
तस्यार्थे हि भवेच्छ्रेयः पेषणीप्रस्तरेण चेत् । ग्रीवायां सह बद्धः स प्रक्षिप्येतातलेऽर्णवे ॥४६॥ साव
धानास्तु यूयं स्त भ्राता त्वद्विषये यदि । पापी स्याद्गर्हि चेत्तु स्यात्सोऽनुतप्तः क्षमस्व तं ॥४७॥ सप्त ११०
धा सोऽपराध्यापि दिने चेत्सप्तधा वदेत् । अनुतप्तोऽहमित्येवं तथापि त्वं क्षमस्व तं ॥४८॥
गुरुरुवाच ॥ इदं श्रुत्वाब्रुवन् शिष्या विश्वासं नः प्रवर्द्धय । इति तैरर्थितो वाक्यमेतत्प्रत्य
वदत्प्रभुः ॥४९॥ अणुसर्षपतुल्योऽपि विश्वासो यदि वो भवेत् । ब्रह्मदारुं तदाप्येनं प्र
वक्तुं शक्नुयात वै ॥५०॥ उन्मूलो भव हे वृक्ष तिष्ठतश्चोदधाविति । अथ वाक्यानुसारेण

युष्माकं तन्नवेदपि ॥५१॥ कस्तु वो भृत्यमायातं क्षेत्रतो मेषपालकं । कर्षकं वा वदेत्सद्यो गत्वा विश्राम्य खल्विति ॥५२॥ न वा ब्रूयात्पुरा त्वं मे यत्नात् प्रस्तुत्य भोजनं । तत्र मां चापि सेवित्वा परे त्वं पिव खाद च ॥५३॥ इत्याज्ञानुक्रमाद्भृत्यं कृतवन्तं श्रमादपि । किं प्रशंसत्यतो नाथोऽनुगृहीत इव स्वयं ॥५४॥ नेत्थं मम वितर्कोऽस्ति तस्माद्यूयं मदीयकाः । शिष्याः सर्व्वं यथाज्ञाप्तं यदा यत्नादकुर्व्वत ॥५५॥ तदापि ब्रूत भृत्याः स्मो हे स्वामिन् निष्फला वयं । यत् ॥१॥ कर्त्तुं योग्यमस्माभिस्तन्मात्रं कृतमित्यलं ॥५६॥ इति श्रीख्रिष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (लूकस्य षोडशसप्तदशसर्गाभ्यामुद्धृतो विस्वस्तभृत्यसज्जनं नाम पंचदशोऽध्यायः ॥

गुरुरुवाच ॥ अन्तिमं स्वं समाप्यार्य्यो गलीलाभ्रमणं तदा । यिरूषलेमं हेमन्ते गन्तुमारभत प्रभुः ॥१॥ नीवृतोऽथैव सीमानं स गलीलासमार्य्ययोः । उपस्थाय तदा ग्रामे कस्मिंश्चित्

प्राविशत्सृतौ ॥२॥ तत्र तं दश कुष्ठार्त्ता अपवित्रत्वहेतुतः । यथाशास्त्रोदितं दूरे स्थिता अभि
ननर्द्दिरे ॥३॥ येषूःस्वामिन् दयस्वास्मानित्युक्तस्तैर्नरोघतः । वहिःक्षिप्तैर्दयालुः स दीनान्प्रत्य
ब्रवीदिदं ॥४॥ श्रीयेषूरुवाच । याजकानभियातेतो यूयं खल्वहरोणजान् । मलशुद्धिपरी
क्षायै यथादिष्टाः स्थ मोसिना ॥५॥ गुरुरुवाच ॥ इत्युक्ता यज्वनः स्वीयतनूर्दर्शयितुं गताः ।
कुष्ठिनो वर्त्मंमध्ये तु देहसौस्थ्यमवाप्नुवन् ॥६॥ अतस्तेष्वेक आत्मीयसौस्थ्यज्ञः पुनरागतः । ११२
उच्चैरीशस्तुतिं कृत्वा येषूपादतलेऽपतत् ॥७॥ तन्महानुग्रहार्थं च धन्यवादं चकार सः ।
सामार्य्योऽप्यथ मोक्तैतद्वचः स्पष्टमुदैर्य्यत ॥८॥ श्रीयेषूरुवाच ॥ किं न पूतीकृता आसन् दशा
तोऽन्ये नव क्व ते । किं न सर्व्वगणे केऽपीशं स्तोतुं पुनरागताः ॥९॥ अन्यदेशिन एतस्माद्विना
सद्गोत्रजा अपि । कुशले त्वं तु सामार्य्य याहि स्वश्रद्धयोद्धृतः ॥१०॥ तत्परे प्रचलन्मोक्ता

सत्पुरं प्रति कैरपि । फरीष्यैराज्यमैशं स्यात्कदेत्यापृष्ट आह तान् ॥११॥ श्रीयेषूरुवाच ॥ न
वै समालोचनयुक्तमैशमागामि राज्यं नच तर्हि वाच्यं । तत्तत्र पश्येति तदत्र वेति यतोऽन्तरे
वः किल राज्यमैशं ॥१२॥ आगामिन्यपि काले तु यूयं शिष्या मम ध्रुवं । नरपुत्रस्य घस्राणा
मेकमीक्षितुमिच्छवः ॥१३॥ न तथापि समीक्षेध्वं तदा चेत् पश्य तत्र वा । अत्र वेति नरा
ब्रूयुस्तान् यूयं मानुगच्छत ॥१४॥ यथा ह्येकदिशो विद्युद्विपरीतदिगन्तरे । आकाशे ११३
दीप्यते तद्वन्निजेऽह्नि नृसुतो भवेत् ॥१५॥ तत्पूर्वं तु बहुक्लेशाः सोढव्यास्तेन भूतले ।
प्राप्तव्यश्चावमानोऽपि गोत्रस्यैतस्य वर्गतः ॥१६॥ यथा काले हि नोहस्य तन्नावारोहणावधि ।
भुक्तिपानविवाहादिप्रवृत्तेष्वखिलेष्वपि ॥१७॥ भूमिवासिषु निःशङ्कं ततोऽकस्माज्जल
प्लवः । सर्वप्रलयकार्यायात् तथा स्वाहे नरात्मजः ॥१८॥ यथा लोटस्य काले वा सुदमपुर

चासिषु । तस्य निर्गतिपर्य्यन्तं भुञ्जानेष्वतिनिर्भयं ॥१९॥ विक्रीणत्सु तथा क्रीणत्स्वालयान्
रचयत्सु च । वपत्सु चापतद्गन्धाश्माग्निवर्षोऽखिलान्तकः ॥२०॥ अन्तरीक्षात्तथा सम्यगा
त्मीयदिवसे हठात् । दुष्टनाशी नृपुत्रोऽपि ह्यवभासिष्यते भुवि ॥२१॥ दिनेऽमुष्मिन् गृहात्
स्वीयाद्यः स्याद्बहिरवस्थितः । स्वद्रव्यं वहिरानेतुं गृहं मा प्रतियातु सः ॥२२॥ पत्नीं
स्मरत लोटस्य या ज्वलत्पुरमीक्षितुं । परावृत्तास्मृतेशाज्ञा पाक्यस्तम्भोऽभवत्तदा ॥२३॥ ११४
तस्यां रात्रौ भवेतां द्वावेकपर्य्यङ्कसंस्थितौ । तयोर्ग्रहीष्यते चैको द्वितीयश्च त्यजिष्यते ॥
२४॥ एकयन्त्रेण पिंषत्यौ भवेतां द्वे स्त्रियौ तदा । तयोर्ग्रहीष्यते चैका द्वितीया तु त्यजि
ष्यते ॥२५॥ गुरुरुवाच ॥ इदं श्रुत्वाब्रुवन् शिष्या एषा कुत्र भवेत्प्रभो । आपदाकस्मिका
नृणामिति पृष्टोऽब्रवीत्स तान् ॥२६॥ श्रीयेषूरुवाच ॥ यत्र यत्र मिलेद्देहो गतप्राणो महीतले ।

तत्र वै संग्रहीष्यन्ते दाक्षाय्या मांसभोजिनः ॥२७॥ गुरुरुवाच ॥ इत्थं घोरापदं प्रोच्य
शिष्यान् मोक्तातिनिःक्लमं । नित्यं प्रार्थयितुं नूत्नदृष्टान्तेन समादिशत् ॥२८॥ श्रीयेषूरुवाच ॥
कस्यांचिदभवत्पुर्य्यामक्षदर्शी दुरात्मकः । न वा विश्वेश्वराद्भीतो न वाप्यादृतमानुषः ॥
२९॥ तत्पुरे विधवा काचित्तमभ्येत्याक्षदर्शिनं । न्यायाद्वारयितुं स्वीयविपक्षाधर्म्ममार्थ
यत् ॥३०॥ चिरं नाङ्गीचकारैतत् प्रार्थितस्तु मुहुर्मुहुः । तया विधवया पश्चाच्चिन्तया ११५
मास स स्वयं ॥३१॥ यद्यपीशान्न भीतोऽहं न वाप्यादृतमानुषः । तथाप्युत्पीडितोऽत्यन्तं
प्रार्थयन्त्यैतया स्त्रिया ॥३२॥ अत एव तदर्थेऽहं न्यायं कुर्य्यां यथार्थितं । न चेत् सा नित्य
यागत्या हृन्मे संक्षोभयेद्दृढं ॥३३॥ इत्युक्तं धर्म्महीनस्य निर्दयस्याक्षदर्शिनः । यूयं शृणुत म
च्छिष्या दुष्टसंवारणेच्छवः ॥३४॥ अत ईशस्तथा स्वानां विशिष्टानामहर्निशि । स्वार्थे

प्रार्थयतामर्थं तद्विलम्ब्य चिरादपि ॥३५॥ न्यायं किं नाचरेद्भद्रो नूनमेवाचिरात्तथा । स्थिरं करिष्यति न्यायमिति युष्मान्ब्रवीम्यहं ॥३६॥ तन्न्यायं तु यदा कर्तुंसमागच्छेन्नरात्मजः । तदा भूमण्डले किं स स्थिरविश्वासमाप्स्यति ।३७॥ गुरुरुवाच ॥ एतत्प्रोच्य प्रभुः शिष्यान् मार्गे यैरूषलेमके । स्वीयभव्यागतेर्वाक्यं न्यायकृत्यै महीतले ॥३८॥ केषांचिद्विषये पश्चादात्मधर्म्माभिमानिनां । अवशिष्टावमन्तॄणां चापि दृष्टान्तमब्रवीत् ॥३९॥ श्रीयेषूरुवाच ॥ प्रार्थनार्थे मनुष्यौ द्वौ गतावीश्वरमन्दिरे । तयोरेकः फरीष्यो ऽभूत् करग्राही तथापरः ॥४०॥ फरीष्यः स्थित एकाकी स्वहृदि प्रार्थयत्तथा । यादृशो ऽन्ये नरा मन्दा लोप्तारो व्यभिचारकाः ॥४१॥ यादृगेष करग्राही तादृङ्नास्मीतिहेतुतः । तुभ्यमीश्वर सर्वज्ञ धन्यवादं करोम्यहं ॥४२॥ सप्ताहे द्विरहं नित्यमुपवासं करोमि वै । सर्वद्रव्यदशांशेभ्य ईशायैकं ददामि च ॥४३॥ ११६

इत्थमूचे फरीष्यो ऽसौ किंतु दूरात्करग्रहः । तिष्ठन् नेत्रे अपि स्वर्गे नोत्थापयितुमैहत ॥ ४४॥ अधस्त्वालोचमानः स आहतोरा अपि स्वयं । पापिने मे दयामीश कुर्वित्येव वचो ऽब्रवीत् ॥४५॥ नम्रात्मा किल मर्त्यो ऽयं पूर्वोक्तादधिकं नरात् । शुद्धीकृत इतो गेहं जगामेति ब्रवीमि वः ॥४६॥ आत्मगौरवकर्त्ता हीशेन क्षुद्रीकरिष्यते । आत्मक्षुद्रत्वकारी तु गुरूकर्त्तव्य एव च ॥४७॥ गुरुरुवाच ॥ ततः सत्पुरसंस्थे ऽस्मिन् परमेश्वरमन्दिरे । तस्य नूत्न ११७ प्रतिष्ठायाः पर्वकाले ऽविशत्प्रभुः ॥४८॥ इति श्रीख्रिष्टसंगीतायां सत्पालकचरित्रपर्वणि (लूकस्य सप्तदशाष्टादशसर्गाभ्यां योहन्नेर्दशमसर्गाच्चोद्धृतः) सत्प्रार्थनाविवेको नाम षोडशो ऽध्यायः ॥

शिष्य उवाच ॥ चतुर्थं तन्महापुर्य्यां प्रभुयात्रान्वितं गुरो । कीदृक् सन्मन्दिरनवप्रतिष्ठापर्व वर्णय ॥१॥ गुरुरुवाच ॥ मयोक्तमपि ते पूर्वं येषूत्पत्तिविवर्णने । हेतुं तत्पर्वणः शिष्य

मध्ये संप्रति विस्तरात् ॥२॥ यवनः सूरशार्द्दूलो ऽन्तियुको नाम भानुमान् । ऐस्रयेलीयसद्धर्म्म
मुन्मूलयितुमुद्यतः ॥३॥ मन्दिरे परमेशस्य जरूबाबिलनिर्म्मिते । कोलमेधं महावेद्यां सहो
ममकरोच्छठः ॥४॥ तेषां चाप्यपवित्राणां पक्वमांसरसेन सः । मन्दिरं सर्व्वशो ऽसिंचदपरि
ष्कारसिद्धये ॥५॥ यवनानां च देवस्य द्युपितुर्वज्रधारिणः । यज्ञार्थं स्थापयामास तत्र मूर्त्तिं
सवेदिकां ॥६॥ तां प्रतिष्ठाप्य चाशेषांस्तद्दुष्टार्चावमानिनः । शास्त्राचारान् यहूद्येषूग्रदुःखै ११८
र्हन्तुमैहत ॥७॥ घृणार्हं तत्तदा पुण्ये स्थाने राहित्यकारकं । तस्थौ त्र्यब्दं महाक्लेशयुतं
धर्म्यैस्त्रयेलिनां ॥८॥ यहूदो मक्कबायस्तु याजकस्य सुतो बली । बलिनो मत्तथीयस्याहरो
णार्य्यकुलोद्भवः ॥९॥ यवनानां बलं जित्वा वहिष्कृत्य च सत्पुरात् । अमूर्त्तेरीश्वरस्यार्च्चां
मन्दिरे पुनरानयत् ॥१०॥ तद्राहित्यघृणानाशसिद्धये धर्म्मिणस्तदा । प्रतिष्ठां नूतनां चक्रु

रद्वितीयेशसद्मनः ॥११॥ सलोम्नापि कृतायास्तु मन्दिरस्यादिमस्य वै । कीर्त्तितायाः प्रतिष्ठाया दाविञ्जेन प्रतापिना ॥१२॥ एतस्यापि च पूर्व्वाया द्वितीयस्येशसद्मनः । निष्पन्नायाः प्रतिष्ठायाः पारशीकनृपाज्ञया ॥१३॥ इयं नूत्नप्रतिष्ठासीदधिकाह्लादसंयुता । पूर्व्वानिस्मारिणां तर्हि धार्म्मिकाणां यहूदिनां ॥१४॥ तन्नित्यस्मृतये पर्व्वेष्वष्टस्वेकादशादिषु । ते सहःकृष्णपक्षस्यास्थापयन् पर्व्व वार्षिकं ॥१५॥ तदा द्युपितृमूर्त्तेर्हि प्रतिष्ठाभूद्घृणार्हका । तदा ११९
च त्र्यब्दशेषेऽपि प्रतिष्ठा नूतनोत्तमा ॥१६॥ एतत्समयतः प्रायःपूर्णे वर्षशतद्वये । तत्पर्व्वार्थं समायातः स्वयं पुण्यपुरे प्रभुः ॥१७॥ शिष्य उवाच ॥ एतस्मिन् समये यत्र कृतं खृष्टार्व्विभिः परे । तज्जन्मपर्व्व किं तत्राचरितं तेन हे गुरो ॥१८॥ गुरुरुवाच ॥ तदा सलोमराजाख्ये तोरणे मन्दिरस्य सः । भ्रमन् संवेष्टितोऽनेकैर्नूत्नराज्याभिलाषिभिः ॥१९॥

ये प्राड्मासद्वयात्तेन दूष्यपर्व्वणि सत्पुरे । कृतान्युक्तानि च स्मृत्वापृच्छंस्तं लोभिनस्तदा ॥२०॥
यहूद्या ऊचुः ॥ कियत्कालं त्वमस्माकं हृत् स्थापयसि संशये । त्वं चेत्सत्यं भवेः ख्रृष्टस्तदा
तद्ब्रूहि नः स्फुटं ॥२१॥ श्रीयेषूरुवाच ॥ पुरा तदवदं युष्मान् नतु व्यश्वसित ध्रुवं । याः क्रिया
मत्पितुर्नाम्नाकुर्व्वं ता मम साक्ष्यदाः ॥२२॥ यूयं तु मम मेषाणां पुरोक्तानां मयात्र हि । गणे
न स्थ स्थितास्तस्मान्मां न विश्वसिथ ध्रुवं ॥२३॥ मेषा निशाम्यन्ति गिरो मदीया ज्ञाता १२०
मया तेऽनुसरन्ति मां च । तेभ्यो ददे जीवनमेव नित्यं न कोऽपि तान् मेऽपहरेद्धि हस्तात् ॥
२४॥ यस्तान् ददौ मे हि पिताखिलेभ्यो महत्तरः सोऽस्त्यत एव तस्य । हस्तान्न तान् को
ऽपि हरेदहं हि नूनं मदीयश्च पिता स्म एकः ॥२५॥ गुरुरुवाच ॥ इति श्रुत्वा यहूद्यास्ते तद्व
धार्थं पुनः शिलाः । अगृह्णन्नथ मोक्ता तेऽभ्युक्ता ईश्वरसूनुना ॥२६॥ श्रीयेषूरुवाच ॥ सुक्रिया

मत्पितुः शक्त्या बहूर्युष्मानदर्शयं । कतमार्थमतस्तासां मां शिलाभिर्जिघांसथ ॥२७॥ यहूदा
उचुः ॥ सुक्रियाहेतुतो न त्वं शिलाक्षेपेण सांप्रतं । अस्माभिः संविनाश्योऽसि किंत्वीशस्याप
वादतः ॥२८॥ यत एव मनुष्यः सन्नप्यात्मानं त्वमीश्वरं । प्रब्रवीष्यत एवेशापवादोऽस्ति
तव स्फुटः ॥२९॥ श्रीयेषूरुवाच ॥ पुण्यशास्त्रेऽपि युष्माकं किं नोक्तं दाविदा पुरा । सदा
त्मव्याप्तराजेन मन्दान् प्रवदता नृपान् ॥३०॥ यूयं किलेशास्तनयाश्च सर्वे सर्वोपरिस्थस्य परा ॥२॥
त्मनः स्थ । इत्यब्रुवं किंतु नरा इवान्ये शेषाधिपाश्चेव मरिष्यथैव ॥३१॥ एवमीशान् यदि
ब्रूयात् स ईशोक्तोद्दिनान् नरान् । अनिराकरणीयेऽपि पुण्यग्रन्थे सदात्मनः ॥३२॥ तदा
प्रतिष्ठितं पित्रा भुवि नुन्नं च मां कथं । दण्डं ब्रूथ तदुक्त्यर्थमीशपुत्रोऽस्मि खल्विति ॥३३॥
अहं स्वपितृकर्म्माणि नाचरेयं यदि ध्रुवं । मा प्रतीत तदा मां वै ब्रूतापीशापवादिनं ॥३४॥

चेत् कुर्य्यां तदा वाक्यं न प्रतीयात यद्यपि । ब्रुवतो मे तथाप्येताः क्रिया विश्वसित स्फुटाः ॥
३५॥ तत्साक्ष्येण हि युष्माभिः प्रतीतं स्यात् सुनिश्चितं । मयि संस्थः पिता तस्मिंश्चाहं
संस्थः सदेत्यपि ॥३६॥ गुरुरुवाच ॥ इदं श्रुत्वा पुनस्ते तं ग्रहीतुं दृढमुद्यताः । स तु तेषां
बलान्मुक्तोऽनागतात्मान्तकालकः ॥३७॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (दावि
द्गीतानां द्व्यशीतितमान्मक्कबायचरित्रग्रन्थाभ्यां योहन्नेर्दशमसर्गाच्चोद्धृतः) पितृपुत्रैकत्वोपदेशो १२२
नाम सप्तदशोऽध्यायः ॥

शिष्य उवाच ॥ ईशपुत्रोऽवतीर्णः स भूमौ पित्रा प्रतिष्ठितः । दुष्टयैरूषलेमेभ्यो मुक्तः
कुत्रागमद्गुरो ॥१॥ गुरुरुवाच ॥ न पुनर्मृत्युपर्य्यन्तं गलीलायां स संस्थितः । यहूदानां तु
देशस्यासीम पूर्व्वदिशं ययौ ॥२॥ यर्द्दानीं च नदीं तीर्त्वा तत्पारे देश आगतः । पिराया

ख्ये पुरा यत्राग्रवरोऽस्नापयन्नरान् ॥३॥ बहवश्च गलीलातो यहूद्यानां च देशतः । तं तत्रा
भिगताः शिक्षां चिकित्सां चाप्यवाप्नुवन् ॥४॥ तद्देशस्थाश्च सर्वेऽपि तस्य संवसतः क्रियाः ।
समीक्ष्योचुः स्मरन्तो हि तत्रार्य्यं जकरीयजं ॥५॥ यहूद्यादय ऊचुः ॥ न किमप्यद्भुतं कर्म्म
योहन्निः स्नापकोऽकरोत् । यत्त्वस्य विषये सर्व्वं तेनोक्तं सत्यमेव तत् ॥६॥ गुरुरुवाच ॥
तथा योहन्निना प्रोक्तं गुरुं विक्रमवत्तरं । सदात्मानलसंस्कारप्रदं तत्पूर्व्वसंस्थितं ॥७॥ प्रमी १२२
तस्य स्थले तस्य यर्द्दीन्याः किल रोधसि । व्यूहा विशश्वसुर्य्येषु खृष्टमेवेश्वरात्मजं ॥८॥
वैरिणोऽपि फरीशास्तु तत्परीक्षार्थमागताः । व्यवस्थाविषये प्रश्नमिमं केचिदुदैरयन् ॥
९॥ फरीष्या ऊचुः ॥ पत्नीं वर्जयितुं स्वीयां कस्माच्चिदपि कारणात् । गुरो किमुचितं ज्ञातं
त्वयास्मान् दयया वद ॥१०॥ श्रीयेषूरुवाच ॥ स्त्रीपुंलिङ्गविधानेनादिमौ स्रष्टासृजन्नरौ ।

पुंसो मांसास्थितश्चापि नारीं सृष्ट्वाब्रवीदतः ॥११॥ स्वमातापितरौ तस्मान्नरस्त्यक्त्वा निज
स्त्रिया । सह योक्ष्यत्यतश्चापि तावेकाङ्गौ भविष्यतः ॥१२॥ इतीशोक्तं श्रुते मोस्ये युष्मा
भिः पठितं न किं । अतस्तौ तत्परे न द्वावेक एव तु संस्थितः ॥१३॥ अत एव ययोर्योगं
चकार परमेश्वरः । तौ केनापि मनुष्येण मा क्रियेतां पृथग्ध्रुवं ॥१४॥ फरोष्या ऊचुः ॥
चेदिदं स्यात्कथं मोसिर्दत्तवर्जनपत्रिकां । मलिनामप्रियां पत्नीं वहिष्कर्तुं न आदिशत् ॥१२
१५॥ श्रीयेषूरुवाच ॥ युष्मद्धृदयकाठिन्यहेतोः पत्नीविवर्जनं । ईदृशं सोऽनुमेने वः किं
त्वभून्नादितस्तथा ॥१६॥ अहं युष्मांस्त्विदं वच्मि कस्माच्चिदपि कारणात् । व्यभिचाराद्विना
यो यो निजां पत्नीं विवर्जयेत् ॥१७॥ सो ऽतो व्यभिचरत्येव तस्या वोढा तथैव च । या च
त्यक्तधवान्योढा स्यात् सा व्यभिचरत्यपि ॥१८॥ गुरुरुवाच ॥ तान् विवादिन इत्युक्त्वा शिष्यैः

सह गृहं गतः । तैश्चैतद्विषये तर्हि समपृच्छ्यत निर्जने ॥१९॥ श्रीयेषूशिष्या ऊचुः ॥ तादृशी
चेद्व्यवस्था स्यान्नरस्य स्वस्त्रियं प्रति । तदा नार्हति उद्वोढुमित्यस्माकं मतं प्रभो ॥२०॥
श्रीयेषूरुवाच ॥ विवाहाकरणं वाक्यं न धार्य्यमखिलैरिदं । किंतु येभ्य इयान् दत्तः प्रसादो
धार्य्यमेव तैः ॥२१॥ कतिचित्सन्ति शण्ढा हि स्थिता आमातृगर्भतः । विद्यन्ते कतिचि
च्चान्ये नरैः क्लीवीकृतास्तथा ॥२२॥ अन्ये तु स्वर्गराज्यार्थापहृतस्वीयपुंस्त्वकाः । वर्त्तन्ते १२५
यस्त्विदं धर्त्तुं क्षमः स धरतु ध्रुवं ॥२३॥ गुरुरुवाच ॥ इत्येवं प्रोक्तवत्यार्य्ये कामसंजेतरि
प्रभौ । शिशूंस्तत्स्पर्शनार्थाय तदा केचित् समानयन् ॥२४॥ शिष्यास्तु तत्समानेतॄन्न्यषेध
न्नप्रियोक्तिभिः । अतो ऽसंतुष्टहृन्मोक्ता तानेतदवदद्वचः ॥२५॥ श्रीयेषूरुवाच ॥ शिशून्
मन्निकटे ऽभ्येतुमनुजानीत तांश्च मा । न्यषेधिष्टेशराज्यं हीदृश्यैव प्रजया स्थितं ॥२६॥ ईश

राज्यं शिशुरिव गृह्णीयान्नहि यो नरः । स वै न प्रविशेत्तस्मिन्निति युष्मान् ब्रवीम्यहं ॥ २७॥ गुरुरुवाच ॥ इत्युक्त्वा तान् शिशून् येषूः समालिङ्ग्यैकशो मुदा । तच्छिरःसु स्वहस्तौ च स्थापयित्वाशिषं ददौ ॥२८॥ इति श्रीख्रीष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मोसेः पंचशास्त्रे योनिस्कन्धस्य प्रथमद्वितीयसर्गाभ्यामनुवाक्यस्कन्धस्य च चतुर्विंशसर्गाद् योहन्निमार्कयोर्दशम सर्गान्मत्थायस्योनविंशसर्गाल्लूकस्यैकादशसर्गाच्चोद्धृतो) निर्म्मलराज्यशासनं नामाष्टादशोऽध्यायः॥ १२६

गुरुरुवाच ॥ निर्गच्छन्तं ततो मार्गे प्रभुं कश्चिदभिद्रवन् । भूमिपातितजानुश्च प्रणतोऽभ्य ब्रवीदिदं ॥१॥ युवोवाच ॥ हे सद्गुण महाचार्य्य नित्यजीवनलब्धये । किं कर्तव्यं मया भद्रं तन्मे त्वं कृपया वद ॥२॥ श्रीयेषूरुवाच ॥ मां कथं सद्गुणं वक्षीशाद्विना न हि सद्गुणः । जीवनं त्वेतुमिच्छेश्चेदाज्ञावस्थाः पालयैश्वरीः ॥३॥ गुरुरुवाच ॥ इदं श्रुत्वा युवापृच्छन्मया ताः

कतमा गुरो । पालनीया इति प्रोच्य ततः प्रापोत्तरं प्रभोः ॥४॥ श्रीयेषूरुवाच ॥ ता ज्ञाता
आद्रियस्व त्वं स्वमातापितराविति । मा कंचित्त्वं जहीत्येवं मा त्वं व्यभिचरेति च ॥५॥ मा
चोरेति तथा मिथ्यासाक्ष्यं मा त्वं वदेत्यपि । ताः सलोभनिषेधाः षड्व्यवस्थाश्चरमा विभोः ॥
६॥ तासां च लिखितानां वै द्वितीये ऽश्मनि मोसिना । सारो ऽयं त्वं स्ववत् स्निह्य प्रतिवासिन
मित्युत ॥७॥ युवोवाच ॥ एताः सर्वा महाचार्य्याशिशुत्वादप्यहं सदा । अपालयमतः किं १२७
मे ऽधिकमावश्यकं भवेत् ॥८॥ गुरुरुवाच ॥ इति यूनो वचः श्रुत्वा तत्प्रेमाविष्टमानसः ।
प्रभुरालोचमानस्तं प्रत्यवादीदिदं वचः ॥९॥ श्रीयेषूरुवाच ॥ सिद्धो भवितुमिच्छेश्चेत्तदैकमधिकं
तव । अवशिष्टं स्ववस्तूनि विक्रीणीह्यखिलान्यपि ॥१०॥ ततो निजधनं सर्वं दरिद्रेभ्यः
प्रदाय भो । शूलमुत्थाप्य मामन्वेह्यतस्ते स्वर्धनं भवेत् ॥११॥ गुरुरुवाच ॥ इति वाक्यं

युवाकर्ण्य दुःखी भूत्वा ततो गतः । यतः सोऽतिधनी तन्तु दृष्ट्वाभ्यूचेऽनुगान् प्रभुः ॥१२॥ श्रीयेषूरुवाच ॥ धनवद्भिर्नरैरेव संसारफलभोगिभिः । दुःप्रवेश्यं कथं न स्यादहो सद्राज्य मैश्वरं ॥१३॥ गुरुरुवाच ॥ तान् पर्य्यालोचमानः स इत्थं प्रोवाच तेषु तु । विस्मयं किल गच्छत्सु भूयः प्रत्यवदत्तथा ॥१४॥ श्रीयेषूरुवाच ॥ हे पुत्रा धनविश्वासकारिभिः सकलैर्नरैः । दुःप्रवेश्यं कथं न स्यादहो सद्राज्यमैश्वरं ॥१५॥ धनिनः स्वर्गराज्यान्तर्गतेः शक्य १८ तरा किल । सूचीरन्ध्रान्तरे पीवो गतिरुष्ट्रस्य जायते ॥१६॥ गुरुरुवाच ॥ इति श्रुत्वा वचः शिष्याः परमं विस्मयं ययुः । अन्योऽन्यं चाब्रुवन् कोऽतो विमुक्तिं प्राप्नुयादिति ॥ १७॥ समालोच्य तु तान् मोक्ताब्रवीत् तत्किल मानुषैः । असाध्यं किंतु सर्वाणि साध्यानि परमात्मना ॥१८॥ इत्थं द्वादशशिष्येषु श्रुतवत्सूत्तरं प्रभोः । सीमोनः प्रथमस्तेषामिदं त

द्विषये ऽवदत् ॥१९॥ प्रस्तर उवाच ॥ वयं सर्व्वाणि सन्न्यस्य भूता आचार्य्य ते ऽनुगाः । ततः
किं फलमस्माकं तव राज्ये भविष्यति ॥२०॥ श्रीयेषूरुवाच ॥ यूयं मे ऽत्रानुगा विश्वपुन
र्जन्मनि वै यदा । आसीत नृसुतः स्वीयतेजःसिंहासनोपरि ॥२१॥ तदा सिंहासनेष्वेवा
सीना द्वादशसु ध्रुवं । स्यातेस्रयेलवंशानां द्वादशानां विचारकाः ॥२२॥ यो यस्तु मम ना
मार्थे सुवार्त्तार्थे ऽपि चालयं । पितरौ भ्रातृभग्नीः स्त्रीं सुतान् क्षेत्राणि वा त्यजेत् ॥२३॥ १२९
स काले ऽप्यैहिके सर्व्वमेतच्छतगुणं पुनः । लप्स्यते ताउनैर्युक्तं शेषे चानन्तजीवनं ॥२४॥
इति वो वच्म्यृतं किंतु बहवो ये ऽधुनादिमाः । ते ऽन्तिमाः स्युस्तथा चेह ये ऽन्तिमास्ते स्युरा
दिमाः ॥२५॥ सन्निभं स्वर्गराज्यं हि गृहस्थस्यास्ति कर्म्मणा । निर्गतस्योषसि प्राप्तुं द्राक्षा
र्थं भृतकान् बहून् ॥२६॥ लब्धव्यं चैकशो ऽह्नोतै रौप्यमाषचतुष्टयं । इत्यङ्गीकरणे पूर्णे तै

द्राक्षाकर्म्मणे गताः ॥२७॥ अथाद्यप्रहरे पूर्णे निर्गत्य विपणौ स्थितान् । निष्क्रियान् स द
दर्शान्यानभ्युवाच च तानपि ॥२८॥ मद्द्राक्षायां तथा यूयं यात यत्त्रोचितं भवेत् । तद्वो दास्य
इति श्रुत्वा ते ऽपि तत्कर्म्मणे गताः ॥२९॥ द्वितीये प्रहरे चापि तृतीये च तथा गते । वि
निर्गत्येतरान् स्वामी भृतकांस्तद्वदाह्वयत् ॥३०॥ चतुर्थप्रहरस्यापि स दण्डे पंचमे गते ।
निर्गत्य विपणावन्यान् स्थितान् दृष्ट्वाब्रवीत्तदा ॥३१॥ कथं तावद्दिनं यूयं स्थिता अत्रालसा १३०
इति । प्रत्यूचुस्ते यतः कार्य्ये न को ऽप्यस्मान्ययोजयत् ॥३२॥ इति श्रुत्वावदत् स्वामी
द्राक्षां यूयं च गच्छत । यत्त्वार्हं तत्प्रलप्स्यध्व इत्यथो ते तथा ययुः ॥३३॥ तस्मिंस्तु प्रहरे
पूर्णे स द्राक्षाध्यक्षमादिशत् । सर्व्वेभ्यश्चरमादिभ्यो वेतनं देह्यनुक्रमात् ॥३४॥ एवं कृते ततो ये
ऽन्त्ये ऽप्याहूताः प्रहरे ऽभवन् । ते प्रापुरेकशो ऽध्यक्षाद्रौप्यमाषचतुष्टयं ॥३५॥ अतो ये

प्राक् समाहूतास्ते ऽपैक्षन्ताधिकं ततः । लब्धुं किंत्वेकशस्ते ऽपि प्रापुर्माषचतुष्टयं ॥३६॥
विरक्तमनसो ऽतस्ते प्रोचुर्गृहपतिं प्रति । अहो मुहूर्त्तमात्रे ऽमी त्वत्क्रियां चक्रिरे ऽधुना ॥३७॥
तथाप्यस्थापयो ऽस्माभिः समानांस्त्वममून् दृढं । सोढवद्भिरपि श्रान्तिं तावत्यह्युष्णमेव च ॥
३८॥ इति निन्दावचस्तेषां श्रुत्वैकस्मा उवाच सः । हे सखे न किमप्यत्राधर्म्मं त्वयि
करोम्यहं ॥३९॥ मया सार्द्धं त्वया किं न प्रातरङ्गीकृतं ह्यभूत् । दिनकर्म्मभृतिं लब्धुं रौप्य ॥३॥
माषचतुष्टयीं ॥४०॥ अतो यद्वेतनं ते ऽस्ति तद्गृहीत्वा गृहं व्रज । यावत्तुभ्यं त्वहं तावद्दास्ये
ऽस्मा अपि वेतनं ॥४१॥ मद्वस्तुविषये किं न मया कार्य्यं यथेच्छया । किं वा मद्भद्रताहेतो
र्दुष्टं चक्षुर्बभूव ते ॥४२॥ इति वाक्यानुसारेण ये ऽधुना पश्चिमाः स्थिताः । ते स्युराद्यास्तथा
चेहाद्िमा ये ते स्युरन्तिमाः ॥४३॥ ईशराज्ये समाहूता वर्त्तन्ते बहवः किल । किंतु तत्र

विशिष्टानामल्पो वै विद्यते गणः ॥४४॥ इति श्रीख्रीष्टसंगीतायां सत्पालकचरित्रपर्वणि (मोसेः पंचशास्त्रे निःसृतिस्कन्धस्य द्वाविंशसर्गाल्लैव्यस्कन्धस्योनविंशसर्गादनुवाक्यस्कन्धस्य च पंचम सर्गान्मत्थायस्योनविंशविंशतितमसर्गाभ्यां मार्कस्य दशमसर्गाल्लूकस्याष्टादशसर्गाच्चोद्धृतो) विशिष्टाल्पत्वोपाख्यानं नामोनविंशोऽध्यायः ॥

गुरुरुवाच ॥ बेथनीयानिवासिन्योः स्वस्रोर्मार्थामरीययोः । येषूसख्योस्तदा भ्राता ला १३२
जारोऽभवदामयी ॥१॥ अतः प्रैरयतां दूतं यद्दानीपार एव ते । येष्वे वक्तुमहो यं त्वं स्निह्य
स्यार्तो ऽस्ति स प्रभो ॥२॥ इदं श्रुत्वा तयोर्वाक्यं तत्त्रयप्रीतमानसः । दयालुरपि सन्मोक्ता
प्रत्यवादीदिदं तदा ॥३॥ श्रीयेषूरुवाच ॥ न मृत्यर्थमयं रोगोऽभवत् किंत्वीशतेजसे ।
तद्द्वारा चेशपुत्रस्य तेजो दर्शयितुं भुवि ॥४॥ गुरुरुवाच ॥ इत्येवोक्त्वा स तद्वार्ताप्राप्तेः पश्चाद्दिन

द्वयं । तस्मिन्नेव स्थले ऽतिष्ठत् पिरायाभिधनीवृति ॥५॥ तत्परे तु स्वशिष्यान् सो ऽभ्यवद्
द्याम वै पुनः । यहूद्यं देशमित्येवाथ शिष्यास्तं समब्रुवन् ॥६॥ श्रीयेषूशिष्या ऊचुः ॥ हे
आचार्य्याधुनापि त्वां यहूद्या हन्तुमश्मभिः । समैच्छंस्त्वमतो यासि कथं तन्नीवृतं पुनः ॥
७॥ श्रीयेषूरुवाच ॥ किं न ख्याता दिनस्यांशा द्वादशातो दिने व्रजन् । मनुष्यो न पतेद्यस्मा
त्तेन दृष्टा जगद्द्युतिः ॥८॥ चेत्तु रात्रौ व्रजेत्को ऽपि तदा स निपतिष्यति । यस्मान्न भासते १३३
तस्मिन् प्रकाशः कश्चिदैहिकः ॥९॥ गुरुरुवाच ॥ इत्युक्त्वैतदपि प्रोचे लाजारो नः सखाधुना ।
निद्रितो ऽतो ऽहमप्येमि तं जागरयितुं त्विति ॥१०॥ शिष्यास्तूचुः प्रभो चेत्स स्वप्यात् सुस्थो
भवेत्तदा । इत्थं शयनमात्रार्थां जानन्तो हि प्रभोर्गिरं ॥११॥ अतस्तां मृत्युविषये प्रोच्य निद्रा
गिरं पुरा । तैरबुद्धां परे स्पष्टं स तानभ्यब्रवीद्वचः ॥१२॥ श्रीयेषूरुवाच ॥ ममार किल

लाजारस्तत्समीपे च तत्क्षणे । अहं तदुपकाराय न ह्युपस्थितवान् खलु ॥१३॥ तस्मादप्यस्मि
युष्माकमर्थे संतुष्टमानसः । युष्मद्विश्वासलिप्सुर्हि याम तं प्रत्यतोऽधुना ॥१४॥ गुरुरुवाच ॥
बेथनीया तथाभ्येत्या स्थिता क्रोशान्तरे पुरात् । जिघांसूनामिति श्रुत्वाब्रवीत् थोमास्तदेत
रान् ॥१५॥ थोमा उवाच ॥ वयमप्यखिलास्तेन सार्द्धं स्वप्रभुणाधुना । प्रचलेम यतोऽरी
णां हस्तैस्तद्वन्म्रियेमहि ॥१६॥ गुरुरुवाच ॥ इत्युक्ते दिदुमाख्येन शेषानेकादश प्रति १२४
यद्दानीं तेऽतरन् गन्तुं मार्गे येरूषलेमके ॥१७॥ सशिष्यो बेथनीयायां ततो येषूरुपस्थितः ।
लाजारे मृन्निखातान्तःस्थापिते ऽह्नश्चतुष्टयं ॥१८॥ तद्गृहे तु तदानेके ग्रामात् सत्पुरतोऽपि
च । यहूद्यास्तद्विताः स्वस्रोः प्रबोधाय समागताः ॥१९॥ तत्र चागमनं येष्वः श्रुत्वा सद्यः
समुत्थिता । मार्था प्रविशतो ग्रामं तस्य साक्षाद्गतैकला ॥२०॥ तं समीक्ष्य तदावादीत्

प्रभो चेत्त्वमुपस्थितः । अत्रासीः किल मद्भ्राता नाभविष्यन्मृतस्तदा ॥२१॥ किंत्विदानी
मपि त्वं वै यद्यदीश्वरमर्थयेः । तत्तद्दास्यति तुभ्यं स इत्येवं निश्चितं मया ॥२२॥ इत्थं
मार्थावचः श्रुत्वा येषूस्तां प्रत्यवोचत । पुनरुत्थास्यति भ्राता त्वदीयो मृतवानिति ॥२३॥
अथ सोवाच सर्वेषामुत्थानाहे ऽन्तिमे स वै । उत्थास्यतीति मज्ज्ञातमित्यथोवाच तां प्रभुः ॥
२४॥ श्रीयेषूरुवाच ॥ पुनरुत्थानमेवाहं जीवनं चास्मि यश्च मां । प्रत्येति स म्रियेतापि १३५
यदि जीविष्यति ध्रुवं ॥२५॥ जीवन् यो यश्च मामेव प्रत्येति न कदाचन । स मर्त्तेति
त्वया मार्थे किमेतन्मन्यते दृढं ॥२६॥ मार्थोवाच ॥ नूनमेवं प्रभो त्वं हि ख्रिष्टः खल्वीश्व
रात्मजः । अपेक्ष्यागमनो भूमाविति प्रत्येम्यहं ध्रुवं ॥२७॥ गुरुरुवाच ॥ इत्थमुक्त्वा द्रुतं
मार्थागच्छद्गेहमवाप च । स्वसारं तत्र मध्ये स्वां समासीनां यहूदिनां ॥२८॥ तां रह

तदावादीदाचार्य्यो ऽत्र समागतः । समाहृयति चापि त्वामित्येवं तैरसंश्रुतं ॥२९॥ मरीया
तु तदाह्वानं श्रुत्वोत्थाय च तत्क्षणे । यत्र स्वस्रा पुरा दृष्टो येषूस्तत्रैव साद्रवत् ॥३०॥ यहूद्या
स्तु गृहासीनास्तां दृष्ट्वाशुगतां तथा । ऊचुर्भ्रातुर्निखाते वै रोदितुं सा ययाविति ॥३१॥ अत
स्ते ऽनुययुर्ग्रामसीमापर्य्यन्तमेव तां । तत्र सापि प्रभोः साक्षाद्गत्वेदं प्रणताब्रवीत् ॥३२॥
मरीयोवाच ॥ हे प्रभो चेत्त्वमस्माकं समीपे समुपस्थितः । अत्रासीः किल मद्भ्राता नाभविष्य
न्मृतस्तदा ॥३३॥ गुरुरुवाच ॥ रुदतीं तां तु संदृश्यानुगतान् रुदतो ऽपि च । यहूद्यांस्तत्स
खान् येषूरभूत् संखिन्नमानसः ॥३४॥ सश्वासं चाब्रवीत् तं क्व समस्थापयताथ ते । नाथैहि
द्रष्टुमित्यूचुस्ततस्तत्राखिला गताः ॥३५॥ तह्यरोदीत्प्रभुस्तत्तु दृष्ट्वान्योन्यं यहूदिनः । अभ्यूचुः
कियदेतस्य प्रेमामुष्मिन्नभूदिति ॥३६॥ ऊचुस्त्वन्ये ददौ यः प्राग्दृषिमन्धाय खल्वयं । स

किं वारयितुं मृत्युं नाशक्नोत् स्वप्रियादपि ॥३७॥ इत्युक्ते तैः स्मरद्भिर्हि दूष्यपर्वणि तत्क्रियां ।
उपातिष्ठन्निखाते स लाजारस्य शिलावृते ॥३८॥ अथोचे खिन्नहृत्सोऽमूमुत्तोलयत खल्वितः ।
शिलामिति ततो मार्था तत्तात्पर्य्याबुधावदत् ॥३९॥ प्रभोऽसौ पूतिगन्धोऽस्ति मृतश्चत्वार्यहानि
हि । इत्थं तद्वाक्यमाकर्ण्य प्रभुस्तामिदमब्रवीत् ॥४०॥ श्रीयेषूरुवाच ॥ विश्वस्याश्चेत्त्वमीशस्य
महौजो द्रक्ष्यसीति किं । नोदितं ते पुरा मार्थे मया जीवनदायिना ॥४१॥ गुरुरुवाच ॥ १३७
इत्युक्ते प्रभुणाथो ते निखातादुदतोलयन् । शिलां किंत्वीक्षमाणः स उर्द्ध्वमेतद्वचोऽब्रवीत् ॥
४२॥ श्रीयेषूरुवाच ॥ स्तौम्यहं त्वां पितर्यस्मान्मद्वाक्यमधुनाशृणोः । सदापि च वचो मे
त्वं शृणोषीत्यपि वेद्म्यहं ॥४३॥ स्थितस्य परितस्त्वस्य व्यूहस्यैव प्रतीतये । त्वयाहं प्रेरितो
ऽस्मीति तद्वाक्यमुदितं मया ॥४४॥ गुरुरुवाच ॥ इत्थं स्तुत्वेशपुत्रः स लाजार वहिरेह्यहो ।

इत्युच्चैर्घोषयामास समस्तव्यूहगोचरे ॥४५॥ वहिरायात्स सद्योऽथ न्यस्तस्तत्र यथाभवत् ।
बद्धास्यो गात्रमार्जन्या वस्त्रैर्बद्धकराङ्घ्रिकः ॥४६॥ तं च मोचयितुं तत्र नरानादिशति प्रभौ ।
पुनर्जीवन्तमखिला लाजारं ददृशुः क्षणात् ॥४७॥ तत्स्वसारावतो हृष्टे बहवश्चापि तत्सखाः ।
यहूद्यास्तां क्रियां दृष्ट्वा व्यश्वसन् सत्प्रभुं तदा ॥४८॥ तेषां केचित्तु तद्वार्तां येषूशत्रून् फरी
ष्यकान् । यिरूषलेममध्यस्थान् द्रुतं ज्ञापयितुं गताः ॥४९॥ शिष्य उवाच ॥ किमतश्चक्रु १३८
राचार्य्यं जनाः स्तब्धहृदोऽपि ते । श्रुतवन्तः प्रभोः कार्य्यमियच्छक्तिदयान्वितं ॥५०॥ गुरु
रुवाच ॥ तच्छ्रुत्वा सदसि श्रेष्ठयज्वानः सफरीष्यकाः । तत्कर्म्मार्थं समाहूता इदमूचुः पर
स्परं ॥५१॥ सभ्या ऊचुः ॥ किं करिष्यामहेऽयं हि विविधाद्भुतकर्म्मकृत् । गालील्यो यदि
वास्माभिः परित्यज्येत वै तथा ॥५२॥ तदा सर्व्वेऽपि मंस्यन्ते तं व्यूहा अथ जित्वराः ।

रौम्या एत्य बलाद्राष्ट्रं नाशयेयुः पुरं च नः ॥५३॥ गुरुरुवाच ॥ इत्युक्ते रौम्यभीतैस्तैस्तद्रा
ज्यं च निनंक्षुभिः । दुह्यद्भिश्चाप्रहारस्य लोभारेरुपदिष्टये ॥५४॥ ततस्तेषां गणस्यैको हन्न
स्य श्रेष्ठयज्वनः । जामाता कायफो नाम समुत्थायेदमब्रवीत् ॥५५॥ कायफ उवाच ॥
अज्ञाः सकलराष्ट्रार्थे मृत्युरेकस्य नो हितः । नतु राष्ट्रलयोऽस्तीति न विचारयथाधुना ॥५६॥
गुरुरुवाच ॥ न स्वयं कायफो वाक्यमिदं दुष्ट उदैरयत् । किंतु तद्वत्सरे यस्मात् प्रधानो १३९
ऽभूत्स यज्वनां ॥५७॥ तस्मादीशात्मकर्षेण तथा प्रोवाच भाविनं । स तत्सकलराष्ट्रार्थे
मृत्युं मोक्तुर्हितं सतः ॥५८॥ नच तद्राष्ट्रमात्रार्थे किंत्वीशस्याखिलान् सुतान् । विभिन्ना
नपि संवेतुं तस्य भव्या मृतिः सतः ॥५९॥ इतस्तु यज्वनोऽमुष्य दुष्टसंकल्पतोऽखिलाः ।
सभ्या मारयितुं येषूं संपरामर्शयन् दृढं ॥६०॥ स तु मृत्योः स्वकीयस्यान्तिककालावधि प्रभुः ।

साक्षाद्येरूषलेम्यानामितो न स्थातुमैहत ॥६१॥ बेथनीयां तु संत्यज्य सशिष्यो ऽफ्रैम
नामके । पुरे यहूद्यदेशस्येशानदिक्संस्थिते ऽवसत् ॥६२॥ इति श्रीखृष्टसंगीतायां सत्पालक
चरित्रपर्व्वणि (योहन्नेरेकादशसर्गादुद्धृतो) मृत्युविजयनिदर्शनं नाम विंशो ऽध्यायः ॥

शिष्य उवाच ॥ तदा यो ऽन्तिक आयातो मृत्युकालः प्रभोः सतः । मृत्युसंजित्वरस्या
पि कः स आचार्य्य मे वद ॥१॥ गुरुरुवाच ॥ पुरोक्तानि हि कर्म्माणि शिशिरान्ते ऽभवन १४०
सति । वसन्ते त्वागते ऽभ्यर्णः कालः पर्व्वीय एव सः ॥२॥ वैशाख्यां पौर्णमास्यां हि महापर्व्व
यदा कृतं । अविवत्समखैस्त्राणहेतोः सर्व्वैस्त्रयेलिनां ॥३॥ तदा मेध्याविवत्सस्य जगत्पाप
हृतः सतः । ईश्वरस्थापितस्यैवं भव्यः स मख एकदा ॥४॥ तत्त्राणपर्व्वणः पूर्व्वं स्वपूतीकर
णाय तु । नानाग्रामाद्यहूद्येषु समागच्छत्सु सत्पुरं ॥५॥ बहवो मन्दिरान्तःस्थाः समवो

वन् परस्परं । नागामी पर्व्वणे ऽत्रासाविति किं भवतां मतं ॥६॥ तद्भृत्यै त्वादिशन् व्यूहं
यज्वानः सफरीष्यकाः । तद्वासं को ऽपि चेद्विद्यात् तत्तान् ज्ञापयितुं किल ॥७॥ शिष्य
उवाच ॥ यदा तन्मृत्युकालः स पर्व्वीयो ऽत्यन्तिकस्तथा । अभूत् किमकरोत्तर्हि प्रभुर्प्रेम
संस्थितः ॥८॥ गुरुरुवाच ॥ तदा पुण्यपुरं सो ऽपि यातुमारब्धवान् प्रभुः । । मार्गे थ
रोखवे ऽगच्छद्बहुशिष्यैः समन्वितः ॥९॥ विस्मितांश्च तया गत्या जिघांसुनगरे ऽनुगान् । १४१
श्रेष्ठान् द्वादश भीतांश्च निर्जने ऽभ्यब्रवीद्वचः ॥१०॥ श्रीयेषूरुवाच ॥ अहो इदानीं हि यिरूष
लेमं वयं प्रयामो ऽथ पुरैव शास्त्रे । यद्यन्नृसूनोर्विषये व्यलेखि तत्तत्समस्तं परिपूरणीयं ॥
११॥ साध्यापकैः सत्तमयज्वभिः स संस्थापनीयो मृतिदण्डयोग्यः । अथेत्त्रयेलार्य्यकुलाधिपै
स्तैः समर्पणीयः स करेऽन्यजानां ॥१२॥ तथोपहास्यः किल थुत्प्रदेयस्तेषां कशाभिश्च स ताड

नीयः । परे च हन्तव्य इतस्तु घस्रे मृत्योस्तृतीये पुनरुत्थितः स्यात् ॥१३॥ गुरुरुवाच ॥
इत्युक्ता अपि शिष्यास्ते गूढार्थं तद्गिरस्तदा । नावजग्मुः प्रभोर्मृत्या प्रकाश्यमचिराद्ध्रुवं ॥
१४॥ यत्तु तद्विषयं शास्त्रे भव्यवक्त्रा व्यलेख्यपि । खृष्टवाग्वादिना तत्तैर्विस्मृतं वच्मि ते
ऽधुना ॥१५॥ इषाय उवाच ॥ पृथिव्यां गृहीताङ्कस्यैव कर्णं श्रवाहं विभुर्मे महेशश्चकार ।
अहं नत्वभूवं तदाज्ञानधीनो न वा तन्नियोगात्परावृत्तचित्तः ॥१६॥ अतस्ताडयत्सु स्वकं १४२
पृष्ठभागं कपोलं च रोमप्रकर्षिष्वहं स्वं । स्वयं न्यास्यमास्तैो नचापि स्ववक्त्रं त्रपायाः परावर्त्त
यं थुत्कृतेर्वा ॥१७॥ महेशो विभुर्हि स्थितो मत्सहायस्ततो मा भवेयं त्रपाव्याप्तचेताः ।
दृढं स्थापयिष्ये ऽत आस्यं शिलावन्नच ह्रीजितः स्यां किलेत्थं सुवेद्मि ॥१८॥ विशुद्धीकरो मे
ह्यदूरे ऽस्त्यतः को विपक्षो ऽत्र तिष्ठेन्मया सार्द्धमाजौ । विभुर्मे सपक्षो ऽथ को दण्डवत्तांशुकानीव

जीर्णान्यमी कोटखाद्याः ॥१९॥ गुरुरुवाच ॥ तथोक्तं विभुनुन्नस्य मृत्यार्तिसहनं प्रभोः ॥
परे भावी च शत्रूणां लय ईशप्रवाचिना ॥२०॥ इषायप्रभृतीनां तु तत्तुल्योक्तीः पुरो
दिताः । समस्ताः परिपूर्तव्या अचिरादपि ते तदा ॥२१॥ नाबुध्यन्त प्रभोः शिष्यास्तत
स्तं जिबिदीयजौ । मात्रा सह समभ्यैतामैहिकैश्वर्य्यकांक्षिणौ ॥२२॥ प्रणता सा तदो
वाच प्रभो त्वामर्थये वरं । तस्मिन् पृच्छति कः सोऽस्तीत्यथ साभ्यब्रवीदिदं ॥२३॥ १४३
जिबिदीयपत्न्युवाच ॥ मत्सून्वोरनयोरेकं दक्षिणे ते तथेतरं । वामे चाप्यासितुं नाथ त्वद्राज्ये
कृपयादिश ॥२४॥ गुरुरुवाच ॥ इमां श्रुत्वार्थनां मातृमाध्यस्थ्येनेरितां तयोः । गौरवा
कांक्षिणोर्यैषूः प्रददावुत्तरं तदा ॥२५॥ श्रीयेषूरुवाच ॥ युवां प्रार्थयथो यत्तन्न जानीथः
समन्ततः । तिक्तं पेयं मया यत्तत्पातुं किं शक्नुथो युवां ॥२६॥ दुःस्नानेन च येनाहं संस्क

तव्यो ऽस्मि सांप्रतं । किं तेनाप्युग्रसंस्कारं युवां प्राप्तुं क्षमौ तथा ॥२७॥ गुरुरुवाच ॥ इदं
याकोबयोहन्नी पृष्टौ नूनं हि शक्नुवः । इत्थं प्रत्यूचतुर्मोहात् ततस्तेनोदितौ पुनः ॥२८॥
श्रीयेषूरुवाच ॥ यन्मयाप्यचिरात्पेयं तन्नूनं पास्यथो युवां । यं चाहं स्नानसंस्कारं लप्स्ये
तमपि लप्स्यथे ॥२९॥ दक्षिणे मे तु वामे चासनदानं न मद्वशे । स्थितं येभ्यस्तु मत्पित्रा प्रस्तुतं
प्राप्यमेव तैः ॥३०॥ गुरुरुवाच ॥ इति श्रुत्वेतरे शिष्या दश तौ प्रत्यतिक्रुधं । ययुस्तत्तु प्रभुर्ज्ञा १४७
त्वा समाहूयाभ्युवाच तान् ॥३१॥ श्रीयेषूरुवाच ॥ भिन्नदेशाधिपाः ख्यातास्तेषां कुर्वन्ति शास
नं । महान्तो ऽपि तदीशत्वं प्रकुर्वन्तीति वित्थ ह ॥३२॥ नतु युष्मासु तद्वत्स्यात् किंतु यः को
ऽपि वो गणे । महान् भवितुमिच्छेत्स युष्माकं यातु सेवितां ॥३३॥ यश्च युष्मद्गणे श्रेष्ठः
काङ्क्षेत भवितुं तथा ॥ स युष्माकं समस्तानां किंकरो भवतु ध्रुवं ॥३४॥ यस्मान्नृपुत्रो

ऽपि समागतोऽत्र सेवां न लब्धुं किल सेवितुं तु । अर्थे बहूनां निजजीवनं च निधातुमुख्यां मघदण्डहृत्यै ॥३५॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (इषायभव्यवाक्यानां पंचाशत्तमसर्गान्मत्थायस्य विंशसर्गान्मार्कस्य दशमसर्गाल्लूकस्याष्टादशसर्गाद् योहन्नेरेकादशसर्गाच्चोद्धृतो) भव्यमृत्युसूचनं नामैकविंशोऽध्यायः ॥

गुरुरुवाच ॥ तस्यां स्वान्तिमयात्रायां यिरीखूनगरं प्रभौ । आयातं मागपार्श्वेऽन्धावा १४५
सातां भिक्षुकौ तदा ॥१॥ महत्यपि च तं द्रष्टुं मोक्तारमनुगैर्वृतं । निर्गते परितो व्यूहे तद्बृहत्पुरवासिनां ॥२॥ तयोर्भिक्षुकयोरेको बार्तिमायाभिधानकः । तिमायतनयोऽपृच्छत् कुतो व्यूह इयानिति ॥३॥ ततः प्रत्युदितो मर्त्यैर्नाशरेत्योऽत्र गच्छति । श्रीयेषूरित्यथान्धः सोऽनर्ददुच्चैर्मुहुर्मुहुः ॥४॥ हे प्रभो दाविदुत्पन्न येषूर्मे करुणां कुरु । तथा चापीतरै

भिक्षुर्ननादातीव यत्नतः ॥५॥ ततस्तावग्रगो व्यूहस्तूष्णीं भवितुमादिशत् । भर्त्सितावपि
तौ तूच्चैस्तद्वन्मुहुरनर्द्दतां ॥६॥ तच्चाकर्ण्य प्रभुर्दाविदुत्पन्नः करुणामयः । तद्बोधादिनं
दीनं साक्षादानेतुमादिशत् ॥७॥ तथामी बार्तिमायं तं समभ्येत्याब्रुवन्निदं । स्थिरचेताः
समुत्तिष्ठ त्वां समाह्वयति प्रभुः ॥८॥ ततः स्वं वस्त्रमुत्क्षिप्य सो ऽगच्छत् प्रभुसन्निधौ । इतरे
णान्वितो ऽन्धेनाथ येषूरभ्युवाच तौ ॥९॥ युष्मत्कृते मया किं नु कार्य्यमिष्टं भवेदिति । १४६
प्रत्यूचे बार्तिमायस्तु दृष्टिरिष्टैव नौ प्रभो ॥१०॥ ततः स करुणाविष्टस्तयोर्नेत्राणि संस्पृशन् ।
अवदत् प्राप्नुतं दृष्टिं विश्वासो वां ह्यमोचयत् ॥११॥ अतः प्राप्तेक्षणौ सद्यस्तं तावनुगतौ
पथि । सर्वे त्वेतां क्रियां दृष्ट्वा तुष्टुवुः परमेश्वरं ॥१२॥ मध्ये यैरीखवानां तु चलन्तं मुनिदं
तथा । खर्वः को ऽपीक्षितुं वाञ्छन् नाशक्नोद्व्यूहहेतुतः ॥१३॥ असौ मर्त्यो यिरीख्वस्तु कर

संग्राहिणां महान् । नायको बहुवित्ताढ्योऽभवज्जक्कायसंज्ञकः ॥१४॥ ततोऽभिद्रुत्य पुरतः
स द्राक् खृष्टदिदृक्षया । ब्रह्मदारुं समारोहत् पदवीपार्श्वसंस्थितं ॥१५॥ तत्स्थाने समुप
स्थाय येषूस्तु व्यूहसंवृतः । नीचतो वृक्षसंस्थं तं समालोक्येदमब्रवीत् ॥१६॥ श्रीयेषूरु
वाच ॥ हे जक्काय तरोरस्मादवरोहाविलम्बितं । यत एव त्वदीयेऽहमद्य स्थास्यामि
वेश्मनि ॥१७॥ गुरुरुवाच ॥ इदमाकर्ण्य खर्वः सोऽवारोहत्तरुतो द्रुतं । तत आत्मगृहे १९
चापि प्रभुं प्रावेशयन्मुदा ॥१८॥ तद्द्रष्टारः समस्तास्तु पापकर्त्तुर्निकेतने । आतिथ्याय
गतोऽसावित्यनुष्ट्वोचुः परस्परं ॥१९॥ नायकः करहर्त्तृणां स तु पापी स्मृतोऽपि तैः । सरलः
स्वगृहे संस्थं प्रभुमेतद्वचोऽब्रवीत् ॥२०॥ जक्काय उवाच ॥ अहो स्वरिक्थार्द्धमहं ददामि
निष्किंचनेभ्यो यदि चानृतोक्त्या । कस्माच्चिदत्यन्तकरं ह्यगृह्णां तद्वै चतुर्द्धा प्रददामि तस्मै ॥

२१॥ गुरुरुवाच ॥ इदं तदनुतापस्य चिह्नं संज्ञाय सत्तमं । संतुष्टः प्रभुरभ्यूचे तथा तद्गृहसं
स्थितान् ॥२२॥ श्रीयेषूरुवाच ॥ अद्यागतास्मिन् भवने विमुक्तिर्यतोऽयमप्यब्रहसूनुरस्ति ।
अन्वेष्टुमेवापचितं हि वस्तु त्रातुं च भूमौ नरपुत्र आयात् ॥२३॥ गुरुरुवाच ॥ तथा यैरीख
वस्योकः करग्राहिपतेः प्रभुः । त्यक्ष्यन् स्वान्तिमयात्रायां प्रोचेऽतीवदयावचः ॥२४॥ इति
श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि (मत्थायस्य विंशसर्गान्मार्कस्य दशमसर्गाल्लूकस्याष्टा १४८
दशोनविंशसर्गाभ्यां चोद्धृतो) ऽन्धादिविमुक्तिर्नाम द्वाविंशोऽध्यायः ॥

शिष्य उवाच ॥ तदा स प्रचलन्मोक्ता यिरीखूतो महापुरं । किं चकार स्वयात्रायामन्ति
मायां गुरो वद ॥१॥ गुरुरुवाच ॥ पूर्व्वोक्तान्यपि वाक्यानि शृण्वत्सु सहगामिषु । तदा
चापेक्षमाणेषु प्रकाश्यं राज्यमैश्वरं ॥२॥ अतस्तदुपदेशाय यात्राशेषे प्रभुस्तदा । अन्य

दृष्टान्तरूपं तान् वाक्यमेतत्समब्रवीत् ॥३॥ श्रीयेषूरुवाच ॥ कुलजः को ऽपि दूरस्थे देशे राज्यप्रलब्धये । गन्तुमैच्छत् ततः स्वीये पुनरेतुं च नीवृति ॥४॥ अत आदौ समाहूय स्वान्तिके किंकरान् दश । सकर्षं षट्पलं तेषु निदधौ रौप्यमेकशः ॥५॥ यूयमेतैर्धनैर्मे ऽत्र पुनरागमनावधि । वाणिज्यं कुरुताश्रान्तमित्याज्ञाप्य जगाम सः ॥६॥ दुर्हृदस्तु प्रजा देशे
तस्मिन् दूतान् परे ऽनुदन् । वयं राजममुं न स्वीकर्तुकामा इतीरितुं ॥७॥ स तु संप्राप्य १४९
राज्यं तत् पुनरेत्य च किंकरान् । आह्वयत् प्राप्तरूप्यांस्तान् धनवृद्धिप्रबुद्धये ॥८॥ आदिमस्त्ववदन्नाथ त्वद्दत्तपलतो मया । लाभो दशगुणः प्राप्तः कर्षसार्द्धशतद्वयः ॥९॥ अथोवाच नृपः साधु भद्र दास यतो ऽभवः । त्वं क्षुद्रे ऽर्थे ऽपि विश्वस्तो ऽतः स्या दशपुरीपतिः ॥१०॥ द्वितीयस्त्ववदन्नाथ प्राप्तस्त्वद्रूप्यतो मया । लाभः पंचगुणः कर्षसपादैक

ध्नात्मकः ॥११॥ ततस्तमपि भूमीशो ऽभ्यवदत् साधु किंकर । विश्वस्त त्वं तथा पंचपुरे
शो ऽतो भवेरिति ॥१२॥ इतरस्त्ववदन्नाथ निजं पश्यात्र रक्षितं । यत्नतो गात्रमार्जन्यां
सकर्षं षट्पलं मया ॥१३॥ उयस्त्वं हि नरो यन्न न्यदधास्तद् हरस्यपि । नावपो यच्छि
नत्स्येतत् त्वत्तो ऽत्रस्यमहं ह्यतः ॥१४॥ इत्युक्ते तेन भूमीशः प्रत्यवादीत् तवाप्यहं । उक्तेर्विचार
येयं त्वामिदानीं मन्द किंकर ॥१५॥ उयो ऽहं हि नरो यन्न न्यदधां तद् हराम्यपि । १५०
नावपं यच्छिनद्म्येतदिति ज्ञातं त्वया किल ॥१६॥ अतो रूप्यं मदीयं त्वं कथं स्थाने कुसी
दिनां । नार्पयो ऽथाहमात्मीयं सवृद्धि प्राप्नुयां पुनः ॥१७॥ इत्युक्त्वा स परिस्थेभ्यो ऽब्रवीत्
कर्षं सषट्पलं । अस्माद्धृत्वा नराद्दत्त किंकरायादिमाय मे ॥१८॥ इत्याज्ञाप्तास्तु ते नाथ
कर्षसार्द्धशतद्वयं । अमुष्यास्त्यधुनेत्यूचुः सतूचे स्यात्तथापि तत् ॥१९॥ यो दध्याद्धि नर

स्तस्मै देयं भूर्यपि किंतु यः । न दध्यात् तत आकर्ष्य तद्वस्त्वित्यपि वच्मि वः ॥२०॥ किंतु
ये मां नृपं न स्वीकर्तुकामाः पुराभवन् । दुर्हृदस्तान् समानीय हत यूयं मदन्तिके ॥२१॥
गुरुरुवाच ॥ इति दृष्टान्तवाक्यं सो ऽनुगान् प्रोच्य महाप्रभुः । मार्गे यैरूषलेमीये तैर्वृतो ऽचलद्
यतः ॥२२॥ अवशिष्टे च षड्घस्त्रे त्राणपर्वसमागतेः । बेथनीयामुपातिष्ठन्महानगरस
न्निधौ ॥२३॥ पुनर्जीवितलाजारगृहं तर्हि विवेश सः । हृष्यन् यात्रान्तिमक्रोशं राज १५१
यन् स्वपुरे ऽचिरात् ॥२४॥ शिष्य उवाच ॥ भव्यां पूर्णचरित्रस्य यां जिघांसुपुरे ऽचिरात् ।
स्वागतिं दाविदुत्पन्नप्रभोर्गीतसमावृतां ॥२५॥ प्रोवाच स पुरा धूर्तहेरोद्यभृतकान् प्रति ।
तां गुरो श्रोतुमिच्छामि तत्काले ऽत्यन्तिके ऽधुना ॥२६॥ किंतु दृष्टान्तवाक्यं यदीशराज्य
प्रतीक्षिणां । शिष्याणामुपदेशाय यात्राशेषे ऽब्रवीत्प्रभुः ॥२७॥ तद्वै राज्यप्रलब्ध्यर्थे दूरा

ध्वगतिगोचरं । अत्याश्चर्य्यं मया ज्ञातं खृष्टसिद्धिप्रतीक्षिणा ॥२८॥ गुरूरुवाच ॥ अवश्यं
स्वर्गगमनं नित्यराज्यप्रलब्धये । इत्यज्ञातं तदा खृष्टशिष्यैरपि यथा त्वया ॥२९॥ तत्प्रागा
वश्यकी त्वासीदमीषां कुक्रिया नृणां । दुर्हृदां तन्नृपत्वं न स्वीकर्तुमभिलाषिणां ॥३०॥
तस्यास्त्वप्रत्ययो नूनं प्रजाया ऐस्त्रयेलिनां । पश्यन्त्या अपि नम्रस्याशीर्युक्तां राज्ञ आगतिं ॥
३१॥ तज्ज्ञातः सत्प्रभोश्चैवाज्ञातस्याघहृतो बधः । ततः स्वर्गगतस्यापि तस्य दिग्विजयो १५२
महान् ॥३२॥ एतत्सर्व्वप्रबन्धस्ते कथनीयो ऽतिविस्तरात् । आदौ तु श्रूयतां शिष्य
यथोक्तो भव्यवादिना ॥३३॥ इषाय उवाच ॥ गुरुराड्विषयां तु नः श्रुतिं क इह प्रत्ययका
र्य्यमन्यत । किमु कस्य जनस्य गोचरे विभुबाहुर्विजयात्मको बभौ ॥३४॥ नवपल्लववद्धि सद्गुरुः
स समुत्थास्यति तत्समक्षतः । अतिशुष्कधरास्थलात्तथा तरुणं मूलमिवाक्ष्यगोचरं ॥३५॥

न हि तस्य सुरूपता स्थिता न रुचिर्वास्मदवेक्षणार्हिता । अभिदृष्टमपीह तन्मुखं न तदास्मा
भिरभीष्यतेऽनतैः ॥३६॥ मनुजैरवहेलितोऽस्ति सोऽर्द्दितमर्त्यश्च सुवित्तदुःखकः । समप
हुतवक्रवच्च सोऽवमतोऽस्माभिरनादृतोऽपि च ॥३७॥ किल दुःखचयं स नोऽधरत् किल नो
ऽर्त्तीरसहिष्ट स स्वयं । अविदां तु मतः स नो गणैः परमेशाहतपीडितो नरः ॥३८॥ स तु
नो व्रणितोऽप्यधर्म्मतोऽस्मदघेभ्योऽबधि शासनं च नः । तदुपर्यपि सन्धये स्थितं क्षतिभि १५३
स्तस्य चिकित्सनं च नः ॥३९॥ वयमप्यविवन्निजे निजेऽध्वनि सर्वे निहिताननाः भ्रमैः ।
विभुरेव तु नोऽघसंचयं सकलानां तदुपर्यपातयत् ॥४०॥ अत एव स दण्डभाक्कृतो दृढमार्त्तो
ऽपि च मौनमाश्रयत् । अविवत्स इवाहृतो बधेऽविरिवोर्णापरिहृत्सु चारवः ॥४१॥ स सपीड
विचारतो हृतोऽथ तदायुः खलु केन शस्यते । निरभिद्यत जीवतां स्थलान्मम लोकाघत एव

स क्षतः ॥४२॥ कुजनैः सह तस्य च व्यसोर्विहितं गर्ह्यनिखातमेकदा । धनिना तु सह
स्थितः परे मृदि सोऽभूत्समवाप्तमृत्युकः ॥४३॥ अकृतेऽपि च तेन किल्बिषे ह्यनवाप्ते
ऽपि तदुत्थिषु च्छले । व्रणकृद्व्यथया तथापि तं विभुराघातयितुं समैहत ॥४४॥ निजजीवन
मङ्घसे यदा बलिमीशार्पितमुत्सृजेत्तु सः । तत एव निजान्वयोद्भवांश्चिरजीवी स समी
क्षिता मुदा ॥४५॥ अथ तस्य करे विभुस्पृहा प्रणिधेयैष्यति सिद्धिमुत्तमां । फलमात्मपरिश्र १५॥
मस्य चातिशयं वीक्ष्य तदा स तर्प्स्यति ॥४६॥ स च मे परिचारकस्तदा परिशुद्धो बहुलान् स्व
विद्यया । परिशोधयिता यतः फलं तदघानां स सहिष्यते दृढं ॥४७॥ महतां सहभाङ् मया
ह्यतो विभुना कार्य्यं इतः स भूतले । स तथा सह वीरपुङ्गवैररलोप्याणि विभक्ष्यति ध्रुवं ॥
४८॥ स यतो गणितोऽघकृत्सु वै निदधौ जीवमपि स्वयं मृतौ । बहुमानुषपापहृच्च सोऽघ

कृदर्थेऽपि चकार चार्थनां ॥४९॥ गुरुरुवाच ॥ अनघस्य गुरोर्नृणां पापतो दण्डसाहिनः ।
जनैरवमतस्य स्वैर्महतस्त्वीशगोचरे ॥५०॥ सदात्मव्याप्तकविना तथोक्तं वर्णनं पुरा । यथा
दृष्टमभूतेन दूरतः कालदर्पणे ॥५१॥ किंतु पादोनसाहस्रे वर्षाणां वै ततो गते । यदभूद्वर्णि
नस्यास्य भूतले परिपूरणं ॥५२॥ तत् संपूर्णचरित्रस्य येषूखृष्टस्य सत्प्रभोः । सहनोत्थित
माहात्म्यं शिष्य वक्ष्यामि ते परे ॥५३॥ इति श्रीखृष्टसंगीतायां सत्पालकचरित्रपर्व्वणि १५५
(इषायभव्यवाक्यानां त्रिपंचाशत्तमसर्गाल्लूकस्योनविंशसर्गाद्योहन्नेर्द्वादशसर्गाच्चोद्धृतो) यात्राशेषो
नाम त्रयोविंशोऽध्यायः ॥ समाप्तं चेदं चतुर्दशोनद्विशताधिकसहस्रश्लोकात्मकं सत्पालकचरित्र
नामकं तृतीयं पर्व्व ॥

श्रीखृष्टसंगीता

मोक्षमाहात्म्यपर्ब्व

CHRISTA-SANGÍTÁ,

OR THE

SACRED HISTORY

OF

OUR LORD JESUS CHRIST,

IN SANSCRIT VERSE.

BOOK IV.

THE PASSION AND GLORIFICATION.

CALCUTTA:

BISHOP'S COLLEGE PRESS.

1838.

श्रीपित्रे पुत्राय च सदात्मने च नमः ॥ शिष्य उवाच ॥ सत्पालको यो ऽपचिताव्यवाप्त्यै
तन्मुक्तये चावततार नाकात् । स्वे स्वे ऽपि मार्गे निहिताननान् प्राग्भ्रमान्निनीषुः पितरं
प्रतीशं ॥१॥ स्वजीवनं यो ऽविकृते निधातुं पुनश्च तल्लब्धुमपि क्षमो ऽभूत् । निजान्तथाज्ञां
पितुरेव पूर्वं ह्याप्नोद्यथोचे कुहृदो यहूद्यान् ॥२॥ यो ऽव्यक्तवाक्यो ऽपि सुदिष्टधर्म्मो नृदुःखहर्त्ता
पि सुभुक्तदुःखः । यो मृत्युजेतापि जिघांसुहस्ते स्वयं स्वजीवं न्यसितुं जगाम ॥३॥ यो ऽना
दृतो ऽप्यात्ममहत्त्वमन्तैर्ज्ञातो ऽतिदीनैरभिषिक्तराजः । ऐश्वर्य्यसन्ताश्रय आर्य्यशक्तिः सर्व्वार्त्ति
धारी करुणार्णवात्मा ॥४॥ तत्सद्गुरुर्म्मोविषयां श्रुतिं वै सदात्मशक्त्या कविना प्रगीतां । कथं
स्वचित्तेन गुरो ऽवगन्तुं क्षमे तदासक्तहृदप्युताहं ॥५॥ सो ऽन्तः कथं स्यान्महतां सहांशी स दण्ड
भाक् शोधयिता कथं नॄन् । ईशाहतः सो ऽप्युरुलोपभागं वीरैः सहाप्ता कथमुग्रदुःखान् ॥६॥

तत्सर्वंतात्पर्य्यंबुभुत्सयाहं वृत्तस्तवाचार्य्य कथां शृणोमि १ महानगर्य्यां चरमां तु यात्रां श्रुत्वाहमत्यैधितत्तद्विवित्सः ॥७॥ यिरूषलेमे ह्यचिराय भाविनी खृष्टस्य या निःसृतिरेव भूमितः १ महागुरू यद्विषये ऽद्रिशेखरे सहोचतुर्गुर्वधिपेन भास्वता ॥८॥ सावश्यको तस्य हि राज्यलब्धये दूरस्थितस्वर्गगतिर्महीतलात् १ अतीवसान्निध्यमगादिति श्रुतं त्राणोत्सवे ऽपेक्षित ऐस्रयेलिभिः ॥९॥ स्वजीवनोत्सर्गकृते ऽविवत्सवद्यात्रा प्रभोस्तर्ह्युदिता महापुरे १ तद २
न्तिमक्रोश इहावशिष्यते तदद्भुताशेषवचः प्रपूर्त्तये ॥१०॥ गुरुरुवाच ॥ बुभुत्सां तव शिष्याहमितः पूरयितुं भृशं १ बेथनीयागतस्यैव कथयिष्ये क्रियाः प्रभोः ॥११॥ राजवत् स्वपुरे हि स्वात् प्रवेशात् पूर्वमेव सः १ महापर्वसमारम्भात् प्राक् षष्ठदिवसे शनौ ॥१२॥ मार्थायाः संस्थितो गेहे ख्याते नाम्नैव तत्पितुः १ कुष्ठिसीमोनसंज्ञस्य तया स समभोज्यत ॥१३॥

भोजनायोपविष्टेषु लाजारोऽपि स्थितो नृषु । तत्स्वसा च तदा मार्था येश्वः सेवां मुदाकरोत् ॥
१४॥ भगिन्यन्या मरीया तु पंचविंशतिकर्षकं । अतिमूल्यजटामांसीपात्रं चिक्कण
मानयत् ॥१५॥ तन्मुखं च विनिर्भिद्याखिलां पिष्टमिसीं वरां । तद्वीसीनस्य खृष्टस्या
पातयन्मूर्द्ध्नि सिक्तये ॥१६॥ तत्पदौ च तथाभ्यज्य स्वकेशैरप्यमार्जयत् । पूरितं च गृहं
सर्व्वं जटामांस्याः सुगन्धतः ॥१७॥ अथ द्वादशशिष्यैक इष्कार्य्योत्यभिधः शठः । यहूदो ३
निन्दनवचस्तत्क्रियाविषयेऽब्रवीत् ॥१८॥ इष्कार्य्योतियहूद उवाच॥ किमर्थेऽयं व्ययो
ऽकारि किंकृते वेयमुत्तमा । न विक्रीता जटामांसी रजताशीतिकर्षकैः ॥१९॥ अधिकै
र्वापि विपणौ ततस्तन्मूल्यमीदृशं । शक्नुयाम प्रदातुं हि दीनेभ्यो दयया वयं ॥२०॥ गुरुरु
वाच॥ इत्युक्तं न दरिद्राणां कृपार्थं तेन लिङ्गिना । यस्मात्तु तद्गणे सोऽभूत् कोषधृच्चौर्य्यमानसः ॥

२१॥ तस्मात्तत्कोषपूर्त्तिं स ऐच्छदन्ये तु तद्वचः । श्रुत्वा शिष्या दयाकारं तथोचुरविदो मिथः॥
२२ ॥ अनुभूय प्रभुस्त्वेतन्मरीयानिन्दनं कृतं । स्वशिष्यैस्तदसन्तुष्टस्तदा तानिदमब्रवीत् ॥
२३ ॥ श्रीयेषूरुवाच ॥ तिष्ठत्वस्याः क्रिया नार्य्याः किमर्थं यूयमेव तु । क्लेशयध्वे वचोभिस्तां
भद्रकर्म्मविधायिनीं ॥२४॥ सर्व्वदा वोऽन्तिके दीनाः स्थिता नूनं यथेच्छया । अनुग्राह्या नतु
स्थाताहं तद्वद्वोऽन्तिके सदा ॥२५॥ यदशक्नोत्तु तच्चक्रे नार्य्येषा मय्युपस्थिते । मृत्स्थापनाय ४
देहं मेऽभ्यानञ्ज ह्ययतोऽपि सा ॥२६॥ यत्र यत्र सुवार्त्तैषा मन्मृत्युविषया त्वितः । विस्तृता
युष्मदुक्त्या स्यात् समस्ते भूमिमण्डले ॥२७॥ तत्र तत्र क्रियैषापि नार्य्यास्तत्स्मृतये सदा । नरै
र्विख्यास्यते नूनमित्थं शिष्या ब्रवीमि वः ॥२८॥ गुरुरुवाच ॥ मरीयायास्तथा कर्म्माखिलैः
शंस्यमुदैरयत् । मुमूर्षुर्नरमुक्त्यै स लोभेर्ष्यापरिहारकः ॥२९॥ किंत्वेतच्छ्निवाराद्वै मानसं

त्तस्य लोभिनः । इष्कार्य्योतियहूदस्य दुष्टसंकल्प आविशत् ॥३०॥ यत्पूर्त्तैः कालमचिरा
त्तस्मै धूर्त्तो ऽभिशापकः । तमोनाथो ददौ प्राप्तहितस्वसमयः परे ॥३१॥ धनलब्ध्यै ह्यतः
श्रेष्ठयज्वादीनां द्विषां करे । निधातुं स्वामिनं स्वीयं यहूदः समकल्पयत् ॥३२॥ शिष्य
उवाच ॥ कृतघ्नेन कथं तेन सत्प्रभुर्वैरिणां करे । निहितो ऽभूत्तदाश्चर्य्यवाक्यपूर्त्यै गुरो वद ॥
३३॥ गुरुरुवाच ॥ इतश्चतुर्दिने शिष्य तेनाभद्रेण पूरितः । स्वामिविक्रयसंकल्पो यथोत्पन्न
स्तदा हृदि ॥३४॥ अचिरात् कथयिष्ये तत् किन्त्वेतत्कालयोर्द्वयोः । मध्ये यदभवच्छिष्य
श्राव्यं तत्प्रथमं त्वया ॥३५॥ पूर्व्वोक्ताद्भोजनात्त्वाद्यं वक्ष्ये परदिने कृतं । बध्यस्यापि प्रभोः
स्वीये पुण्ये स्वागमनं पुरे ॥३६॥ व्यूहा यैरूषलेम्या हि तं मार्थागृहसंस्थितं । श्रुत्वा तत्रेक्षितुं
जग्मुर्लाजारं च पुरामृतं ॥३७॥ तत्पुनर्जीवनात्ते हि जीवदस्य महागुरोः । ख्रीष्टत्वं

व्यश्वसन् स्वे च प्रत्यैक्षन्तागतिं पुरे ॥३८॥ तेषां यात्रां तु सश्रद्धां विज्ञाय श्रेष्ठयाजकाः ।
लाजारमपि संहर्तुं सयेषूं समकल्पयन् ॥३९॥ शनौ सायं बभूवेदं मध्याह्ने तु रवौ प्रभुः ॥
आरेभे श्रेष्ठवृक्षाद्रेरवतर्तुं महापुरे ॥४०॥ तदा स बेथनीयातो नुदन् शिष्यावधःस्थिते ।
बेथफाग्यभिधे ग्रामे ऽन्तिके ताविदमादिशत् ॥४१॥ श्रीयेषूरुवाच ॥ ग्राममग्रेस्थितं गत्वा
बद्धां तत्राप्स्यथः खरीं । तद्वत्सं चाप्यनारूढं कैश्चित् क्वापि सहस्थितं ॥४२॥ तद्द्वयं मोचयित्वा ६
तु साक्षादानयतं मम । तदा चेत्तु युवां ब्रूयात् को ऽप्येतत्कुरुथः कथं ॥४३॥ इति पृष्टौ वदेतं
तं प्रभोरावश्यकं तयोः । इत्थं श्रुत्वा त्वसौ नेतुं तौ मुदाप्यनुमंस्यते ॥४४॥ गुरुरुवाच ॥
तथोचे प्रभुरार्य्यः स भव्यवाक्यस्य पूर्तये । प्रोक्तस्य जकरीयेणाद्दुजेनेशप्रवाचिना ॥४५॥
शिष्यैरपि तदा यन्न ज्ञातं तदचिरात् प्रभौ । आत्मतेजः प्रपन्ने ऽतस्तैः ख्रिष्टविषयं स्मृतं ॥४६॥

जकरीय उवाच ॥ अतीव प्रहृष्यैव शीयोनकन्ये यतोऽहो नृपस्ते त्वदग्रे समैति । स नम्रो
ऽस्ति धर्म्मी विमुक्तिप्रदायी समासीन आर्य्योऽपि खर्य्याः स वत्से ॥४७॥ गुरुरुवाच ॥ तदा
मर्य्यवचःपूर्त्तिं परे पंचशताब्दके । कृतां खृष्टेन तद्वत्स्वामार्य्यां प्रविशता पुरीं ॥४८॥ खर
वत्ससमासीनयेष्वा नम्रेण धर्म्मिणा । अन्वितेन महाहर्षैः सर्व्वशीयोनवासिनां ॥४९॥ तां
प्रवक्ष्यामि ते शिष्यान्तिमक्रोशे यथाभवत् । यात्रायास्तौ यदा शिष्यौ प्रभुप्रोक्तान्यवापतुः ॥ ७
५०॥ खरवत्सं च तत्राप्त्वानीय च स्वाम्यनुज्ञया । तस्मिन्नास्तीर्य्य वस्त्राणि स्वान्यारोहयतां
प्रभुं ॥५१॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (जकरीयभव्यवाक्यानां नवमसर्गाद्
योहन्नेर्द्वादशसर्गान्मत्थायस्यैकविंशषड्विंशसर्गाभ्यां मार्कस्यैकादशचतुर्दशसर्गाभ्यां लूकस्योन
विंशसर्गाच्चोद्धृतो) मुमूर्षुर्देहाभ्यञ्जनं नाम प्रथमोऽध्यायः ॥

गुरूरुवाच ॥ कः पूर्वदिक्स्थसरणौ बहुराय्यपुर्य्यां व्यूहो निरेति परिहर्षनिमग्नचेताः ।
आश्रेष्ठवृक्षगिरि पद्धतिमेव सर्वां संपूरयन् परमभूभुगपेक्षणोत्क्या ॥१॥ हस्तैर्धरन्ति बहव
स्तृणराजवृन्तान्यागन्तुरप्यधिपतेर्जयलक्षणार्थं । उद्धृत्य चित्रवसनानि निजानि चान्ये स्तृण्व
न्त्यधो ऽपि तदुपर्ययनाय राज्ञः ॥२॥ अन्ये तथा तदुरुसंहतिमध्यसंस्थाः श्रेष्ठद्रुमेभ्य इह
खल्ववलूय शाखाः । सर्वत्र वर्त्मनि मुदाप्यतिचारुपत्राः स्तृण्वन्त्यधः परमराट्सृतिभूषणाय ॥ ८
३॥ सत्पार्थिवस्तु स यदाववतार शैलात् सर्वे तदा वरजयध्वनिमूचुरुच्चैः । प्रत्नस्य राज्ञ उरु
कीर्त्तिमतो वचोभिस्तच्छ्रेष्ठपुत्रविषयैः किल दाविदस्तैः ॥४॥ यहूद्या ऊचुः ॥ आयाति यो ऽत्र
परमेश्वरनामशक्त्या धन्यो ऽस्तु स प्रणत ईश्वरसद्मसंस्थैः । त्राहीश नो वितर चात्मकुलाय
भद्रं त्राहीश्वरेति वचसाधिपमाश्रयेम ॥५॥ आयाति यः स्वपितृराज्यविवृद्धये नो धन्यो ऽस्तु

स प्रथितदाविद आर्य्यपुत्रः । त्राहीश नोऽद्य हि तदद्भुतकर्म्म दृष्ट्वा तत्स्थापितेऽश्मनि वरे
मुदिता भवेम ॥६॥ आयाति योऽत्र हि न उज्ज्वलदस्य नाम्नेशस्योत्तमक्रतुहुतस्य स मङ्गलो
ऽस्तु । त्राहीश्वरेति भुवि सन्धिकृते प्रगेयं स्वर्गेऽपि चोर्द्ध्वतमवासिगणैः प्रकीर्त्यं ॥७॥
गुरुरुवाच॥ इत्थं तदग्रगगणा अनुगाश्च नेदुस्तालीयवृन्तविधृतः प्रभुमीडयन्तः । तैरावृतश्च
खरशिश्वधिरूढ एवाधीशोऽभ्यगात्सुविनयः स यिरूषलेमं ॥८॥ लाजारमृत्युविजयं प्रभुणा ९
कृतं हि ये पूर्व्वमेव ददृशुस्तममी प्रतीयुः । व्यूहस्तदापि च तदद्भुतकर्म्म शृण्वन् मृत्युञ्जयं
सकलराजममन्यतातः ॥९॥ तेषां विलोक्य तु फरीष्यगणाः प्रतीतिं त्राहीश्वरेति विजयध्वनि
ना विभान्तीं । एतद्गुरोश्चिरविरोधनतोऽधुनाहो किं वः फलं तमनुयाति जगद्ध्यशेषं ॥१०॥
इत्यूचिरेऽर्द्दितहृदो मिथ ईर्ष्यया ते शेषा जनास्तु सकलाः प्रशशंसुरुच्चैः । ऐशक्रियास्मरणहृष्टहृदो

अथ कोचिद्दुहितफरोष्यकगणे प्रभुमप्यवोचन् ॥११॥ स्वामिन्नियत्स्तुतिगिरोऽनुचिताः प्रवक्तुं शिष्यान्निवर्तय निजानिति तूदितः सः । नम्रोऽधिपोऽवदद्दिमे यदि नीरवाः स्युस्तर्हुन्न देयुरुपला अपि भद्रनुत्यै ॥१२॥ इत्युक्तवांस्तु स यदातिसमीपसंस्थं कान्तं पुरं परिददर्श महोपलाढ्यं । तद्वासिनामघफलं करुणार्द्रचित्तो जानंस्तदा किल रुरोद जगाद चैव ॥१३॥ श्रीयेषूरुवाच ॥ अहह त्वमदम्यमानसे पुरि मेऽस्मिन् दिवसे यदि स्वके । कुशलानि निजान्यवेस्तदा कियदाप्यं सुफलं त्वयाप्यतः ॥१४॥ अधुना त्विह तानि तेऽक्षितः परिगुप्तान्यभवन् समन्ततः । कुशलाविदि चाचिरात्परे त्वयि दुष्टो निपतेद्दिनव्रजः ॥१५॥ परितो हि तवारयस्तदा परिखां कुर्य्युरतीवकोपिनः । परिवेष्टितया च तैस्त्वया दृढपीडा समवाप्स्यते तदा ॥१६॥ अथ भूमितलेऽपि निर्दयं दलनीया त्वमहो द्विषां बलैः । तव चान्तर एव

सूनवो हननीया असिभिर्दुरात्मनां ॥१७॥ उपलोपरि चोपलो ऽप्यतो न विहातव्य इहालयेषु ते । यत एव निजावलोकनागतकालं त्वमवेर्न किंचन ॥१८॥ गुरुरूवाच ॥ इत्युक्तवान् सदय आगत ईशनाम्ना शोयोनभूभुगवलोकनकालशेषे । श्रेष्ठद्रुमाद्रितलतिष्ठदुपत्यकान्ते किद्रोणसंज्ञसरितं द्रुतगां ततार ॥१९॥ अभ्यर्णतां तत उपेत्य महापुरस्य न्यूहैर्वृतः क्रमश एव विवर्द्धमानैः । तत्संस्तुतो ऽपि च तदा नगरस्य कान्तं प्रागुदिक्स्थगोपुरमिह प्रविवेश ११ नाथः ॥२०॥ विष्टे तथा सदधिपे तु यिरूषलेमं त्राहोश्वरेति नदतां सहिते गणेन । संक्षुब्धमेव सकलं नगरं बभूवाशेषैश्च पृष्टमिति को ऽस्त्ययमाप्तनूतिः ॥२१॥ गालील्यदेश नगरान्नशरेदभिख्यादीशप्रवाच्यमिहागत एव येषूः । इत्थं ददौ प्रतिवचः स्तुतिकर्तृवृन्दं त्राणोरसवार्थसमुपस्थितसर्वनृभ्यः ॥२२॥ रथ्यास्वतीव महतो नगरस्य खृष्टो ऽमे ऽतश्चचाल

भृतकान्वित आर्य्यराजः । त्राहीश्वरेति च सुसंस्मृतकाव्यवाक्यैः सस्वान सर्वमिव तैः पुर
मोघगातैः ॥२३॥ तद्वज्जयध्वनिकृदन्वित ईशपुत्र ईशार्य्यमन्दिरसमीप उपस्थितो ऽभूत् ।
तत्रावरुह्य खरवत्सत इव नम्रः पुण्याजिरेष्वविशदोघवृतो निजेषु ॥२४॥ तत्राखिलानि
परिदृश्य मलापहत्यै सायं तदा सति गतेषु च दुर्बणिक्षु । पुण्यालयस्य परिपालक इव खृष्टः
श्रेष्ठदुपर्व्वतमुपैतुमियेष भूयः ॥२५॥ किंत्वन्धखञ्जुनिकुरम्बमिह प्रविष्टं मोक्तुस्तदा सदय १२
शक्तिफलान्यवाप्तुं । स त्वात्मसद्मनि तदा स्थित आर्य्यराजः सुस्थीचकार सकलान् करुणा
र्णवात्मा ॥२६॥ साध्यापकाः परमयज्वगणास्तु सर्वाश्चर्य्यक्रिया इह सुनम्रनृपस्य दृष्ट्वा ।
त्राहीश्वरेति तनयाय तु दाविदोऽस्मै येष्वे नमोऽस्त्विति शिशूनमपि प्रबुध्य ॥२७॥ ईर्ष्या
विरक्तहृदया अभवन्नमुष्य खृष्टत्वसाक्षिनिकरैर्विभुसद्मसंस्थैः । तं चोचुरेव कुपिता न

शृणोषि किं त्वं रेऽज्ञैस्तवेश्वरवदेव कृतां प्रशंसां ॥२८॥ इत्थं निशम्य परमेश्वरपुत्र आर्य्य
स्तेषां वचांसि कुहृदामहरोणजानां । तान् प्रत्युवाच खलु तद्वचनं शृणोमि यूयं तु नापठत
किं नृपदाविदुक्तं ॥२९॥ स्वर्गोपर्य्यपि गौरवं निहितवान् स्वीयं विभो नाथ नो भूमौ त्वं स्तन
पायिनामपि मुखान् प्राप्नोः शिशूनां स्तुतिं । तेषां क्षीणवचोभिरेव सुदृढां शक्तिं त्वमस्था
पयस्तूष्णीं कर्त्तुमतिप्रचण्डमनसोऽप्युर्व्वीस्थितान् वैरिणः ॥३०॥ गुरुरुवाच ॥ इत्थं प्रत्ननृ १३
पस्य कीर्त्तितगिरा तद्वंश्य ईशात्मजोऽमूंस्तूष्णीमकरोत् स्वगौरवरिपून् शक्तान् प्रचण्डात्मनः।
शिश्वावध्यखिलैश्च तद्भवनतो व्यूहैर्विभोरालये सन्ध्यान्ते वरशिष्यषड्द्वयवृतोऽतो बेथ
नीयां गतः ॥३१॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (द्वाविंशोतानामष्टमा
दष्टादशाधिकशततमाच्च मत्थायस्यैकविंशसर्गान्मार्कस्यैकादशसर्गाल्लूकस्योनविंशसर्गाद् यो

हन्नेडीदशसर्गाद्वोद्धृतः) पुण्यसप्ताहारम्भणे रविवारचरित्रसूचकः सद्राजप्रवेशो नाम द्वि
तीयोऽध्यायः ॥

गुरुरुवाच ॥ पुण्यस्योक्तस्य ख्रष्टीयैः सप्ताहस्य ह्युपक्रमे । यदभूद्रविवारेऽस्मिन् प्राङ्महा
ज्ञाणपर्व्वणः ॥१॥ दाविदुद्भवराजस्य स्वे पुरे मन्दिरेऽपि च । जकरीयमलाकीयादिभिः
प्रोक्तं प्रवेशनं ॥२॥ कथितं तन्मया शिष्य किंतु तद्वाक्यपूर्त्तये । अर्च्चिनां शोधनायैव वहि १४
ष्कृत्यै मलस्य च ॥३॥ मोक्ता पावकरूपेण यत्कृतं निजमन्दिरे । सोमवारे परे तत् त्वं शृणु
मे गदतोऽधुना ॥४॥ शयित्वा बेथनीयायां प्रभुरार्य्योऽरुणोदये । वृतो द्वादशशिष्यैः स्वैर
भीयाय महापुरं ॥५॥ पथिमध्ये बुभुक्षुस्तु बहुपर्णमुडुम्बरं । दूराद्दृष्ट्वान्तिकेऽगच्छत् फल
लाभप्रतीक्षया ॥६॥ दलमात्रं तु तत्राप्त्वानायातफलकालके । उचे त्वत्तः फलं कोऽपि मा

भवथाच्छाश्वतीः समाः ॥७॥ इत्युक्तं च तदाशृण्वन् शिष्याः सत्स्वामिना निजे । येरूषलेम कोद्याने चिरादन्विच्छता फलं ॥८॥ अदम्या तु पुरो स्वीयावलोकसमयाबुधा । वाह्यधर्म्मी दलाप्लापि ददती नतु सत्फलं ॥९॥ नित्यशुष्कतया दण्ड्या तदा स्वप्रभुणा दृढं । गुप्तेषु कुशलेष्वेवाक्षितस्तस्याः समन्ततः ॥१०॥ तल्लक्ष्मोडुम्बरः शुष्को भूतः प्रभुगिरा क्षणात् । प्रागच्छत् स तु शिष्यैः स्वैस्तदर्थाविद्भिरन्वितः ॥११॥ अथ द्वादशभिः सार्द्धं तैर्विवेश महा पुरीं । स्वावलोकाविदं प्रातर्मन्दिरे चाप्युपस्थितः ॥१२॥ तद्वाह्याजिरमाविश्य परदेशाजिराभिधं । अन्यजैः केवलं गम्यं यत् सत्यार्च्चावलम्बिभिः ॥१३॥ पूर्णं तत्प्राप सद्राजो महापर्व्वसमागतैः । मेध्यादिक्रेतृविक्रेतृगणैर्लुब्धैर्यहूदकैः ॥१४॥ अकस्मात् यथोक्तं स्वे प्रभुरागत आलये । वाङ्मात्रेणाखिलान् क्षिप्रं वहिरद्रावयत्ततः ॥१५॥ बणिजां तत्र वीथीश

परिचर्य्यै सरोप्यकाः । स्थापिता बलिदात्रर्थे समस्ताः सोऽक्षिपद्भुवि ॥१६॥ तद्वत्कपोत
विक्रेतृवर्गाणामासनानि सः । अधश्चिक्षेप पुण्येशालयमार्जनहेतवे ॥१७॥ न किंचिन्नापि
पात्रं स ऐहिकार्थोपकारकं । अनुजज्ञे समानेतुं पारमार्थ्यगृहाजिरे ॥१८॥ तत्कृत्वा
मन्दिरस्थान् स सकलान् यज्वनोऽपि च । लाभार्थे तदनुज्ञातृनिदं प्रभुरुपादिशत् ॥१९॥
श्रीयेषूरुवाच ॥ समस्तान्वयार्थेऽपि खल्वालयो मे सदा प्रार्थनामन्दिराख्यो भुवि स्यात् । १६
इतीशप्रवक्त्रोदितं किंतु यूयं परास्कन्दिगर्त्तं तमेतर्हि चक्र ॥२०॥ गुरुरुवाच ॥ इषायस्य
तथा वाचा परदेशकृतेऽपि तत् । शुद्धीकार्य्यमुपादिश्य सवाह्याजिरमन्दिरं ॥२१॥ प्रोच्य
सर्व्वान्वयानां च विभोः पुण्यतमालये । प्रार्थनायै समाह्वानं कार्य्यं स्वक्रतुनाचिरात् ॥२२॥
यिरिमीयस्य वाचापि मन्दिरस्थैस्त्रयेलकान् । अनिन्द्रत्कुर्व्वतो लुब्ध्या तत् परास्कन्दि

गर्त्तवत् ॥२३॥ अतिक्रुद्धास्ततो भूताः प्रधाना याजकास्तदा । साध्यापकाः प्रभौ तत्र शक्तिं दर्शयतीदृशीं ॥२४॥ तं तद्वाश्चर्य्यकर्त्तारं व्यूहनूत्नोपदेशदं । हन्तुमैच्छन् महेर्ष्यीतो ऽत्र स्थैस्तु निपुणा अपि ॥२५॥ सर्व्वसामान्यवर्गो हि तत्क्रियौघातिविस्मितः । अद्रवन्मन्दिरे श्रोतुं नम्रराजोपदेशनं ॥२६॥ तद्वत्प्रत्नकविद्वयस्य वचनैः ख्यातैः स ईशात्मजो ऽमूंस्तूष्णीम करोत्परान्वयरिपून् लुब्धान् विभोरालये । तावत्यह्न्युपदिश्य चेह सकलैस्तत्रस्थितौघैर्नतः 17
सन्ध्यान्ते वरशिष्यषड्‌द्वयवृतो ऽतो बेथनीयां गतः ॥२७॥ इति श्रीखृष्टसंगीतायां मोक्तृमाहात्म्यपर्व्वणि (इषायभव्यवाक्यानां षट्‌पंचाशत्तमसर्गाद् यिरिमीयभव्यवाक्यानां सप्तमसर्गान्मलाकीयभव्यवाक्यानां तृतीयसर्गान्मत्थायस्यैकविंशसर्गान्मार्कस्यैकादशसर्गाल्लूकस्योनविंशसर्गाच्चोद्धृतः) पुण्यसप्ताहसोमवारचरित्रसूचकः सर्व्वान्वयप्रार्थनालयशोधनं नाम तृतीयो ऽध्यायः ॥

शिष्य उवाच ॥ सूर्य्याहे स्वागतिं प्राप्तः स्वालये तत्र चान्यजान् । परे ऽह्याहूतवान् किं
स मङ्गलाहे ऽकरोद्गुरो ॥१॥ गुरुरुवाच ॥ मार्थागेहे शयित्वा स प्रागिवाथारुणोदये । वृतो
द्वादशभिः शिष्यैरभीयाय महापुरं ॥२॥ ततो वर्त्मन्युपस्थाय ह्योदृष्टोडुम्बरस्थले । आमूलं
शुष्कमाप्त्वा तं शिष्या विस्मयमाययुः ॥३॥ प्रस्तरश्च ततो ऽवादीदहो यमशपस्तरं । बहु
पर्णं कियच्छीघ्रं गुरो ऽयं शुष्कतां गतः ॥४॥ इति संश्रुत्य तेनोक्तं सर्व्वशिष्यार्थवादिना । प्रभु १८
र्निष्फलनाशाङ्कदातोवाचाखिलानिदं ॥५॥ श्रीयेषूरुवाच ॥ ईशे श्रद्धेव युष्माभिर्निःशङ्कं
क्रियतामतः । न कार्य्यं केवलं तद्वद्यन्मयोडुम्बरे कृतं ॥६॥ किंतूत्थाय पताब्धौ त्वमि
त्युक्तो गिरिरप्ययं । युष्माभिर्दृढविश्वासैर्विशङ्कैस्तत्करिष्यति ॥७॥ इत्थं वो वच्म्यृतं
यद्यत्त्वाप्तिविश्वाससंयुताः । याचथ प्रार्थनास्वेव यूयं तत्प्राप्स्यथ ध्रुवं ॥८॥ गुरुरुवाच ॥

इति श्रेष्ठद्रुगिरितो ऽवरुह्योवे महागुरुः । अथ प्रातर्महापुर्य्यां मन्दिरे ऽपि च सो ऽविशत् ॥९॥
ततो याजकशार्द्दूलाः प्रधानाश्च यहूदिनां । ह्यस्तनक्रेतृनिःक्षिप्त्या प्राक्स्वागत्या च रोषिताः ॥
१०॥ मन्दिरे परिगच्छन्तं प्रभुमभ्येत्य यत्नतः । सशास्त्राध्यापका एतत् पप्रच्छुर्दुष्टमानसाः ॥
११॥ प्रधाना ऊचुः ॥ कर्म्माण्येतानि केन त्वमैश्वर्य्येण करोष्यहो । त्वयि को वेयदैश्वर्य्यं निद
धावीशसद्मनि ॥१२॥ श्रीयेषूरुवाच ॥ एकं युष्मानहमपि प्रक्ष्याम्याप्नोत्तरस्तु वः। तदा वक्ष्यामि १९
केनैतान्यैश्वर्य्येण करोम्यहं ॥१३॥ जकरीयजयोहन्निकीर्त्तितं स्नापनं हि वः । कुत आयात्
किमु स्वर्गात् किं वा मानुषमात्रतः ॥१४॥ गुरुरुवाच ॥ इमं श्रुत्वा प्रभोः प्रश्नं व्यमृशंस्ते पर
स्परं । किमेतत्पृच्छते ऽमुष्मै दद्याम वयमुत्तरं ॥१५॥ योहन्निस्नापनं स्वर्गजातमुच्येत
चेत्तदा । वक्तासौ किं कृते यूयं तं न प्रत्यैत खल्विति ॥१६॥ ब्रूयाम तु नरोत्थं चेत्तदास्मान्

हन्युरस्मभिः । व्यूहाः सर्व्वे हि योहन्निं जानन्तीशप्रवाचिनं ॥१७॥ इत्थं विचार्य्य धूर्त्तास्ते
प्रत्यूचुर्व्यूहभीतितः । न विद्मः स्नापनं तस्य कुतः समुद्भूदिति ॥१८॥ अथ तानब्रवीद्येषूरतो
ऽहमपि वो नहि । प्रतिवक्ष्यामि केनैतान्यैश्वर्य्येण करोमि वै ॥१९॥ युष्माभिस्त्वपि किं
ज्ञातं नरः कोऽपि स्वपुत्रयोः । अभ्येत्यैकं निजद्राक्षां कार्य्यार्थे गन्तुमादिशत् ॥२०॥ स त्व
वादीन्न गन्तास्मीत्यथो स्वाधर्म्मतः परे । अनुतप्य पितुर्द्राक्षां तत्कर्म्माचरितुं ययौ ॥२१॥ २०
तथान्यं पुत्रमभ्येत्य पिता तत्रैतुमादिशत् । सतूचे याम्यहं नाथेत्यथो नायात्कदाचन ॥२२॥
एतयोः कतरः स्वीयपितुराज्ञामपालयत् । इति पृष्टा अवोचंस्ते प्रथमाज्ञां य आप सः ॥
२३॥ इत्थं श्रुत्वाब्रवीद्येषूः करसंग्राहकास्तथा । वेश्याश्चाप्यैश्वरं राज्यं युष्मत्प्राक्
प्रविशन्त्यहो ॥२४॥ इत्थं वो वच्म्यहं सत्यं धर्म्माध्वन्यागतं हि वः । योहन्निं करसंग्राहि

वर्गी वेश्याश्च मेनिरे ॥२५॥ धर्म्माकारास्तु यूयं न मेनिध्वे नानुतेप च । तेषां शुद्धिं
समीक्ष्यापि सद्विश्वासार्थमात्मनां ॥२६॥ इति प्रोच्य प्रधानान् स यहूद्यान् धर्म्मलिङ्गिनः ।
मोक्षैश्वर्य्यनिरोधेच्छून् परे ऽन्यदवदद्वचः ॥२७॥ श्रीयिषूरुवाच ॥ नवं शृणुत दृष्टान्तं गृहस्थः
को ऽपि वित्तवान् । द्राक्षोद्यानं विनिर्म्माय परिखां परिखन्य च ॥२८॥ तदन्तश्च खनि
त्वापि रसनिष्पीडनावटं । स्थापयित्वा च तन्मध्ये मंचमूर्द्धस्थितं शुभं ॥२९॥ तत्सर्वं च २१
समर्प्यैव केषुचित् कृषकेषु सः । परदेशं ततो ऽगच्छच्छङ्कारहितमानसः ॥३०॥ आगते फल
पक्कत्वकाले तु कृषकान्प्रति । प्रेरयामास भृत्यं स द्राक्षायाः फललब्धये ॥३१॥ ते त्विमं
किंकरं धृत्वा बलान्निजगृहुर्दृढं । शून्यहस्तं च दुर्वाग्भिः प्राणुदन् स्वामिनं प्रति ॥३२॥
ततो ऽन्यमपि भृत्यं स प्रैरयत् कृषकास्तु तं । दृषदाहतमूर्द्धानं सलज्जमनुदंस्तथा ॥३३॥

अथान्यं प्रेरयत् स्वामी जघ्नुस्तु कृषका अमुं । बहूंश्चापीरितानन्यानाजघ्नुर्जघ्नुरेव च ॥३४॥
अथोचे ऽधीश्वरो ऽहं किं कुर्य्यामात्मसुतं प्रियं । तान् प्रति प्रेरयिष्ये ऽन्त आद्रियेरंस्तमेव
ते ॥३५॥ एवं तेन कृतं किंतूद्याने ते कृषकास्तदा । स्वनाथैकसुतं बुद्ध्वायात्तमूचुः पर
स्परं ॥३६॥ दायादो ऽयमहो ऽस्माभिरिदानीं हन्यतां ततः । अधिकारो ऽस्मदीयः
स्यादित्युक्त्वोद्यानतो बलात् ॥३७॥ निरस्य स्वामिपुत्रं ते ऽबधन् किंतु पतिर्यदा । आगन्ता २२
किं तदा कुर्य्यात् कृषकानिति वो मतं ॥३८॥ प्रधाना ऊचुः ॥ सम्यग्घन्ता स तान्दुष्टान्
द्राक्षोद्यानं नवेषु तु । निधाता कृषकेषु स्वं कालयोग्यफलाप्तये ॥३९॥ गुरुरुवाच ॥
इत्यूचुः प्रभुदृष्टान्तार्थाज्ञास्ते किंतु तत्परे । एवं तेभ्यो ऽचिरात् कुर्य्यात् स्वामीत्युक्तवति
प्रभो ॥४०॥ स्वीयं कुकृषकत्वं ते जिघांसुत्वं च तद्गिरा । इङ्गितं किल विज्ञाय विभु

वाक्यावहेलिनः ॥४१॥ मा भूयादित्यवोचन्त भीताः स्वस्थितिनाशतः । श्रेष्ठयज्वादयः किंतु तान्प्रत्यूचे विभोः सुतः ॥४२॥ श्रीयेषूरुवाच ॥ पुण्यग्रन्थेषु युष्माभिः किं नाधीतं कदाचन । दाविदः सन्नृपस्यैतत् स्वपुत्रविषयं वचः ॥४३॥ निर्म्मायका यमवमत्य निराम्रेवाश्मानं स मन्दिरवरोपलतां जगाम । ईशोत्थितं तदतिविस्मयकारि नोऽग्रे तेनार्पिते ह्यपि वयं मुदिता भवेम ॥४४॥ इत्युक्तानुक्रमान्नूनं युष्मत्तोऽपहरिष्यते । ऐश २३
राज्यं निधेयं च तद्योग्यफलदातरि ॥४५॥ कुलेऽन्यस्मिन्नपीत्येव वच्मि युष्मानसंशयं । दुष्टान्निर्मायकानीशस्थापिताश्मनिरासकान् ॥४६॥ एतदश्मोपरि तु यः पतेत् स किल भंक्ष्यते । यस्मिंस्त्वेष पतेदश्मा स चूर्णः स्यात् समन्ततः ॥४७॥ गुरुरुवाच ॥ तद्दृष्टान्तं फरीष्यास्तु श्रुत्वा सश्रेष्ठयाजकाः । अविश्वस्ता विभूद्यानपालकाः सद्विरोधिनः ॥४८॥

स्वनाशविषयं जग्मुरतः कोपविमोहिताः । दायादं हन्तुमैच्छंस्तमीश्वरैकसुतं प्रियं ॥
४९॥ तत्काले च बलाद्धर्तुमिच्छन्तोऽपि भयान्नृणां । येषूवाक्यादराणां तदशक्तत्वमवा
प्नुवन् ॥५०॥ अतस्तं रौम्यभूपायेऽभिशापैर्म्यूहवर्जितं । कथं मृत्युं नयेयुस्ते मन्त्रणार्थे
बहिर्गताः ॥५१॥ तदा स सकलव्यूहेश्शात ईशप्रवाचकः । तानन्यमपि दृष्टान्तं शुश्रूषू
नवदत्स्फुटं ॥५२॥ श्रीयेषूरुवाच ॥ उपयामोत्सवस्यैव स्वर्गराज्यं समं स्थितं । युवराज २४
कृते पित्रा प्रस्तुतस्यार्य्यभूभुजा ॥५३॥ तत्काले त्वागते राजानुदङ्भृत्यान् दिशं दिशं ।
निमन्त्रितगणं सर्व्वमाह्वातुं ह्युत्सवं प्रति ॥५४॥ तत्क्षणे तु न कोऽप्यायादतोऽन्यानपि भूमिपः ।
भृत्यानादिशदभ्येतुं वक्तुं चेदं निमन्त्रितान् ॥५५॥ अहो उक्षादिमेधो मे भूरिभोजनवस्तु
च । युष्मभ्यं प्रस्तुतं सम्यगायातोद्वाह आश्विति ॥५६॥ तद्वाक्यं त्ववहेलन्तस्तेऽखिलाः

स्वस्वकर्म्मणे । स्वक्षेत्रे केचिदन्ये तु स्वबाणिज्ये तथा ययुः ॥५७॥ इतरे च नृपप्रेष्यान् समाक्रम्य बलात्तदा । दुर्व्वचोभिः प्रहृत्यैवानाशयन्नतिदुर्हृदः ॥ ५८ ॥ तच्छ्रुत्वा तु नृपः क्रुद्धः सेनां प्रेष्य नरानमून् । घातकान् घातयामासादाहयच्चापि तत्पुरं ॥५९॥ अथोवाच स्वभृत्यान् स विवाहोत्सव एष मे । प्रस्तुतोऽस्ति तदर्हास्तु नासन् पूर्व्वनिमन्त्रिताः ॥६०॥ अतः शृङ्गाटकेष्वेव यूयं निर्गत्य यत्नतः । यान् यानाप्नुथ तान् सर्व्वान् ममात्राह्वयतोत्सवे ॥६१॥ इत्याज्ञानुक्रमाद् भृत्या यान् यान् रथ्यास्ववाप्नुवन् । मन्दान् भद्रांश्च तान् सर्व्वान् समगृह्णन्नृपालये ॥६२॥ ततः संपूरिते गेहे विवाहोत्सवयात्रिभिः । आसीनं तत्क्षणं तत्रागच्छद्राजा समीक्षितुं ॥६३॥ तत्रापरिहितोद्वाहवस्त्रं कंचिद्ददर्श सः । भोक्तृमध्ये समासीनमभ्यवादीदिदं च तं ॥६४॥ कुतोऽपरिहितोद्वाहांशुकोऽत्र त्वं प्रविष्टवान् । हे मित्रेत्युदितोऽसौ तु नीरवोऽभूत्सम

त्ततः ॥६५॥ अतः परिचरान् राजाब्रवीद् बद्धकरांघ्रिकं । इममुत्तोल्य वाह्ये ऽतस्तिमिरे विनिरस्यत ॥६६॥ तर्हि स्यात्क्रन्दनं घोरं दन्ताघातस्वनो ऽपि च । समाहूता हि बहवो ऽल्पे विशिष्टा भवन्ति तु ॥६७॥ गुरूरुवाच ॥ इत्थमुक्तवतीशस्यात्मजे खल्वैस्त्रयेलिनां । अप्रतीतिं ततश्चैवाह्वानमन्यकुलोद्भवां ॥६८॥ ईशार्य्यमण्डले चान्तराहूतानां किलोचितं । युद्धत्वं दण्डमुग्रं च तद्धीनानां नृणामिह ॥६९॥ तदाभ्यायन् फरीष्याणां केचिद्धेरोद्यकैः २६ सह । अभिशापनिदानाप्त्यै नुन्ना नार्थैर्जिघांसुभिः ॥७०॥ ते प्रभुं प्रति गच्छन्तो धर्म्मजिज्ञासुताछलात् । नम्रा इव वचः प्रोचुरादराकारकं तथा ॥७१॥ फरीष्याद्य ऊचुः ॥ सत्यरूपस्त्वमाचार्य्य विभुमार्गोपदेशकः । नृसन्तोषेच्छया हीनस्तदतुष्टिभयेन च ॥ ॥७२॥ अतस्त्वां वयमायाता जिज्ञासार्थे किमूचितं । करं दातुं न वाब्राह्मैर्भिन्नधर्म्माय

भूभुजे ॥७३॥ अस्मत्संशयहत्यर्थमेतज्ज्ञापय नो गुरो । किं देयः किं न वास्माभिः करो
रौप्येशकैशरे ॥७४॥ गुरुरुवाच ॥ इत्युक्तेर्धूर्त्ततां तेषां सर्वज्ञो ऽनुममे प्रभुः । अतो ऽवादीत्
परीक्षध्वे कस्मै मां धर्म्मलिङ्गिनः ॥७५॥ कररौप्यमिदानीं मां यूयं दर्शयतेत्यथो । ते तं
प्रत्यानयन् रौप्यकर्षपादं सुमुद्रितं ॥७६॥ सो ऽब्रवीत्तांस्त्वियं मूर्त्तिः कस्यैतैश्चाक्षरैरपि ।
लिखितं कस्य नामेति प्रत्यूचुस्ते तु कैशरः ॥७७॥ अथोवाच प्रभुर्यानि कैशरः सन्ति २७
कैशरे । तानि यच्छत यान्येवमीशस्येशाय तानि तु ॥७८॥ तथा प्राप्तोत्तरास्ते वै सर्व
व्यूहस्य सन्निधौ । धूर्त्ता भग्नपरामर्शा विस्मयं प्राप्य निर्ययुः ॥७९॥ हैरोद्यकफरोष्याणां
निवृत्ते वञ्चने तथा । हेतुं तदभिशापस्य पीलाताग्रे विदुण्ढतां ॥८०॥ तदा येषू समभ्येत्य
परलोकावमानिनां । शादूक्यानां नराः केचित् परीक्षार्थे ऽब्रुवन्निदं ॥८१॥ शादूक्या ऊचुः॥

हे गुरो मोसिनोक्तं नः को ऽप्यपुत्रो म्रियेत चेत् । तदा तत्कुलरक्षार्थं तत्स्त्रीं भ्रातोद्वहेदिति ॥
८२॥ अस्मन्मध्ये तु सप्तासन् भ्रातरो ज्येष्ठ एषु तु । परिणीयासुते प्रेते ऽनुजो जग्राह
तत्स्त्रियं ॥८३॥ तथा तस्मिन्नपुत्रे तु मृते भ्रातेतरः स्त्रियं । गृहीत्वातनयः प्रेतस्तद्वदन्ये
ऽपि चाखिलाः ॥८४॥ तथा प्रेतेषु सर्वेषु सप्तभ्रातृष्वसूनुषु । शेषे सापि ममार स्त्री तत्समस्त
गणावला ॥८५॥ अतस्तेषां महाचार्य्य भ्रातृणां कतमस्य सा । गतासुपुनरुत्थानकाले पत्नी २८
भविष्यति ॥८६॥ गुरुरुवाच ॥ इत्युक्तं तैरविश्वासैः पुनरुत्थानहेलया । संश्रुत्य प्रभुरे
तत्तान् वचः प्रत्यवदत्स्फुटं ॥८७॥ श्रीयेषूरुवाच ॥ पुण्यशास्त्राविदो यूयमीशशक्त्यविदो ऽपि
च । मृतानां पुनरुत्थाने महाभ्रान्तिं समागताः ॥८८॥ उत्थास्यन्ति पुनर्ये हि परलोकार्ह
मानुषाः । नोद्वहन्ति न वोह्यन्ते स्वर्गदूतात्मकाः स्थिताः ॥८९॥ न मर्त्तुमपि वा तत्र

शक्नुवन्ति कदाचन । ईशपुत्रनिभीभूताः पुनरुत्थानजा ध्रुवं ॥१०॥ यत्तु तद्विषये शास्त्रे पुरा
लिखितमैश्वरे । तन् किं न पठितं क्वापि युष्माभिर्भ्रान्तमानसैः ॥११॥ अहमीशो ऽब्र
हस्यास्मीशहकस्येश एव च । याकोबाख्येस्त्रयेलस्याहमेवेशो निरन्तरं ॥१२॥ इत्युवाच
ज्वलत्स्तम्बमध्यतो मोसिमीश्वरः । नुदन् मोचयितुं हस्तादब्रहाद्युद्गवान् द्विषां ॥१३॥ न
मृतानां तु सो ऽस्तीशो जीवतां त्वखिलाश्च ते । नित्यं जीवन्ति तस्याग्रे ऽतो वो ऽतिभ्रमणं २०
स्फुटं ॥१४॥ गुरुरुवाच ॥ तथा शादूक्यवर्गं स तूष्णीं चक्रे सदुक्तिभिः । तन्नु केचिन्
स्थितास्तत्र समीक्ष्याध्यापका मुदा ॥१५॥ ऊचुः साधु त्वया प्रोक्तमेतदाचार्य्य खल्विति ।
फरीष्याश्चापि तच्छ्रुत्वा बहुशस्तं समागताः ॥१६॥ परामर्शात्परे चैकस्तेषां सच्छास्त्रशिक्षकः ।
परीक्षार्थमपृच्छत भ्रान्तिनाशमिदं वचः ॥१७॥ शास्त्रशिक्षक उवाच ॥ हे महाचार्य्य मोस्युक्तै

शास्त्राज्ञासु भूरिषु । कतमा सत्तमास्त्येव रक्षणीया विशेषतः ॥९८॥ शिष्येषूक्तवाचा तत्सर्वासामियं श्रेष्ठा वाक्यं शृण्विस्त्रयेल सत् । अस्मदीशो विभुर्ज्ञेय एक एवेश्वरः स्थितः ॥९९॥ तं च तावद्धृदा नूनं प्रीणयेस्तावदात्मना । तावच्चित्तेन चापि त्वं तावच्छक्त्या तथैव च ॥१००॥ इयमाज्ञाखिलास्वेवादिमा श्रेष्ठा च संस्थिता । द्वितीया तु स्थिता तस्मिन्शास्त्रे प्रथमसन्निभा ॥१०१॥ प्रतिवासिनमात्मीयं प्रीणयेस्त्वं किलात्मवत् । इत्यादेशद्वयाज्ज्ञेया न काप्याज्ञा महत्तरा ॥१०२॥ एताभ्यां हि वराज्ञाभ्यां समस्तं शास्त्रमैश्वरं । समस्तेशप्रवक्तॄणां वाक्यौघश्चावलम्बते ॥१०३॥ शास्त्रशिक्षक उवाच ॥ साधूक्तमिदमाचार्य्य त्वयैको यत ईश्वरः । संस्थितो न च कोऽप्यन्यो विद्यते वै कदाचन ॥१०४॥ तं च तावद्धृदा तावच्छक्त्येशं तावदात्मना । तावच्चित्तेन चैवं स्व

प्रतिवासिनमात्मवत् ॥१०५॥ प्रीणयेत्किल यो यः सोऽधिकं धर्म्मं समाचरेत् । सर्व्वहोम
क्रतूत्सर्गादपि तत्र न संशयः ॥१०६॥ गुरुरुवाच ॥ इदं तस्योत्तरं धीरस्येव ज्ञात्वाब्रवीत्
प्रभुः । त्वं न दूरस्थितो नूनं राज्यादप्यैश्वरादिति ॥१०७॥ नीरवे च ततो भूते
फरीष्याणां गणेऽखिले । तत्स्थानोपस्थिते ऽपृच्छदन्यत्सन्नृप इव तान् ॥१०८॥ श्रीयेषू
रुवाच ॥ सच्छास्त्राध्यापकैर्नूनं युष्माभिः कस्य मन्यते । पुत्र ईशाभिषिक्तः स खृष्टो राजा ३१
प्रतीक्षितः ॥१०९॥ गुरुरुवाच ॥ इदं पृष्टाः समस्तास्ते पुत्रो दाविद एव सः । इति
प्रत्यूचिरेऽथो सोऽन्यं प्रश्नं तर्ह्युवाच तान् ॥११०॥ श्रीयेषूरुवाच ॥ तदा तं कथमैशात्म
व्याप्तः सत्पार्थिवोऽप्यसौ । वर्णयामास खृष्टं वै स्वीयनाथाभिधानकं ॥१११॥ नाथं मदीय
मिदमभ्यवदद्विभुर्हि त्वं मेऽधुनोपविश दक्षिणहस्तपार्श्वे । यावन्न तेऽहमखिलारिगणं

त्वदङ्घ्रिपीठीकरिष्य इह तिष्ठ मया सहैव ॥११२॥ इत्युक्तं दाविदा तो यः कर्वेनाथस्तथो
च्यते । कथं खृष्टः स तत्पुत्रो भवितुं शक्नुयादपि ॥११३॥ गुरुरुवाच ॥ इदं वाक्यं मुदा
शृण्वन् व्यूहाः किंतु विरोधिनां । फरोष्याणां गणः किंचिन्नाशक्नोत्तं प्रतीरितुं ॥११४॥
एतस्माच्च परे नैकः प्रचण्डहृदयो ऽप्यरिः । प्रभुं किंचित्परिप्रश्नं विवादार्थं समैहत ॥११५॥
जितेषु च तथा सर्व्वविरोधिषु ततः प्रभुः । शिष्यांस्तद्विषये ऽवादीदखिलव्यूहसन्निधौ ॥ ३२
११६॥ श्रीयेषूरुवाच ॥ फरोष्यकाध्यापकशास्त्रिवर्गा मोस्यासनेषूपविशन्त्यतो वै । शास्त्रा
नुसारेण यदादिशन्ति ते वो ऽपि शिष्या मम तत्कुरुध्वं ॥११७॥ क्रियानुसारेण तु तद्गणा
नां प्रिया विनीता अपि मा कुरुध्वं । यतो ऽतिभद्राण्यपि ते मनुष्यानाशाय कार्य्यैर्न समा
चरन्ति ॥११८॥ दुःसह्यभारानपि बन्धयित्वा स्कन्धेषु नृणां किल ते ऽर्पयन्ति । किंत्वे

कयाप्यात्मकराङ्गुलीनां नेच्छन्ति तांश्चोदयितुं समन्तात् ॥११९॥ सर्व्वं हि तत्कर्म्म नरेक्षणाया
तो धर्म्मलक्ष्मार्थमुरूकृतास्तैः । स्मृत्यंशलेखाकवचा अतश्चांशवोऽधिकास्तद्वसनाग्रनद्धाः ॥१२०॥
श्रेष्ठासनान्येव मठेष्वतस्ते कांक्षन्ति तद्वच्च नृभोजनेषु । व्रजन्ति हट्टेषु नमस्कृतीस्ते गुरो
गुरो इत्यतिलिप्समानाः ॥१२१॥ मा त्वेव लिप्सध्वमिदं यतो वोऽस्त्येको गुरुर्भ्रातर एव
यूयं । मा भूस्थितं वा पितरं प्रवक्त स्वर्गस्थितो ह्यस्ति पिता व एकः ॥१२२॥ मा प्रोच्यतां ३३
कोऽपि च नायको वोऽस्त्येको हि वो नायक एव ख्रृष्टः । स्यात्सर्व्वभृत्यश्च महत्तमो वो यस्त्वा
त्मकीर्त्तीच्छुरधः स गामी ॥१२३॥ अध्यापकास्तु सफरीष्यगणा अरे वो धिग्लिङ्गिनो
ऽस्ति यत एव चिरार्थनानां । यूयं छलेन विधवालयगाः समन्तात्संभुंग्ध्व उग्रतरदण्डमवा
प्स्यथातः ॥१२४॥ अध्यापकास्तु सफरीष्यगणा अरे वो धिग्लिङ्गिनोऽस्ति यत आर्य्यमपी

षराज्यं । बध्नीथ यूयमिह न प्रविशन्त एवमन्यांश्च तत्र चलतोऽपि निरोद्धुकामाः ॥
॥२५॥ अध्यापकास्तु सफरीष्यगणा अरे वो धिग्लिङ्गिनोऽस्ति यत एककशिष्यलब्ध्यै ।
अब्धिं भुवं च परिगच्छथ तं त्ववाप्यात्मभ्योऽधिकं नरकजं द्विगुणं कुरुध्वे ॥१२६॥ युष्मान्
धिगन्धमनसो विभुमार्गदेष्टॄनाख्यात ईश्वरगृहाय शपेत कश्चेत् । भंक्तुं क्षमेद्यदि तु तत्स्थिन
काञ्चनाय कुर्य्याच्छपं स न निराक्रियतां किलेत्थं ॥१२७॥ मूर्खास्तथान्धहृदयाश्च तयोर्हि मध्ये ३४
श्रेयं नरैः कतरदेव बुधैर्महीयः । किम्वत्र सन्निहितमेव हिरण्यमञ्जाः किंवा हिरण्यपरि
शुद्धिकृदीशसद्म ॥१२८॥ ब्रूथैव कोऽप्युत शपेत यदीशवेद्यै भंक्तुं क्षमेद्यदि तु तद्बलये तदा
न । श्रेयोऽनयोः कतरदस्ति हि किं बलिर्वै किंवा बलेः परिविशुद्धिकृदीशवेदिः ॥१२९॥
यो यो नरः किल शपेत महेशवेद्यै तत्संस्थसर्वबलये शपते तदा सः । यो यः शपेत च महे

श्वरमन्दिराय तत्रस्थसर्व्ववसुने शपते स एवं ॥१३०॥ स्वर्गाय यस्त्वपि शपेत नरः पृथिव्यां
सिंहासनाय शपते स तदेश्वरस्य । सिंहासनाय शपमेव नरस्तु कुर्व्वंस्तस्मिंस्तथोपविशते
विभवे करोति ॥१३१॥ धिग्वोऽस्ति शिग्रुकवितुन्नकजोरकादीन् यस्माद्विभज्य दशभागत
एकमेषां । यत्नात्समुत्सृजथ किंतु गरीयसीः सच्छास्त्रे विवर्जथ विचारदयाप्रतीतीः ॥
॥१३२॥ एताः किलार्हत समाचरितुं विशेषान्नाचारमप्यमुमतीव विवर्जितुं ह । पात्राण्य ३५
हो मशकपानभयेन यूयं वस्त्रैः समावृणुथ हन्त मयं निगिल्य ॥१३३॥ अध्यापकास्तु सफरीष्य
गणा अरे वो धिग्धर्म्मलिङ्गिन ऋतायनदृष्टिहीनाः । यत्नाद्धि पानघसवासनवाह्यमेव
मृष्टान्तरे तु गृधतामलपूरिताः स्थ ॥१३४॥ रे रे फरीष्य विदृगात्मक शिक्षकापि त्वं यानि
पानघसपात्रचयोदरे स्युः । आदौ विमृड्ढि किल तानि ततो हि वाह्यं शुद्धीभवेत्स्वयमिवान्त

न संशयोऽस्ति ॥१३५॥ अध्यापकाः कपटिनः सफरीष्यका रे धिग्वः शितीकृतशवावटका
यथा हि । चिह्ने गते वहिरतो रुचिरा भवेयुरभ्यन्तरे तु मृतकुल्यमलप्रपूर्णाः ॥१३६॥
मर्त्यैरवेद्यमलकास्तदुपर्य्युपेतैर्यूयं तथा मनुजवञ्चनकर्म्मदक्षाः । विद्यध्व एव नरगोचर
धर्म्मशीला अभ्यन्तरे तु कपटित्वविधर्म्मपूर्णाः ॥१३७॥ अध्यापकास्तु सफरीष्यगणा अरे
वो धिग्धर्म्मलिङ्गिन ऋतायनदृष्टिहीनाः । ईशप्रवाचिशववासविधायकाः स्थ धर्म्यप्रमीत ३६
गणलक्ष्मविभूषकाश्च ॥१३८॥ तर्हि प्रवक्थ यदि नः समये पितृणां जाता वयं नु सह तैर्न तदा
भवेम । ईशप्रवाचिवधका इति किंतु यूयं स्वोक्त्यापि तद्वधकसूनव एव सिद्धाः ॥१३९॥
तस्मात् सतां वधकसूनव आश्विदानीं पित्रंघसां परिमितिं परिपूरयध्वं । सर्पा भुजङ्ग
लनयाः कथमेव यूयं विन्देत मोचनमरे नरकोग्रदण्डात् ॥१४०॥ वाक्यं संशृणुतैतदोश्वर

ऽध्यापिप्रवक्तॄन् बुधान् । शूलाद्ये
धिया वः प्रोक्तमेवाधुनाहो युष्मान्प्रति संनुदाम्यहमतो
स्त्वपि नाशयिष्यथ बहूनन्यांश्च तेषां बलादाहत्य स्वमठेष्वहो प्रतिपुरं संताडयेतादयाः ॥
१४११ तस्माद्धार्म्मिकहाबिलादिकसतां भूमौ हतानां बलात् सृष्ट्यावध्यसृगेव यद्यदभवत्सर्वत्र
संपातितं । तद्दण्डः किल वः प्रतीह निपतेत्तेषां सतां ह्यन्तिमो वेद्यग्रे जकरीय एव निहतो
ऽत्रार्य्यो बराकीयजः ॥१४२॥ हे सद्धन्तृयिरूषलेमनगरि त्वां प्रत्युत प्रेरितानश्माद्यैः सक ३७
लान् वधन्त्यपि कियद्वारं त्वपत्यानि ते । हेच्छं मां प्रति संग्रहीतुमनिशं स्वांस्ताम्रचूडा
यथा पक्षेषु प्रचिनोति सावकगणांस्तनु त्वदस्वीकृतं ॥१४३॥ त्याज्यं वो ह्यचिरान्निकेतन
मिदं शून्यं वधाग्न्यावृतं मां यूयं तु यिरूषलेमनगरे न द्रक्ष्यथात्रस्थिताः । यावद्भूम्यधिपं
न यूयमपि मां ज्ञात्वा विशन्तं तदा वाञ्छितोन्नदितुं य एति विभुनाप्यस्मान् स धन्यो

ऽस्त्विति ॥१४४॥ इति श्रीवृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (मोशिपंचशास्त्रे निःसृतिस्कन्धस्य तृतीयसर्गादनुवाक्यस्कन्धस्य पंचविंशसर्गाद् द्वाविंशतीतानां दशाधिकशततमादष्टादशाधिकशततमाच्च मत्थायस्यैकविंशद्द्वाविंशत्रयोविंशसर्गेभ्यो मार्कस्यैकादशद्वादशसर्गाभ्यां लूकस्य विंशसर्गाच्चोद्धृतः) पुण्यसप्ताहमङ्गलवारपूर्व्वचरित्रसूचकः सद्धन्तृमन्दगुरुपराजयो नाम चतुर्थोऽध्यायः ॥ ३८

गुरुरुवाच ॥ मन्दिरे तत्समाप्याार्य्यः स मन्दाचार्य्यभर्त्सनं । न विवाद्य इतस्तत्र तैर्जिघांसुतरीकृतैः ॥१॥ प्रोच्य चापि स्वमैश्वर्य्यं तथा यैरूषलेमिनां । पूर्णपित्रघमानानां भव्यं विलयमाश्वपि ॥२॥ ततो निर्गन्तुकामः स श्रेष्ठवृक्षगिरिं प्रति । अनायाते त्रियामेऽपि वरशिष्यगणावृतः ॥३॥ निर्गतेः प्राङ् महासद्माजिरे कोषाभिधे स्थितः । बहूंस्तत्रैक्षत

न्यूहान् ददतः स्वस्वदक्षिणाः ॥४॥ धनवत्सु त्वनेकेषु निदधत्स्वतिमूल्यकाः । कोषे स्वा
दक्षिणाः कापि दरिद्रा विधवाययो ॥५॥ सा सार्द्धपंचमाषांस्तु निदधौ तत्र ताम्रिकान् ।
तदा शिष्यान् समाहूय निजानभ्यवदत्प्रभुः ॥६॥ श्रीयेषूरुवाच ॥ विधवैव दरिद्रैषाधिकं
कोषे समार्पयत् । समस्तेभ्यो धनिभ्योऽपि दत्तवद्भ्योऽत्र दक्षिणाः ॥७॥ इत्यृतं वच्मि वोऽमी
हि स्वाधिकद्रव्यतो ददुः । स्वन्यूनत्वात्त्वियं सर्वं निदधावपि वेतनं ॥८॥ गुरुरुवाच ॥ ३९
तथोक्त्वा सर्वविन्मोक्ता ततो द्वादशभिः सह । निर्गच्छन् मन्दिरे नानाजिरमध्येऽतरत् खलु ॥९॥
शिष्याणामब्रवीत्त्वेकः पश्याचार्य्येह कीदृशाः । उपलाः सद्मनिर्म्माणप्रचयाश्चातिसुन्दराः ॥१०॥
प्रत्युवाच प्रभुस्त्वेनं पश्यथोपलसंचयं । नैकोऽप्यन्योपरि स्थाताच्छिन्नभिन्नोऽचिरादिति ॥
॥११॥ श्रेष्ठवृक्षगिरौ ते तु यदा सर्व उपस्थिताः । प्रभौ तत्र समासीने समन्दिरपुरागतः ॥

१२॥ तदा जिज्ञासयाचार्य्यमभ्येत्य प्रस्तरान्द्रियौ । तथा याकोबयोहन्नौ समपृच्छन्निदं
पृथक् ॥१३॥ श्रीयेषुशिष्या ऊचुः ॥ त्वदुक्तं सर्व्वमेतन्नः कदा भव्यं वदाथ ते । आगतेः
किं भवेच्चिह्नं कालसंपूरणस्य च ॥१४॥ श्रीयेषूरुवाच ॥ मा वंचयध्वं कुचिन्नाम्नानेके ह्यागा
मिनो मम । भ्रामयेयुश्च तत्पूर्त्तौ ख्रिष्टोऽस्मीत्युक्तिभिर्बहून् ॥१५॥ किंतु युद्धरवं यूयं त
द्वार्त्ताः श्रोष्यथापि च ॥ ततो मा व्यग्रतां यात कालान्तो न तदा भवेत् ॥१६॥ अन्योन्यं
ह्याक्रमिष्यन्ति राज्यराष्ट्राण्यतोऽपि च । दुर्भिक्ष्यमारिभूकम्पा भव्याः प्रतिदिशं भुवि ॥१७॥
एतत्सर्व्वमवश्यं हि भूमौ स्यात् किंतु भाविनां । अतिदुःसह्यदुःखानां समारम्भणमेव तत् ॥
१८॥ आकाशे चातिभीमानि चिह्नान्याविःस्युरप्यथ । तेभ्यः प्राग्वो गृहीत्वा ते ताडयि
ष्यन्ति दुर्हृदः ॥१९॥ मठेषु च तदानेया यूयं कारासु चैव तैः । देशाध्यक्षनृपाग्रे च मन्नामार्थे

मुहुर्मुहुः ॥२०॥ सोढव्यं तनु साक्ष्यार्थे बन्धुभिर्भ्रातृभिश्च हि । ज्ञातिभिश्चापि मित्रैश्च निधास्यध्वे द्विषां करे ॥२१॥ हन्तव्याश्चापि केचिद्वो द्रोहिष्यध्वे च मत्कृते । सर्वैर्नत्वणुकेशो ऽपि नाश्यो वः शिरसां ध्रुवं ॥२२॥ सावधानास्तु तर्हि स्त यतो ऽनेके ऽपि तद्बलात् । पातिताः स्युः परांश्चापि निधास्यन्ति दुरात्मकाः ॥२३॥ तदा मिथ्योपदेष्टार उत्थास्यन्त्यप्यनेकके । ईशनामच्छलोक्त्यैव मोहयन्तो बहूनपि ॥२४॥ अधर्म्मस्य च मर्त्येषु महावर्द्धनहेतुतः । बहूनां प्रेमसन्तापस्तदा शीतीभविष्यति ॥२५॥ सहिष्णुत्वे तदा यूयं स्वीयप्राणान् सुरक्षत । यो ह्येतच्छेषपर्य्यन्तं सोढा प्राप्ता स मोचनं ॥२६॥ आदौ राज्यसुवार्त्ता तु प्रवाच्या भूमिमण्डले । साक्ष्यार्थं सर्व्वराष्ट्रेभ्यो ऽथ शेषस्तत्परे भवेत् ॥२७॥ किंत्वाहूतैर्नराग्रे ऽपि यत्नात्स्थाप्यमिदं हृदि । युष्माभिर्नीतराथं वै किंचिच्चिन्तयितुं पुरा ॥२८॥ अहं वो हि मुखं दायी 41

बुद्धिं चापि दृढां ययोः । शक्तिं वारयितुं शक्तो न को ऽपि स्याद्विरोधिनां ॥२९॥ अक्षौहिणी
भिः परिवेष्टितं तु यदा प्रपश्येत यिरूषलेमं । स्थाने ऽप्यथो पुण्यतमे ऽपकृष्टं दान्येलसूक्तं
निभृतीकृदुत्थं ॥३०॥ तदा सदुक्तिं पठितां सुबुध्य यहूद्यदेशे निवसन्ति ये ये । ते निर्जनी
भव्यपुरं विवर्ज्य यत्नात्पलायन्तु महीधरेषु ॥३१॥ यस्त्वात्मगेहोपरि संस्थितः स द्रव्याणि
मा यातु ततो ग्रहीतुं । क्षेत्रे स्थितो यश्च स मा पुरान्तर्यात्वात्मवस्त्राण्यपि हर्तुमाशु ॥३२॥ ४२
या गर्भवत्यः स्तनपाजनन्यश्चार्तिर्व्यथा स्यात् किल तर्हि तासां । पलायनं वः शिशिरे तु विश्रा
माहे ऽथवा मास्त्विति याचनीयं ॥३३॥ तदा हि सृष्ट्यावधि यावती नाभूत्क्वापि पीडा भुवि
तावती स्यात् । न तत्परे वापि जगल्लयान्तं तत्तुल्यपीडेशरुषा प्रदेया ॥३४॥ ऊनीकृता
चेन्न तु तद्दिनानां संख्या भवेत् को ऽपि न मुक्तिमाप्ता । दयान्वितस्त्वात्मविशिष्टवर्गार्थे

तां किलोनीप्रकरिष्यतीशः ॥३५॥ तदा त्वहो खल्विह ख्रष्ट इत्थ तद्यस्ति वा ख्रष्ट इति श्रुत
चेत् । युष्माभिरेतत्सकलं ह्यमान्यमाश्चर्य्यकर्म्मान्वितमप्यतीव ॥३६॥ ये तर्हि मिथ्यागुरवो
हि मिथ्याख्रष्टास्तथाविर्भवितार उर्व्यां । ते चित्रलक्ष्मौघबलैर्वृतानप्युन्मोहयेयुर्यदि तन्नु
शक्यं ॥३७॥ मत्प्रोदिताः सर्व्वमहो स्थ यूयं स प्रान्तरे ऽस्तीत्युदितास्तनो मा । निर्यात चेत्सो
ऽस्ति गृहान्तरे त्वित्युच्येध्वमप्रत्ययमानसाः स्त ॥३८॥ यथा तडित्प्राग्दिश आगतैव प्रत्यग्दिशं ४३
व्योम्न्यवभासमाना । तथा नृपुत्रागमनं शवो हि स्याद्यत्र दाक्षाय्यगणो ऽपि तत्र ॥३९॥
एवं समस्तैशलिपिप्रपूर्त्यै पतेन्महार्त्यन्वितदण्ड उर्व्यां । एतत्कुलं चार्य्यसिभिर्हतं स्यात्
तद्बन्धनायापहृतं बलाद्वा ॥४०॥ गते स्ववृन्दे ऽखिलराष्ट्रमध्ये मर्द्यं परौघैस्तु यिरूषलेमं ।
स्थेयं च सर्व्वान्वययोग्यकालसंपूर्त्तिपर्य्यन्तमिहैवमेतत् ॥४१॥ भूता यदा तत्समयव्यथा तु सूर्य्ये

स्तमितीभविता तदैव । चन्द्रो न दाता स्वरुचिं तदा चाकाशात्पतिष्यन्त्युडवो ऽपि भूमौ ॥
४२॥ क्षित्यां च राष्ट्रेषु परस्परं स्यात् संक्षोभणं व्याकुलता च बह्वी । सिन्धोस्तरङ्गस्वन एव
भीत्यागाम्यापदां नृष्ववदीर्णहृत्सु ॥४३॥ तदा हि धूतास्वपि नाकशक्तिष्वाकाशमध्ये नरपुत्र
लक्ष्म । आविर्भवेदुर्व्यखिलान्वयास्तु व्यग्रत्वमाप्त्वा विलपेयुरुच्चैः ॥४४॥ अथो महाविक्रम
युक्तमूर्द्धान्तरीक्षमेघोपरि ते नृपुत्रं । अतीवतेजो ऽन्वितमीक्षितार आयान्तमुर्वीतलमैशशक्त्या ४४
॥४५॥ स चात्मदूतान् परिनोत्स्यते ऽतस्तूरीनिनादेन समस्तदिग्भ्यः । धरान्ततो ऽपि स्व
विशिष्टवर्गमुच्चैः समाह्वातुमतीवशक्त्या ॥४६॥ अतो यदारम्भणमात्रमेषां यथोदितं द्रक्ष्यथ
यूयमेव । तदोर्द्ध्वमुत्तोलयताभयाः स्वान् मूर्द्धः समायाति हि वो विमुक्तिः ॥४७॥ ज्ञेयं तु
युष्माभिरुडुम्बरादिद्रूणां सुदृष्टान्तमवेततर्कैः । शाखामृदुत्वे दलनिर्गमे च सत्यन्तिको ग्रीष्म

इतो ऽनुभूतः ॥४८॥ तथा यदेक्षेध्वमिदं मदुक्तं सर्वं तदाभ्यर्णमिहेशराज्यं । इत्थं सुविज्ञैष
गणो ऽपि नैतत्सर्वागतेः प्रैष्यति पूर्वमेव ॥४९॥ इत्युच्यते सत्यतमं मया वः प्रेयाद्धि नाकः
पृथिवी च नूनं । मदुक्तवाक्यानि तु वः कृचिन्न प्रेष्यन्ति कालेन निराकृतानि ॥५०॥ इमं
मुहूर्तं दिवसं च भीमं न को ऽपि जानाति विना पितुर्मे । न स्वर्गदूतेषु न वा मनुष्यात्मजे
ऽपि बोधो निहितः किलास्य ॥५१॥ नोहस्य यद्वत्समये ऽखिलास्तु भूस्थाः किलागामिजल
प्लवाज्ञाः । तन्नौसमारोहदिनान्तमन्नोद्वाहादिमध्ये विलयं प्रपन्नाः ॥५२॥ तद्वन्नृपुत्रागमनं
तदैकक्षेत्रे सतोर्मानुषयोर्द्वयोस्तु । नार्य्योर्द्वयोर्वैककपेषयन्त्रे स्यादेकलाभो ऽपरवर्जनं च ॥५३॥
अतो ऽपि यूयं स्त नु सावधाना मा भुक्तिभिर्मत्ततयाथ वा मा । संसारचिन्ताभिरवप्लुतं वो हृत
खल्वकस्माद्दिनमाप्नुयात्तत् ॥५४॥ दिनं ह्यदः पाशवदुर्व्विवासिसमस्तवृन्दे निपतेदकस्मात् ।

चेन्नडिपन्मोचनमाप्नुमहो नरात्मजायेस्थितिमेव यूयं ॥५५॥ तदार्थयध्वं परिदृश्य यत्ना
त्तदर्हतां जागृत चैव नित्यं । यस्मिन् मुहूर्त्ते ऽत्र समागतिः स्याद्युष्मत्प्रभोस्तं नहि वित्त
सम्यक् ॥५६॥ यथा मनुष्यः परदेशगामी त्यक्ते स्वगेहे निजकिङ्करेषु । पृथक् पृथक् कर्म्म
विधाय यत्नाद्दौवारिकं जागरितुं दिशेत्स्वं ॥५७॥ तथैव वो जागरणं नियोज्यं सायं गृही
किं ह्यथवा निशार्द्धे । किं ताम्रचूडस्वनितक्षणे वा किं वोषसीयात्किल तन्न वित्थ ॥५८॥ ४६
माप्नोतु सुप्तांस्तु स वः कदाचिद्युष्मांस्तु यद्वच्मि विशिष्टभृत्यान् । तदेव सर्व्वान्ममवाक्य
लब्धून् वच्म्यप्यहं जागृत गाढयत्नात् ॥५९॥ विशिष्टभृत्यस्तु गृहीव चोराक्रान्तिज्ञ एतत्स
मयाविदेवं । सुप्रस्तुतः स्यात् परिवारवर्गप्रत्येकयोग्यान्नविभागदाता ॥६०॥ विश्वा
स्यमेवं हि बुधं च भृत्यं कुर्व्वन्तमेतत् प्रभुराप्नुयाद्यं । आयातिकाले तमतीवधन्यं सर्व्वाधिकारे

ऽपि नियोजयेत्सः ॥ ६१ ॥ इत्थं ब्रवीम्येव विशिष्टभृत्यश्चेतु प्रभोरेतिविलम्बहेतोः ।
मन्दः स हन्यादवशिष्टभृत्यान् पिवेच्च मत्तैः सह तद्वदद्यात् ॥६२॥ तदापि तस्य प्रभुरात्म
गेहमज्ञात एवाह्यनपेक्षिते च । मुहूर्त आगाम्युत खल्वकस्मात् द्विधा तमप्रस्तुतमेव
भिन्देत् ॥६३॥ स धर्म्मलिंग्योघयुतो हि तस्याविश्वास्यभृत्यस्य निधेयभागः । आक्रन्दनं
तत्र भवेतु घोरं दतां तदाघातरवोऽपि भूरिः ॥ ६४ ॥ स्वर्गराज्यं तदा ज्ञेयं दशकन्या 47
इवोत्सवे । वैवाहे दीपधारिण्यः साक्षात्कर्तुं वरं गताः ॥६५॥ तासां पंच बुधा दीपांस्तैल
पात्रैः सहाददुः । शेषाः पंच तु मूर्खाः स्वानाददुस्तद्विवर्जिताः ॥६६॥ वरे विलम्बमाने तु सुप्ता
स्वासु तदा ध्वनिः । निशीथे ऽभूद्वरो ऽत्राहो साक्षात्कर्तुमवेत तं ॥६७॥ इति संश्रुत्य कन्यास्ताः
स्वप्नतः शीघ्रमुत्थिताः । प्रस्तोतुं यत्नतो दीपान् स्वान् स्वानारेभिरे तदा ॥६८॥ विदुषी

चाब्रुवन् मूर्खा अहो तैलं प्रदत्त नः । अस्मदीया यतो दीपा निर्वाणा अभवन्निति ॥६९॥
विदुष्यस्त्वब्रुवन्नैवमुभयाभ्यस्तदा हि नः । नोपयुक्तं भवेत् स्वार्थं त्वित्वा क्रीणीत वीथिषु ॥
७०॥ एवं तत्क्रीतये ऽपेतास्वासु हट्टे वरस्तदा । आयात् प्रस्तुतकन्याश्चाविशंस्तेन स
होत्सवे ॥७१॥ परे द्वारे तु संबद्धे तैलं प्राप्येतरा अमूः । उपस्थायानदन् स्वामिन् स्वामि
न्नो ऽप्यस्तु वेशनं ॥७२॥ इत्युक्तः सो ऽब्रवीद्युष्मान्नाहं जानामि खल्विति । अतो जागृत यूयं ४८
तन्मुहूर्तदिवसाविदः ॥७३॥ परदेशं यथा गामी नरो ऽपि निजकिङ्करान् । समा
हूयाखिलं द्रव्यं पृथक् तेषु समादधौ ॥७४॥ एकस्मिन् रौप्यकर्षाणां पादोनायुतमादधौ ।
अन्यस्मिंस्त्रिसहस्रं सो ऽन्यस्मिन् सार्द्धसहस्रकं ॥७५॥ प्रत्येकशक्तिमानेन विनिधायाखिलेषु
सः । किङ्करेषु प्रभुर्द्रव्यं परदेशे ततो ययौ ॥७६॥ तदाप्नोच्छ्रेष्ठभागं यः स बाणिज्येन तत्समं ।

लाभं चक्रे तथा चापि मध्यमं भागमाप यः ॥७७॥ कनिष्ठं त्वाप यो भृत्यः स ततो ऽपेत्य भूतले ।
गर्तं निखन्य तत्रैव न्यगोपत्स्वप्रभोर्धनं ॥७८॥ बहुकालात्परे तेषां भृत्यानां स्वगृहे प्रभुः ।
पुनरित्वाकरोदायव्ययसंख्याविवेचनं ॥७९॥ तं चाभ्येत्यादिमो भृत्यो ऽब्रवीत् स्वामिंस्त्वया
मयि । यदभूद्रौप्यकर्षाणां पादोनायुतमर्पितं ॥८०॥ अहो तेनाधुनाप्यन्यत्तत्पादोनायुतं
तथा । मद्वाणिज्यसमुत्पन्नं त्वल्लाभायेत्यथ प्रभुः ॥८१॥ साधु सद्भृत्य विश्वास्यः क्षुद्रे ऽर्थे ४९
त्वं महत्यतः । प्रतिष्ठाप्यो विशेर्हर्षं स्वप्रभोरित्युवाच तं ॥८२॥ तथाभ्येत्य द्वितीयः स्म वक्ति
स्वामिंस्त्वया मयि । निहितं रौप्यकर्षाणां सहस्रत्रयमेव यत् ॥८३॥ अहो तेनाधुनाप्यन्य
त्तत्सहस्रत्रयं तथा । मद्वाणिज्यात्समुत्पन्नं त्वल्लाभायेत्यथो प्रभुः ॥८४॥ साधु सद्भृत्य
विश्वास्यः क्षुद्रे ऽर्थे त्वं महत्यतः । प्रतिष्ठाप्यो विशेर्हर्षं स्वप्रभोरित्युवाच तं ॥८५॥ अथाभ्ये

त्येतरो ऽवादीत् स्वामिंस्त्वं कठिनो नरः । त्वदन्यस्तधनग्राही त्वदनुप्तच्छिदोऽपि च ॥८६॥
इत्यजानामतो भीत्या तव सार्द्धसहस्रकं । रौप्यकर्षं मृदि न्यास्यमहो त्वं स्वं पुनर्नय ॥८७॥
एवं तद्वाक्यमाकर्ण्य प्रत्यवादीदिदं प्रभुः । अरे किंकर दुष्टात्मन्नलस त्वं ब्रवीषि किं ॥
८८॥ मदन्यस्तवसुग्राही मदनुप्तच्छिदो ऽपि च । अहमस्मीति नूनं त्वं हृदये सममन्यथाः ॥
८९॥ अतो रूप्यं मदीयं त्वं प्रणिधातुं कुशीदिषु । आर्हो ऽतो ऽप्यहमात्मीयं सवृद्धि प्राप्नुयां
पुनः ॥९०॥ ततो ऽस्माद्धे परिचरा हृत्वा सार्द्धसहस्रकं । कर्षं तं न्यस्यतामुष्मिन् सार्द्धायुत
विधारके ॥९१॥ यो दद्याद्धि नरस्तस्मै देयं भूर्य्यपि किंतु यः । न दध्यान्मानुषस्तस्मा
दपहार्य्यं स्ववस्त्वपि ॥९२॥ भृत्यं तु निष्फलं वाह्ये तिमिरे विनिरस्यत । तर्हि स्यात् क्रन्दनं
घोरं दन्ताघातस्वनो ऽपि च ॥९३॥ नरपुत्रो यदागन्ता निजतेजःसमन्वितः । वृतो दूतैः

समासीत महःसिंहासने तदा ॥९४॥ सर्वराष्ट्रजनौघोऽपि तदग्रे संग्रहीष्यते । द्विधा कुर्य्या
च्च तं यद्वत्पालको ऽव्यजसंहतिं ॥९५॥ स्वीयदक्षिणपार्श्वेऽपि समर्प्यावीनजांस्त्वथ । वाम
पार्श्वे तदा राजा दक्षिणस्थानिदं वदेत् ॥९६॥ एत मत्पितुरापन्ना आशिषं जगदादितः।
प्रस्तुतं युष्मदर्थे यद्राज्यं तदधुनाप्नुत ॥९७॥ क्षुधितं मां यतो यूयं भोजयामास तृड्युतं ।
अपाययत गेहे चोदासीनं निन्य मां ध्रुवं ॥९८॥ पर्य्यधापयतैवं मां नग्नं रोगिणमेव च । ५१
अपालयत बद्धं च कारायां द्रष्टुमागताः ॥९९॥ इत्युक्ता धार्म्मिका ब्रूयुः क्षुधितं त्वां कदा
प्रभो । अभोजयाम तृड्युक्तं तथैवापाययाम वा ॥१००॥ त्वां कदा वाप्युदासीनं प्राप्य गेहे
ऽनयाम नु । त्वां पर्य्यधापयामापि कदा नग्नमवाप्य वा ॥१०१॥ रोगिणं त्वां कदा दृष्ट्वा
पालयाम कुचिद्वयं । कारायां बद्धमपि वा कदा त्वामीक्षितुं गताः ॥१०२॥ इदं पृष्टो नृपो

ब्रूयान्मद्भ्रातॄणां लघीयसि । एकस्मिंश्चक्र यच्चैषां तच्चक्रापि तथा मयि ॥१०३॥ एवं वो
वक्ष्यहं सत्यमित्युक्त्वा धार्म्मिकान्नृपः । ततो वामस्थितान् सर्व्वानभिब्रूयादिदं वचः ॥१०४॥
यात मत्तः शपापन्ना यूयमग्नावनन्तके । प्रस्तुते भूतनाथाय सदूतौघाभिशापिने ॥१०५॥
क्षुधितं मां न हि क्वापि भोजयामास तृड्युतं । नापाययत गेहे चाप्युदासीनं न निन्य मां ॥
१०६॥ पर्य्यधापयतैवं न मां नग्नं रोगिणं च मां । नापालयत न द्रष्टुं मां काराबद्धमागताः ॥ ५२
१०७॥ इत्युक्ता ब्रूयुरपि ते क्षुधितं त्वां तु तृड्युतं । प्रभो नग्नमुदासीनं रोगिणं बद्धमेव
वा ॥१०८॥ कदा प्राप्य वयं क्वापि नोपकारमदद्म ते । इदं पृष्टो नृपो ऽप्येतत् प्रतिवक्ष्यत्य
धार्म्मिकान् ॥१०९॥ मद्भ्रातॄणां लघिष्ठे ऽपि यदेकस्मिन्न चक्र वै । एषां तन्मय्यपि ज्ञेय
मकृतं वो ब्रवीम्यृतं ॥११०॥ अनन्तं दण्डमेष्यन्ति चैते वाचाक्षदर्शिनः । धार्म्मिकास्त्वपि

तद्वाचा गच्छेयुर्नित्यजीवनं ॥११॥ गुरूरुवाच ॥ इत्थं भीमविचारघस्त्रकथनैः स्वीयान् स शिष्यान् प्रभुस्तत्सुप्रस्तुतये ध्रुवं स्वमृतितः पूर्वं किलोपादिशत् । पूर्णे प्रात्यहिके महेश भवनान्तःस्थे हि सच्छिक्षणे श्रेष्ठद्व्यग्रुपरिस्थितोऽथ शयितुं यातः स मार्थीगृहे ॥१२॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्वणि (मोसिपंचशास्त्रस्य योनिस्कन्धाद्दान्येलभव्यवाक्यानां नवमसर्गान्मत्थायस्य चतुर्विंशपंचविंशसर्गाभ्यां मार्कस्य त्रयोदशसर्गाल्लूकस्यैकविंशसर्गाच्चोद्धृतः) ५३
पुण्यसप्ताहमङ्गलवारोत्तरचरित्रसूचको नरपुत्रद्वितीयागमनादेशो नाम पंचमोऽध्यायः ॥

शिष्य उवाच ॥ भव्यकालाधिराजः स जीवत्प्रेताक्षदर्शकः । तत्सप्राहस्य सौम्येऽह्नि किं चकारान्तिकान्तकः ॥१॥ गुरूरुवाच ॥ पंचाशीतितमे वर्षे वैक्रमादित्यके शके । मासोऽन्त्यश्चैत्र आद्योऽभूत्तदाब्दस्यैत्रयेलिनां ॥२॥ तत्पूर्णेन्दौ त्र्यहेऽपि प्राग्ज्यौतिष्यविषु

वात् स्थिते । न्यधायि त्राणकं पर्ब गणकैर्हि यहूद्यकैः ॥ ३ ॥ शुक्रवारे तु सा सायं
सकलोत्तमपूर्णिमा । नरत्राणकृदिज्यातः पुण्याख्ये समसिध्यत ॥४॥ सौरमासस्य रौम्याणां
मार्त्यस्यैकादशं दिनं । ख्रृष्टीयशकवर्षस्य ह्यूनत्रिंशत्तमस्य तत् ॥ ५ ॥ रोमामहापुरस्यैत
द्वर्षे ऽध्यक्षौ स्थितौ किल । रुबिल्यजमिनः फूष्यजमिनश्चाप्युभौ सकृत् ॥६॥ कैशरो हि
तिबर्य्यस्यास्मिन् साम्राज्यस्य षोडशे । वर्षे निश्चितमभ्यूचुर्बुधा मृत्युं महाप्रभोः ॥७॥ त्वत्पृष्टे ५४
बुधवारे तु चैत्रस्य द्वादशे दिने । शुक्लपक्षस्य किंत्वैनमासमार्त्यस्य षोडशे ॥८॥ तदैनत्सर्ब
विज्ञः स प्रोक्तदीर्घोपदेशवाक् । स्वशिष्यान् बेथनीयस्थ एतदभ्यवदत्स्फुटं ॥९॥ श्रीयेषू
रुवाच ॥ परश्वः पूर्णिमान्तः स्यात् त्राणपर्ब च तर्हि तु । शूलहत्यै प्रदेयो ऽस्ति नृपुत्र इति
वित्त नु ॥१०॥ गुरुरुवाच ॥ इत्यूचे सर्बविन्मोक्ता तदा हि श्रेष्ठयाजकाः । सफरीष्याः

प्रधानाश्च तन्नस्तनवचोभयात् ॥११॥ कायफस्य समाहूता महायज्वन आलये । प्राक्
संकल्पितघातस्योपायं मन्त्रयितुं प्रभोः ॥१२॥ छलमात्रेण तं हत्यै गृह्णाम नतु पर्वणि । व्यूह
क्षुब्धिभयादित्थं ते ऽब्रुवन् दुर्हृदो मिथः ॥१३॥ तदा चतुर्दिनात्प्राग् यो मार्थानिलयभोजने ।
शनौ तेभ्यो निधातुं स्वं स्वामिनं समकल्पयत् ॥१४॥ यथाप्रोक्तं यहूदः स इष्कार्य्योत्यभिधः
शठः । श्रेष्ठयज्वसभामेनां समभ्येत्येदमब्रवीत् ॥१५॥ इष्कार्य्योतियहूद उवाच ॥ हे ५५
प्रधानाः कियन्मह्यं दास्यध्वे यदि वः करे । निदध्यां नशरेतीययेषूं युष्मद्गवेषितं ॥१६॥
गुरुरुवाच ॥ इत्युवाच कृतघ्नः स दुर्नागेनाभिशापिना । लोभव्याप्तमनाः ख्रीष्टजिघांसून् प्रति
याजकान् ॥१७॥ तस्मै हृष्टास्तु ते त्रिंशद्रौप्यकर्षान् ददुस्तदा । दातुं तदधिकं चाङ्गीचक्रु
स्तद्ग्रहणात्परे ॥१८॥ दुष्टायाः संविदस्त्वस्याः पश्चात्स स्वप्रभुं द्विषां । निर्जने ऽर्पयितुं

हस्ते हितकालमचेष्टत ॥१९॥ शिष्य उवाच॥ ॥ नरकार्हं गुरो नूनं बुधवारस्य कर्म्म तत् ।
मन्दिरे तु प्रभूक्तानि किं पूर्णान्यभवंस्तदा ॥२०॥ गुरुरुवाच ॥ एकमन्यन्मया शिष्य
कथनीयं प्रभोर्वचः । यथोक्तं निजसङ्गेहे ऽचिरात्प्राङ्मृत्युकालतः ॥२१॥ प्रविश्य हि महा
पुर्य्यां यथाविधि दिने दिने । मन्दिरस्य वहिःस्थे स परदेशाजिरे स्थितः ॥२२॥ तदा च
परदेशीयाः केचित्सत्येश्वरार्च्चिनः । त्राणपर्व्वणि ये ऽर्च्चायै महापुर्य्यामुपस्थिताः ॥२३॥ ५६
द्वारगाख्या यहूद्येषु यतो नाभ्यन्तराश्रिताः । यज्वभ्यः प्रैरयंस्ते स्वबलीन् भास्वति गो
पुरे ॥२४॥ प्रभुर्वाह्याजिरे शिष्यैः सह प्राविशदित्यमी । श्रुतवन्तस्ततो ऽभ्येत्य फिलिप्प
मिदमब्रुवन् ॥२५॥ भक्तपरदेशिन ऊचुः ॥ हे महाशय संप्राप्ता वयं येशूद्दिदृक्षया । प्रार्थ
यामो भवन्तं नो नेतुं किल तदन्तिके ॥२६॥ गुरुरुवाच ॥ इत्याकर्ण्य फिलिप्पस्तद्वचो

ऽज्ञापयदन्द्रियं । ततोऽन्द्रियफिलिप्पौ तु ज्ञापयामासतुः प्रभुं ॥२७॥ स तु तौ प्रति सद्भक्त
परदेशिगणान्वितौ । अत्यन्तमिदमभ्यूवे स्वमृत्युविषयं वचः ॥२८॥ श्रीयेषूरुवाच ॥ नर
पुत्रस्य माहात्म्यकीर्त्तिकाल उपस्थितः । अतो युष्मान् वचः सत्यं यद्वच्मि शृणुतैव तत् ॥
२९॥ भूमौ गोधूमवीजं वै पतितं न म्रियेत चेत् । तिष्ठेत्तदेककं किंतु मृत्वा धत्ते फलं बहु ॥
३०॥ स्निह्यादात्मीयजीवं यो नरोऽपचिनुयात् स तं । संसारेऽस्मिंस्तु यो द्वेष्ट्यतं रक्षेत्सोऽमरं 57
सदा ॥३१॥ यो मत्सेवां नरः कुर्य्यादनुगच्छतु सोऽपि मां । अहं यत्र च तिष्ठेयं तत्र स्यान्मम
सेव्यपि ॥३२॥ यो यश्चापि मनुष्येषु प्रकुर्य्यान्मम सेवनं । तस्मै गौरवमत्यन्तं प्रदद्या
न्मामकः पिता ॥३३॥ इदानीं व्याकुलात्माहं किं वक्ष्यामि त्वतो वचः । कालात्त्वं पितर
स्मान्मां रक्षेत्यर्थयितास्मि किं ॥३४॥ किंत्वेतत्सहनायैवास्मिन् कालेऽहमुपस्थितः ।

अतो हे पितरात्मीयनाममाहात्म्यमाचर ॥३५॥ गुरूरुवाच ॥ इत्युक्तवति दृष्टोग्रमृत्युकाला
न्तिकागतौ । पुण्य ईशात्मजे वाणीं श्रुताकाशोत्थिता क्षणात् ॥३६॥ श्रीपरमेश्वर उवाच ॥
आत्मीयनाममाहात्म्यं समाचरितवानहं । इदानीमपि तद्भूय आचरिष्यामि वै दृढं ॥
३७॥ गुरूरुवाच ॥ एनां संशृण्वति व्यूहे वाणीं मन्दिरसंस्थिते । केचिदन्योन्यमभ्यूचु
र्वज्रशब्दोऽस्ति खल्विति ॥३८॥ अन्ये त्वीश्वरदूतस्तं कश्चिदभ्यब्रवीदिति । मिथ ऊचु 58
स्ततः सर्वानिदं प्रत्यवदत्प्रभुः ॥३९॥ श्रीयेषूरुवाच ॥ न मदर्थमियं वाणी युष्मदर्थं बभूव
तु । ऐशमाहात्म्यसंपूर्तिकालं ज्ञापयितुं ध्रुवं ॥४०॥ अधुनैहिकलोकस्य विचार उप
तिष्ठति । अधुनैहिकलोकस्य नाथो निःक्षिप्यते वहिः ॥४१॥ अहमेव च चेदूर्द्धं समुत्तुल्येय
भूमितः । तदात्मनिकटे सर्व्वान् समाकर्ष्यामि मानुषान् ॥४२॥ गुरूरुवाच ॥ इत्युवाच स्व

शूलोपर्य्युपान्तविषयं वचः । सन्मोक्ता मानुषाकर्षी पापच्छिद्यज्ञशक्तिभिः ॥४३॥ मोऽस्यु
त्तोलितपैत्तल्यसर्पबिम्बाङ्कितप्रभोः । शक्तिं त्वेनां न जानन्तो य्यूहाः प्रत्यवदन्निदं ॥४४॥
यहूद्या ऊचुः ॥ नित्यमेव प्रभुः ख्रीष्टः स्थास्यतीति वयं सता । शास्त्रेण ज्ञापितास्त्वं तु कीदृङ्
नूत्नोपदेशदः ॥४५॥ उत्तोल्यो नरपुत्रोऽस्तीति त्वदीयवचः कथं । प्रसिद्धं नरपुत्रोऽयं को
वा त्वदुदितः सदा ॥४६॥ गुरुरुवाच ॥ एवं दिदृक्षवोऽप्येते ख्रीष्टं तमरिजित्वरं । सत्खृष्टो ५९
क्तौर्य्यमन्यन्त स तु तान् पुनरब्रवीत् ॥४७॥ श्रीयेषूरुवाच ॥ सत्प्रकाशस्थितेर्युष्मास्वल्पकालो
ऽवशिष्यते । यावत्तद्भासितास्तु स्थ तावच्चलत यत्नतः ॥४८॥ तन्न चेत्स्यादकस्माद्वस्तदै
वाधिपतेत्तमः । चलेद्यस्त्वन्धकारे स न जानाति क्व गच्छति ॥४९॥ यावत्प्रकाशो युष्मासु
तावदेव प्रतीत तं । यूयं येन भवेतार्हाः सत्प्रकाशात्मजा अपि ॥५०॥ गुरुरुवाच ॥ इत्युक्त्वा

सत्प्रकाशः स तान् हित्वान्तर्हितो ऽभवत् । तेषां त्वप्रत्ययो ऽतिष्ठद्दृष्टेयल्लक्ष्मणामपि ॥५१॥
पुरोक्तेषायवाक्यं च ततो ऽलभत पूरणं । क इह श्रुतिमस्माकं प्रतीतिकृदमन्यत । कस्य वा
गोचरे जेना विभुबाहुर्बभाविति ॥५२॥ तदप्रत्ययहेतुश्च दृष्टखृष्टमहौजसा । ज्वालस्पृष्टो
ऽश्वकविना तेन प्रागुदितस्तथा ॥५३॥ भवेत्स्तब्धहृज्जेष वर्गः समस्तो निरुद्धश्रुतिर्मुद्रिताक्षश्च
सम्यक् । यतो नापि पश्येन्न बुध्येत वा स न वा स्यात् परावृत्तहृद्रोगहृत्यै ॥५४॥ इती ६०
षायोदितं किंतु प्रधाना अपि भूरयः । तं प्रत्यायन् फरीष्यौघभयात् स्वीकारिणो नहि ॥
५५॥ मठतो हि निरासात्ते ऽत्रस्यन् कीर्त्तिं नृणां किल । ईश्वरप्रत्तसत्कीर्त्तेरधिकं प्रेम
कारिणः ॥५६॥ किंतु पित्राभिषिक्तः स नृणामेको विमुक्तिदः । अवतीर्णेशपुत्रः स्वे मन्दिरे
ऽघोषयत्तदा ॥५७॥ श्रीयेषूरुवाच ॥ मां यः प्रत्येति स न मां प्रत्येति किल केवलं ।

किंतु प्रेरयितारं मे पितरं स्वर्गवासिनं ॥५८॥ मां यः पश्यति सोऽस्त्येव मत्प्रेरयितृदृक्तथा ।
अहं तत्संमुखाद्भूमौ प्रकाशो हि समागतः ॥५९॥ न तमिस्रे चलेयुर्हि मत्प्रत्येतृगणा
भुवि । तदर्थमेव तत्राहं सत्प्रकाशः समागतः ॥६०॥ यस्तु वाक्यानि मे श्रुत्वा न प्रत्ये
त्यक्षदर्श्यहं । तस्य नास्मि विचाराय नैतो मुक्त्यै तु संसृतेः ॥६१॥ यो हि मामवमन्येत न
गृह्णीयाच्च मद्गिरः । तस्येदानीं स्थितो नूनं कर्म्मणोऽहोऽक्षदर्शकः ॥६२॥ मत्प्रोक्तं ह्यखिलं ६१
वाक्यं तदेव चरमे दिने । घोरे तं मानुषं सत्यप्रकाशारिं विचारयेत् ॥६३॥ न स्वयं ह्यह
मेतानि प्रावदं किंतु मां पिता । प्रेरयन्नादिशद्वाच्यं प्रवाद्यं च वचोऽखिलं ॥६४॥ नित्य
जीवात्मकस्त्वस्ति तदादेश इति ध्रुवं । वेद्म्यतो यद्यदूचे मां पिता तत्प्रवदाम्यहं ॥६५॥
गुरुरुवाच ॥ तथा स्वं चरमं वाक्यं प्रावदन्निजमन्दिरे । प्रभुः खृष्टोऽन्धसंन्याप्ये हतसद्दीपके

ऽचिरात् ॥६६॥ तदोयाक्षौहिणोभिश्चापकृष्टोकार्य्य एव हि । दान्येलोऽन्यनुसारेणाज्ञातस्वहित
कालके ॥६७॥ शिष्य उवाच ॥ दण्डं यैरूषलेम्यानां स्वदोपागतिहेलिनां । या दान्येलो
क्तिरवदत् का सा येषूस्मृता पुरा ॥६८॥ गुरुरुवाच ॥ बाबिले स स्थितो दग्धस्वपुर्य्या
मन्दिरस्य च । सप्तत्यब्दानुनिर्म्माणं यिरिमीयोक्तमर्थयन् ॥६९॥ एतत्सान्त्ववचः प्रापे
शदूतेनोदितं सता । गब्रियेलेन सन्ध्यायामुत्सर्गसमये ध्रुवं ॥७०॥ दूत उवाच ॥ हे दान्येल गणे ६२
त्वदोय इह सत्पुर्य्यां च संस्थापिता अब्दा एव हि सप्त सप्ततिगुणाः पापान्तकृत्यै दृढं ।
प्रायश्चित्तकृते ऽद्धसो ऽनवरतं धर्म्मं च नेतुं भुवि मुद्रोकर्तुमपोशदृष्टिवचसी पुण्याग्रिमाभ्य
क्तये ॥७१॥ आज्ञाया हि यिरूषलेमनगरं निर्म्मातुमार्थ्यं पुनः पश्चात् खलूभिषिक्तराजसमयान्तं
सप्तवर्षास्तदा । स्युर्वै सप्तगुणा द्विषष्टिगुणकाश्चाथद्विषष्टिष्वहो सप्ताब्देषु पुनर्दुरर्त्तिसमये

तिष्ठेत् सरथ्यश्वयः ॥७२॥ सप्ताब्दात्तु परे द्विषष्टिगुणकाद्राजाभिषिक्तो ऽप्यसौ हन्तव्यो ऽस्ति
न तस्य चैव भविता पश्चाद्यहूद्यो गणः । किंत्वागन्तुरमुष्य राज्ञ इतरः संघः पुरीं सत्स्थलं
चाप्युम्र्म्यैव विनाशयिष्यति युधाशेषं च तं निर्जनं ॥७३॥ सप्ताब्दे स तु संविदं बहुजनैः सार्द्धं
नृपो ऽस्मिन् दृढीकुर्य्यात्खल्वथ चास्य मध्य इह स स्थाने बलिं साध्वरं । सम्यग्वै विनिवर्त्ति
यिष्यति यतो ऽपूतीकृतां वैरिणां पक्षैस्तन्निभृतीप्रकार्य्यमथ च स्थेयं सदा निर्जनं ॥७४॥ ६३
गुरुरुवाच ॥ एवं दान्येलसद्ग्रन्थे ऽव्यक्तं भव्यवचः स्थितं । पूर्य्यं यदवदत् खृष्टो निजकालात्
परे ऽचिरं ॥७५॥ हते राज्यभिषिक्ते ऽस्मिन् पूर्व्वोक्तसमयान्तरे । तथा दण्ड्यं पुरं ह्येव स्वसद्रा
जविवर्ज्जितं ॥७६॥ तन्नुन्नश्चेतरः संघो भीमो रौम्यः स्वसेनया । घातकान् घातयामास
ददाहापिच तत्पुरं ॥७७॥ सत्स्थलं चापि यत्पूर्व्वमासीत् तत्रापकर्म्म ते । निदधुस्तत्र नित्यं

बाध्वरादीनि न्यवर्त्तयन् ॥७८॥ चन्द्रादितिमिते ऽब्दे तत् खृष्टीये वैक्रमे त्वभूत् । अष्टाविंश
शते किंतु सप्ताब्दे प्राक् शकेश्वरात् ॥७९॥ एतस्माद्भीमकालात्तु दान्येलोक्त्यनुसारतः ।
सप्ताब्दाः सप्ततिगुणाः पूर्बस्था गणिता यदि ॥८०॥ तदाप्तो ऽब्दः कलेः पक्षजीवर्त्तुयम
संमितः । पूर्बं खृष्टशकान्नूनविंशाधिकचतुःशतः ॥८१॥ राजा द्वितीयदार्य्यूर्हि मन्दिर
स्यादिशत्तदा । पूर्बार्त्तक्षेरुषा रुद्धं निर्म्माणं पारसीककः ॥८२॥ तस्मिंश्च पुनरारब्धे यथा ६४
कूराः पुरादिशत् । सिद्धं सद्म यथाज्ञोक्तं तत्परे ऽब्दचतुष्टये ॥८३॥ ततो दुरर्त्तियुक्तेषु
द्विषष्टिगुणकेषु तु । सप्ताब्देषु सदातिष्ठदाखृष्टागति सत्पुरं ॥८४॥ तच्छेषे ऽस्मिन् यथा
प्रोक्तमूनत्रिंशत्तमे किल । तच्छकाब्दे स हन्तव्यो न स्वीयैस्तत्परे गणैः ॥८५॥ या द्युहे ऽपि
तु तत्पूर्बं तस्यासीत् प्रस्तुतिर्मृतेः । सतः पित्रभिषिक्तस्य शिष्य ते तामवर्णयं ॥८६॥

विक्रीतस्तु कृतघ्नशिष्यकमनोलुब्ध्याभिषिक्तो नृपः सर्व्वैर्द्वादशभिस्तदैवममुना तद्वत्त्रशेषे ऽन्वितः । आत्मीयालयतः समाप्य चरमं तत्रोपदेशं दृढं तत्सद्वीप्यवमानिनां पुरवहिःस्थां बेथनीयां गतः ॥८७॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (इषायभव्यवाक्यानां षष्ठ
त्रिपंचाशतमसर्गाभ्यां दान्येलभव्यवाक्यानां नवमसर्गाद्ज्रनह्मीयचरित्राभ्यां मत्थायस्य षड्
विंशसर्गान्मार्कस्य चतुर्द्दशसर्गाल्लूकस्य द्वाविंशसर्गाद्योहन्नेर्द्वादशसर्गाच्चोद्धृतः) पुण्यसप्ताहबुध ६५
वारचरित्रसूचको ऽभिषिक्तघातकालप्रस्तुतिर्नाम षष्ठो ऽध्यायः ॥

*शिष्य उवाच ॥ विक्रीतः शठशिष्येण बल्यधूरनिवर्त्तकः । सद्राजत्त्राणपर्व्वप्राग्गुरुवारे चकार किं ॥१॥ गुरुरुवाच ॥ सत्पालकचरित्रस्यान्तिमे यस्मिन् दिने ऽर्पयत् । आशेषं सो ऽखिलस्वीयेष्वन्नं स्वादुतमं वरं ॥२॥ स वृहस्पत्यहः पुण्यः सर्व्वैः खृष्टार्च्चिभिर्मतः । स्मरणीयाश्च

तस्यैव क्रियाः सर्वसमास्वपि ॥३॥ तत्प्रातर्बैथनीयातो नायात् प्राग्वन्महापुरं। शिष्यप्रश्नं
त्ववापैनमागन्तूत्सवगोचरं ॥४॥ श्रीयेषूशिष्या ऊचुः ॥ भवेदद्यैव सन्ध्यायां समारम्भ
स्तिथेः प्रभो। पौर्णमास्या यदन्तर्नः कार्य्यं त्राणीयभोजनं ॥५॥ अतः कस्मिन् स्थले
ऽस्माभिस्तदा श्वो वेश्वरोक्तितः। प्रस्तव्यं भोजनं पुण्यमैत्रयेत्यं त्वयेष्यते ॥६॥ गुरुरुवाच॥
इति संश्रुत्य सन्मोक्ता वरशिष्यौ तदानुदत्। पुरे प्रस्तरयोहन्नो प्राक् समादिश्य खल्विदं ६६
॥७॥ श्रीयेषूरुवाच ॥ मोसिशास्त्रानुसारेण प्रस्तुतं नः कृते युवां। सर्वाण्यन्नोपयुक्तानि
विद्यातं तु स्थलं तथा ॥८॥ पुरं प्रविशतोः साक्षान्निष्ठेद्धि युवयोर्नरः। धृतोदकलसस्तं च
प्रतोल्यामनुगच्छतं ॥९॥ यस्मिंस्तु स विशेद्गेहे तस्मिन् विष्टा तथा युवां। गृहस्थं ब्रूत
मेवं त्वामभिवक्त्यधुना गुरुः ॥१०॥ अन्तिकः समयो मे ऽस्ति ततो ऽहं त्राणभोजनं। यत्राद्यां

सह शिष्यैः सान्नशाला कुत्र विद्यते ॥११॥ इति पृष्टः स वां वड़ां शालामूर्द्धस्थितां तदा ।
दर्शयिष्यति तत्रैव सर्व्वाणि प्रस्तुतं युवां ॥१२॥ गुरूरुवाच ॥ इत्याज्ञां प्राप्य सीमोनयोहन्नो
नगरं गतौ । सर्व्वं चावापतुस्तत्र सम्यग् यद्वत्प्रभूदितं ॥१३॥ सर्व्वं मेध्यादिविषयं सायं
प्रस्तुत्य च ध्रुवं । आरब्धे सन्निधौ तत्रापेक्षेतामागतिं प्रभोः ॥१४॥ शेषशिष्यान्वितः सो
ऽस्मिन्नन्नशाल उपस्थितः । निशि स्वीयगणप्रेमलक्ष्मोपाक्रमतान्तिमं ॥१५॥ जगतो यत ६७
आत्मीयं पितरं प्रति निःसृतेः । इदानीमागतः काल इति जानन् महाप्रभुः ॥१६॥ तदा
यान् भुवने स्वीयानस्निह्यन्मानुषान् सदा । आशेषमपि तानार्य्यस्तथास्निह्यद्विशेषतः ॥१७॥
भोजने ऽतः समासीनः सशिष्यस्त्राणपर्व्वकं । अविमात्मीयभव्येज्याविम्बमालोक्य सो ऽब्रवीत् ॥
१८॥ श्रोयेषूरुवाव ॥ आत्मदुःखसहात्पूर्व्वं युष्माभिः सह खल्वहं । अत्तुमैच्छं महायत्नादे

तैत्राणीयभोजनं ॥१९॥ इतस्तद्धि पुनर्नाद्यां यावन्न किल पूरितं । तद्भवेदीशराज्यान्त
रिति युष्मान् ब्रवीम्यहं ॥२०॥ गुरूरुवाच ॥ तिक्तवल्लियुतं मिश्रनिःसृत्यन्त्यैङ्कमेव तत् ।
अत्वान्नं स सुरापात्रे न्यस्याशिषमुवाच तान् ॥२१॥ श्रोयेषूरुवाच ॥ धन्यवादान्वितं पात्र
मिदं विभजतात्मसु । यूयं यदधुना वच्मि स्मरन्तो वाक्यमेव तत् ॥२२॥ इतो न हि पुनः
पेया द्राक्षोत्पन्नसुरा मया । इयं यावन्न वो मध्य आगच्छेद्राज्यमैश्वरं ॥२३॥ गुरूरुवाच ॥ ६८
इत्युवाच महामोक्ता प्रत्नत्राणस्मृतिं यदा । वरमामकरोन्नूत्नमहात्राणाङ्कपूर्बिकां ॥२४॥
समाप्ते भोजने चास्मिन् निधेयो यत्परेऽरिषु । इष्कार्य्योतियहूदेन नागाविष्टहृदैव सः ॥
२५॥ तद्विज्ञः सुविदंश्चापि स्वहस्ते ऽखिलमर्पितं । पित्रेतीशावतीर्णश्चारोहिष्यंश्चैश्वरं
प्रति ॥२६॥ एवं ज्ञापयितुं शिष्यान् स तदोत्थाय भोजनात् । त्यक्तवस्त्रो वराशिं स

त्वन्धृात्मानमवेष्टयत् ॥२७॥ आधारेऽम्भस्ततो न्यस्य संप्रक्षालयितुं पदान् । शिष्याणां
मार्ष्टुमपि चारेभे स्वीयवराशिना ॥ २८ ॥ प्रस्तरस्तु यदा तद्वत् स्वामिनाधिगतस्तदा ।
उवाच त्वं प्रभो किं मे पादौ प्रक्षालयेरिति ॥२९॥ तदा तमवदद्येषूरिदानीं यत्करोम्यहं ।
तन्न वेत्स्यधुना किंतु पश्चाज्ज्ञास्यसि खल्विति ॥३०॥ प्रस्तरस्तु कदाचिन्मे पादौ न क्षाल
येः प्रभो । इत्युवाच दृढं किंतु येषूः प्रत्यब्रवीदिदं ॥३१॥ चेन्न प्रक्षालयेयं त्वामहं हे ६९
प्रस्तर ध्रुवं । तदा तव मया सार्द्धं भागो न स्यात्कदाचन ॥ ३२ ॥ इत्थमाकर्ण्य
शीमोनो न मेऽङ्घ्री केवलं प्रभो । किंतु हस्तौ शिरश्चापि क्षालयेत्यब्रवीत् ततः ॥ ३३ ॥
श्रीयेषूरुवाच ॥ यः स्नातः क्षालनं तस्मा आवश्यं केवलं पदोः । सम्यक् पूतोऽस्ति स
स्यापि यूयं नत्वखिलास्तथा ॥३४॥ गुरूरुवाच ॥ एवं प्रोवाच मोक्ता स्वनिधातृप्रठ

शिष्यवित् । तद्धेतोर्ह्युदितं पूता यूयं न त्वखिला इति ॥ ३५ ॥ सर्वेषां क्षालयि
त्वाङ्घ्रीन् पुनः स्वीयांशुकानि च । परिधायोत्थितस्तान् स इममादेशमब्रवीत् ॥३६॥
यीशुरुवाच ॥ यद्वः प्रति मयेदानीं कृतं तद्वित्थ किं ध्रुवं । गुरुं प्रभुं च मां ख्याथ
सत्यं सो ऽहं यतः स्थितः ॥३७॥ चेत्पदो ऽक्षालयं वो ऽहं प्रभुः सन् गुरुरेव च । तदान्यो ऽन्यं
पदो यूयं प्रक्षालयितुमर्हथ ॥३८॥ दृष्टान्तं ह्यददां नूनं युष्मभ्यं येन सर्वशः । यथाकरवमे ७०
वाहं यूयं कुर्य्यात वै तथा ॥३९॥ न श्रेयान् किङ्करो नाथान्न वा प्रेरयितुः प्रभोः । श्रेयां
स्तत्प्रेरितो ऽस्तीति सत्यं युष्मान् ब्रवीम्यहं ॥४०॥ यद्येतानि तु जानीथ हे मत्प्रेरितकिङ्कराः।
मङ्गलाः स्यात चेद्यत्नात्तानि कुर्य्यात सर्वशः ॥४१॥ भिन्नदेशाधिपा नूनं कुर्वते भृत्यशासनं ।
ये वशीकुर्य्युरेव स्वांस्ते ख्यातास्तत्सुकारिणः ॥४२॥ यूयं तु मा तथा स्यात महीयान्

यस्तु वो गणे । कणिष्ठ इव सोऽस्त्वेवं शास्ता सेवनकर्तृवत् ॥४३॥ कतरो ह्येतयो र्युष्मन्मते किल महत्तरः । भोजने किं समासीनः किं वा तत्परिचारकः ॥४४॥ अहं विद्ये नु वो मध्ये परिचारकवद्ध्रुवं । यूयं तु मत्परीक्षासु स्थिता नित्यं मया सह ॥४५॥ निधास्ये ऽहं च युष्मासु न्यधाद्यद्वत् पिता मयि । राज्यं राज्ञा मया सार्द्धं ततोऽद्यात पिवेत च ॥४६॥ तर्हि सिंहासनेष्वेव समासीनाः सगौरवाः । स्यातेस्त्रयेलवंशानां द्वादशानां विचा ७१
रकाः ॥४७॥ न त्वशेषगणस्योक्तमिदं वो विषये वचः । यान् यान् ह्यवृणवं पूर्वं तान् सर्वान् किल वेद्म्यहं ॥४८॥ द्वादशस्वपि तेष्वेकः पिवत्यत्ति च यो मया । सहेदानीं स सद्ग्रन्थे तद्वचःपूर्तये स्थितः ॥४९॥ मम योऽप्यतिमित्रतां गतो बहु यस्मिन्निहितं च कर्म्म मे । मम चान्नमखाददेव यो मयि पार्ष्णिं न्यसितुं स उद्यतः ॥५०॥ एतद्वो वाक्यमधुना

प्राक्तत्पूर्त्तेः प्रवक्ष्यतः । तत्पूर्त्तिसमये ऽहं सन्निमिति वो निश्चयो भवेत् ॥५१॥ यो यः कमपि
मन्नुन्नं लभेत लभते स मां । मां लभेत तु यः सो ऽपि नोत्तारं लभते मम ॥५२॥ गुरूरुवाच ॥
इदमुक्त्वा महामोक्ता दाविग्नोतोत्थितं वचः। पूर्त्तव्यमचिरात् तर्हि व्याकुलात्मेदमब्रवीत् ॥५३॥
श्रीयैषूरुवाच ॥ एको युष्मद्गणे नूनं मां निधास्यति शत्रुषु । इति सत्यतमं वाक्यं युष्मान्
सर्व्वान् प्रवक्ष्यहं ॥५४॥ गुरूरुवाच ॥ इति संश्रुत्य शिष्यास्तु निरैक्षन्त परस्परं । ७२
शङ्कित्वा कस्य विषये दुष्टं तत्कर्म्म सो ऽवदत् ॥५५॥ येषूप्रेष्ठस्तु यः शिष्यो योहन्निर्जिबि
दीयजः । तस्मिन्नेव समासीने प्रभुवक्षो ऽन्तिके तदा ॥५६॥ इङ्गितं निदधौ प्रष्टुं प्रभुं तत्
कठिनं वचः । प्रस्तराभिधसीमोनस्तदर्थज्ञानलिप्सुकः ॥५७॥ येषूवक्षो ऽन्तिकासीनस्ततो
योहन्निरेव सः । अवदत् कः प्रभो सो ऽस्ति त्वन्निधाता रिपुष्विति ॥५८॥ तत्काले चैक

शो ऽन्ये ऽपि प्रष्टुमारेभिरे प्रभो । किं सो ऽस्म्यहमिति व्यग्राः सर्वे ऽपि स किमस्म्यहं ॥५९॥
तदा स्वप्रेष्ठशिष्यस्य सशेषैकादशस्य सः । प्रश्नं प्रत्यवदन्मोक्तार्तिशङ्काहृतये तथा ॥६०॥
श्रीयेषूरुवाच ॥ भाजने यो मया सार्द्धं करं न्यस्य करान्मम । आर्द्रखण्डं लभेतैव निधाता
खलु सो ऽस्ति मे ॥६१॥ गामो नरसुतो नूनं यद्वत्तद्विषये पुरा । पुण्यग्रन्थेषु लिखितं शक्या
किल दुरात्मनां ॥६२॥ किंतु येन नरेणास्यां नरपुत्रो निधीयते । धिक्तं श्रेयो भवेत्तस्मै ७३
चेन्नाजायत स क्वचित् ॥६३॥ गुरुरुवाच ॥ इत्याकर्ण्य यहूदः स इष्कार्य्योतिरहं गुरो । किं
सो ऽस्मीत्यवदत् तं चाब्रवीद्येषूस्त्वयोदितं ॥६४॥ इत्थमुक्त्वा प्रभुः पूर्व्वैमेस्त्रयेल्यं समाप्तवान् ।
आणीयभोजनं नूत्नं स्वयज्ञाङ्कं समार्पयत् ॥६५॥ गोधूम्यपिष्टमादाय तदाशीर्व्वादतः परे ।
बभञ्जाथ समस्तेषु तेषु तद्विदधौ पृथक् ॥६६॥ तांश्चोवाच स आदाय यूयमन्नेदमेकशः ।

मत्स्मृत्यै यत एतन्मे शरीरं ह्यस्ति खल्विति ॥६७॥ पानपात्रं तदादाय धन्यवादात्परे
ऽपि सः । विदधौ तेषु सर्व्वेषु तथोवाच च तान् प्रति ॥६८॥ एतस्माद्यूयमखिला मत्स्मृत्यै
पिवत ध्रुवं । इदं ह्यस्ति ममासृग् वोऽर्थे सिक्तं नूत्नसंविदि ॥६९॥ तद्बहूनां कृतेऽसृक् तु
सिच्यते पापमुक्तये । द्राक्षोत्पन्नसुरां त्वेनां न पिवेयमहं पुनः ॥७०॥ यावन्न किल
युष्माभिः सार्द्धं राज्ये पितुर्मम । नूत्नामपि पिवेयं तां संवित्पूर्त्यङ्कामिति ॥७१॥ तथा ७४
स्वप्रेम्ण आश्चर्य्यं चिह्नं तेभ्योऽददात्प्रभुः । मरिष्यन् सकलेभ्यश्च प्रत्येष्यद्भ्योऽपि तद्वचः ॥७२॥
एतत्कुर्व्वन्ति नित्यं हि शिष्य खृष्टार्च्चिनोऽखिलाः । तच्छरीरासृगङ्कान् हि पिवन्तोऽदन्त
एव च ॥७३॥ तत्प्रेरितगणास्तेऽङ्कान् लभमाना हि तान् प्रियान् । गौधूम्यपिष्टं सद्राक्षं पुण्यी
भूतं तदाशिषा ॥७४॥ तथा स्वप्रभुसन्मृत्युं प्रशंसन्ति निरन्तरं । नित्यजीवनदं पापहर

मातन्नवागति ॥७५॥ शिष्य उवाच ॥ प्रभोरव्यक्तवचनं त्वया प्राक्कथितं गुरो ।
स्मरामि बहुपातस्यानुगानामपि कारणं ॥७६॥ सत्यमन्नं हि मे मांसं सत्यं पीतमसृङ्मम ।
मन्मांसभुगसृक्पायी मय्यस्त्यास्मिंस्तथाप्यहं ॥७७॥ यथाहं जीवता पित्रा प्रेरितो जीवितो
ह्यतः । तथा यो ऽप्यत्ति मां सो ऽतो मया जीविष्यति ध्रुवं ॥७८॥ इत्यव्यक्तवचःपूर्त्ति
चिह्नं वेद्म्यधुना गुरो । निहितं वरशिष्येषु सन्मण्डल्यधिकारिषु ॥७९॥ द्वादशानां ७५
गणे त्वेषां यो ऽभिशापिस्वरूपकः । शठो ऽभून् किं तथा सो ऽपि तत्पुण्यान्नमविन्दत ॥
८०॥ गुरुरुवाच ॥ तन्नूत्नभोजने भोक्ता यथोक्तं निजभाजनात् । आर्द्रखण्डं ददौ तस्मै तत्र
न्यस्तकराय हि ॥८१॥ इष्कार्य्योतियहूदस्तु स सीमोनसुतो यदा । सर्वाग्रे प्रभुतो लेभे स्व
शठत्वस्य लक्ष्म तत् ॥८२॥ तदा भूताधिपेनैवाविष्टो दुरभिशापिना । वहिर्निर्गन्तुमुत्तस्थौ

सद्यो नरकजो निशि ॥८३॥ यत्क्षणे तूदतिष्ठत्स तदा तं प्रभुरब्रवीत् । यत्करोष्याशु
तत्कुर्वित्युक्त्या शिष्यैरबुद्धया ॥८४॥ तेषां केचिद्य हूदस्य कोषधारित्वहेतुतः । आज्ञां तं प्रत्य
मूं येष्वा किलानुममिरे कृतां ॥८५॥ पर्व्वार्थे यन्न आवश्यं क्रीणीह्याश्विति वस्तु वा ।
दीनेभ्यो देयमादेहीत्यर्थं ते ऽन्वभवन् प्रभोः ॥८६॥ भूताविष्टाय तस्मै तु स्वदुःसंकल्पपूर्त्तये ।
आशुत्वाज्ञां प्रभुप्रोक्तां नह्यबुध्यन्त ते तदा ॥८७॥ निर्गते तु शठे तस्मिन् दुर्म्मनोयाजकान् ७६
प्रति । स्वीयस्वामिनिधानार्थं प्रभुरेतद्वचो ऽब्रवीत् ॥८८॥ श्रीयेषूरुवाच ॥ अधुना नर
पुत्रस्य माहात्म्यसमयः किल । उपतस्थौ विभोश्चापि तस्मिन् माहात्म्यभासनं ॥८९॥
चेतस्मिंस्त्वीशमाहात्म्यं बभौ पूर्व्वमितो ऽपि तं । विभुरात्मनि माहात्म्ययुतोकुर्य्यात्सप
द्यपि ॥९०॥ अल्पकालं स्थितो बाला युष्माभिः सह खल्वहं । यूयं मां मृगयिष्यध्वे मत्पूर्व्वो

ऽप्यनुसारतः ॥९१॥ यत्र तिष्ठाम्यहं ह्येव तत्र गन्तुं न शक्नुथ । इति यद्वद्यहूदीयांस्तथा वो ऽपि ब्रवीम्यहं ॥९२॥ नूतनाज्ञां वो ददाम्येव स्नेहितुं हि परस्परं । यथास्निह्यमहं युष्मान् स्निह्येतापि मिथस्तथा ॥९३॥ मच्छिष्याः संस्थिता यूयमिति सर्वे नरास्तदा । विज्ञा स्यन्ति यदि स्नेहं धारयेत परस्परं ॥९४॥ गुरुरुवाच ॥ इत्युक्तवति सर्वज्ञे मोक्तरि प्रस्तरो ऽब्रवीत् । प्रभो क्व गच्छसीत्येव तं तु प्रत्यवदत्प्रभुः ॥९५॥ श्रीयेषूरुवाच ॥ यत्र गच्छाम्यहं तत्रा न्वेतुं न क्षमसे ऽधुना । किंतु पश्चादिहापि त्वं मां खल्वनुगमिष्यसि ॥९६॥ प्रस्तर उवाच ॥ कस्माद्धेतोः प्रभो ऽहं त्वामन्वेतुमधुना ध्रुवं । न क्षमे ऽहं निधास्ये हि त्वदर्थे निजजीवनं ॥ ९७॥ श्रीयेषूरुवाच ॥ जीवनं स्वं मदर्थे किं त्वं निधास्यसि सांप्रतं । अहो सीमोन सीमोन मदुक्तं ते वचः शृणु ॥९८॥ त्वदादीनभिशापी हि ग्रहीतुमधुना शठः । गोधूममिव चालन्यामेच्छ 77

श्चालयितुं च वः ॥९९॥ त्वद्विश्वासाचलत्वायाधुना मत्पितरं त्वहं । प्रार्थयं त्वत्कृते नूनं
तद्दुःसंकल्परोधकः ॥१००॥ त्वं तु तद्दुष्टसंक्षुब्धेः प्रत्यावृत्तो यदा भवेः । तदा तद्वन्निजा
न्भ्रातॄंश्चञ्चलान् सुस्थिरीकुरु ॥१०१॥ प्रस्तर उवाच ॥ हे प्रभोऽहं त्वया सार्द्धमिदानीं
बन्धनालयं । मरणं चाप्युपैतुं वै मुदातिप्रस्तुतोऽस्म्यपि ॥१०२॥ श्रीयेषूरुवाच ॥ प्रस्तरं
तन्निशान्ते प्राक् ताम्रचूडध्वनेरपि । कर्त्तव्यः खलु मज्ज्ञानास्वीकारस्त्रिरपि त्वया ॥१०३॥ ७८
गुरुरुवाच ॥ शिष्याग्र्यस्य तथा भव्यमचिरात् पातमुक्तवान् । मानिनोऽपि प्रभुः सर्वानिद
मेकादशाब्रवीत ॥१०४॥ श्रीयेषूरुवाच ॥ रूप्याधारैः सकोषैर्वो विहीनाननुपानहः । यदाहं
प्रैरयं किं वो वस्त्वप्राप्तिरभूत्तदा ॥१०५॥ गुरुरुवाच ॥ एवं पृष्टास्त ऊचुर्नाप्राप्तिर्नः
क्वाप्यभूदिति । प्रभुस्तूवाच यस्यैव रौप्याधारोऽधुना नहि ॥१०६॥ स तं प्राप्नोतु तद्वच्च पान्थ

कोषोऽपि यस्य न । यस्यासिर्नास्ति वस्त्रं स्वं विक्रीयाप्नोत्वसिं स तु ॥१०७॥ सा ख्रीष्टविषयो
क्तिर्हि गणितः सोऽघकृत्स्विति । मय्येव पूरणीयास्ति यथा मद्विषयाखिलाः ॥१०८॥ इदं
संश्रुत्य तेऽवोचन् प्रभोऽसौ द्वाविह स्थितौ । इत्युक्तः स त्वलमिति प्रोच्येदं तानुपादिशत् ॥
१०९॥ श्रीयेषूरुवाच ॥ मातिसंक्षुभ्यतां युष्मद्धृदयं परमेश्वरे । प्रतीतिर्वोऽस्ति तद्वच्च
मय्यपि प्रत्ययोऽस्तु वः ॥११०॥ मत्पितुः सद्मनि स्थानान्यनेकानि स्थितानि हि । तन्न चेत्स्या ७९
त्तदा यूयं ज्ञापिताः स्यात तन्मया ॥१११॥ किंतु तत्र स्थलं वोऽपि प्रस्तोतुं किल गाम्यहं ।
तत्कृत्वा त्वागमिष्येऽहं पुनर्वो लप्स्यये समं ॥११२॥ ततोऽहं यत्र तत्रापि स्यात यूयं सुवित्थ
हि । स्थानं यत्राप्यहं गामी तन्मार्गमपि वित्थ च ॥११३॥ गुरुरुवाच ॥ एवं सान्त्ववचः
स्वीयान् संवदत्यनुगान् प्रभौ । शङ्कादुःखयुतस्तेषामेकः प्रत्यब्रवीत्तदा ॥ ११४ ॥ थोमा

उवाच ॥ यत्र त्वं हे प्रभो गामी तन्न विद्मः स्थलं वयं । अतस्तन्मार्गमेवाहो कथं वेत्तुं क्षमा
महे ॥११५॥ श्रीयेषूरुवाच ॥ अहं मार्गो ऽस्मि सत्यं च जीवनं चापि संस्थितः । नोपैति
पितरं कश्चिन्मन्मार्गेण विना नरः ॥११६॥ चेद्वेत्स्यत मां यूयं पितरं मे ऽप्यवेत्स्यत ।
अधुना स तु युष्माभिर्ज्ञातः संदृष्ट एव च ॥११७॥ गुरुरुवाच ॥ इति श्रुत्वा फिलिप्पस्तमूचे
ऽस्मान् पितरं प्रभो । दर्शयैतेन चालं नः स्यादित्युक्तो ऽब्रवीत्स तु ॥११८॥ श्रीयेषूरुवाच ॥ ८०
इयत्कालमहं सर्वैर्युष्माभिः सह किं स्थितः । न त्विदानीमपि ज्ञातो हे फिलिप्प त्वया
कथं ॥११९॥ मां ददर्श हि यः सो ऽपि ददर्श पितरं ततः । कथं त्वं वक्षि पितरमस्मान्
दर्शय खल्विति ॥१२०॥ अहं पितरि संस्थो हि पिता चापि तथा मयि । इत्थं किं हृदये
शिष्य त्वं न विश्वसिषि स्वयं ॥१२१॥ यान्यहं वच्मि वाक्यानि नात्मतो वच्मि तान्यहं ।

मयि तिष्ठन् पिता मे तु स एव कुरुते क्रियाः ॥१२२॥ अहं पितरि मय्येवं पितेत्युक्तिं मम
स्वयं । प्रतीत ननु चेत् तर्हि क्रियाहेतोः प्रतीत मां ॥१२३॥ मां यः प्रत्येति सो ऽतो ऽपि कर्त्तैवं
मत्कृतक्रियाः । ताभ्यो महीयसीश्चापि पितरं गाम्यहं यतः ॥१२४॥ इत्यृतं वच्मि वो यद्यन्म
न्नाम्ना प्रार्थयेत च । तत्कर्त्तास्मि पिता चातः पुत्रे माहात्म्यमाप्स्यति ॥१२५॥ यद्यद्याचेत
मन्नाम्ना यूयं कर्त्तास्म्यहं हि तत् । चेन्मां स्निह्येत यूयं तु तदाज्ञा मम रक्षत ॥१२६॥ पितरं ८१
चार्थयिष्ये ऽहं स त्वादेष्टारमेव वः । दातान्यं सह युष्माभिः स्थायिनं शाश्वतीः समाः ॥
१२७॥ स सत्यात्मैव यं लब्धुमशक्ता किल संसृतिः । यतस्तं नेक्षते नूनं न वा जानाति ता
मसी ॥१२८॥ तं यूयं तु सुजानीथ स यतो युष्मदन्तिके । स्थितः संप्रति पश्चात्तु तिष्ठेद्वो
ऽभ्यन्तरे सदा ॥१२९॥ न विहास्यामि वो ऽनाथानहमेष्यामि वः प्रति । अल्पकालो

ऽवशिष्टो ऽथ मां न द्रक्ष्यति संसृतिः ॥१३०॥ यूयं तु द्रक्ष्यथ स्पष्टं यतश्च मयि जीवनं । ध्रुवं
तिष्ठत्यतो यूयमपि जीविष्यथ ध्रुवं ॥१३१॥ अहं स्वपितरि स्थाता यूयं चापि तथा मयि ।
अहं युष्मासु चेत्येव तत्काले ज्ञास्यथ स्फुटं ॥१३२॥ यो दधाति मदाज्ञास्तु रक्षत्यपि च
कर्म्मभिः । स एव स्नेहकारी मे ज्ञेयो नरगणे स्थितः ॥१३३॥ यस्तु स्निह्यति मां तं मे पिता
स्नेहिष्यति ध्रुवं । तं स्नेहिष्याम्यहं चैवात्मानं दर्शयितास्मि च ॥१३४॥ गुरुरुवाच ॥ तदा ८२
नाम यहूदो यो द्वादशानां गणे स्मृतः । नेष्कार्य्योत्यभिधः किंतु थद्दायः प्रभुबान्धवः ॥१३५॥
स इमां सत्प्रसादोक्तिं श्रुत्वाव्यक्तार्थिकां तदा । अतिजिज्ञासयावोचदिदं सर्व्वविदं गुरुं ॥१३६॥
अल्फायजयहूद उवाच ॥ प्रभो त्वं कथमात्मानं तथा संदर्शयिष्यसि । अस्मान् न तु सकृत्
सर्व्वां संसृतिं भूमिमण्डले ॥१३७॥ श्रीयेषूरुवाच ॥ स्निह्येन्नरो मां यदि मे तदा स वाक्यं सु

रक्षिष्यति मत्पिता च । स्निह्येदतस्तं नरमप्यथावामभ्येत्य तिष्ठेव तदन्तिकेऽपि ॥ १३८॥ स्निह्येन्न मां यस्तु स वै मदीयं वाक्यं न रक्षत्यपि यत्तु वाक्यं । युष्मच्छ्रुतं तन्न मदीयमस्ति पितुस्तु मत्प्रेरयितुस्तदेवं ॥१३९॥ एतान्यवोचं व उपस्थितः सन् किंत्वन्य आदेशक एव यो वः । पित्रा प्रणोद्यो मम नामशक्तौ भूमौ सदात्माखिलवस्तुविज्ञः ॥१४०॥ स एव सर्वाण्युपदेक्ष्यते वो यद्यत्पुराण्यक्तसदर्थकं च । युष्मान्मयोक्तं तदपि स्फुटं स संस्मारयिष्य ८२
त्यतिविद्यया वः ॥१४१॥ सन्धिं नु युष्मासु जहामि नूनमात्मीयसन्धिं प्रददाम्यहं वः ॥ न संसृतिप्रत्त इवास्ति सोऽन्तो मा क्षुभ्यतां मा च बिभेतु हृद्वः ॥१४२॥ अहं हि गामी पुनरागमिष्यन् युष्मान् प्रतीत्थं स्मरथोदितं मे । स्निह्येत यूयं दृढमेव चेन्मां पित्रन्तिकेऽप्यात्मगतिं ब्रुवन्तं ॥१४३॥ तदातिहृष्येत तदुक्तितोऽपि मत्तः पिता ह्येव महत्तरोऽस्ति । युष्मान्

पुरैतान्यधुना तु वच्मि ततः प्रतीयात यदा तथा स्यात् ॥१४४॥ 'नेतस्तु युष्माभिरह स
हैव बहु प्रवक्ष्ये समुपस्थितो हि । एतज्जगत्संमृतिनाथ ऽयो नाप्नोति किंचित्तु मयि स्वकीयं ॥
१४५॥ स्निह्याम्यहं सत्पितरं तदाज्ञानुसारतश्चाप्यखिलं करोमि । इत्थं जगज्ज्ञापयितुं स
मीहे ·थोत्तिष्ठतेतो वयमेव याम ॥१४६॥ गुरूवाच ॥ इत्यैशवचसः पश्चाऽन्यवादं प्रगाय
ते । सर्व्वे त्राणान्नशालातो रात्रौ रथ्यासु निर्गताः ॥ १४७॥ प्रात्नत्राणमहोत्सवान्नघ ८४
सनात्पश्चात्तथा सत्प्रभुर्नूत्नत्राणसदन्नमेव परमं स्वासृक्तनूरूपकं । संस्थाप्यात्मगणाय सर्व्वभुवने
प्रेमात्मने धर्म्मिणे श्रेयः सान्त्वनवाक्यमप्युदितवान् श्रेष्ठद्रुशैलं गतः ॥१४८॥ इति श्रीखृष्टसं
गीतायां मोक्षमाहात्म्यपर्व्वणि (मोसिरचितपंचशास्त्राद्वाविंशतीतानामेकचत्वारिंशान्मत्थायस्य
षड्विंशसर्गान्मार्कस्य चतुर्द्दशसर्गाल्लूकस्य द्वाविंशसर्गाद्योहन्नेस्त्रयोदशचतुर्द्दशसर्गाभ्यां पौलस्य

कुरिन्थीयमण्डलीं प्रति प्रथमलिपेरेकादशसर्गाद्वोद्धृतः) पुण्यसप्ताहवृहस्पतिवारपूर्ब्बचरित्र
सूचकः सद्भोजनाशीर्ब्बादो नाम सप्तमोऽध्यायः ॥

गुरुरुवाच ॥ तथा रीत्यनुसारेण वरशिष्यान्वितः प्रभुः । यिरूषलेमतः श्रेष्ठवृक्षाद्रिध्वनि नि
र्ययौ ॥१॥ निर्याने चरमेऽस्मिंस्तु स एकादश तान् निशि । स्वदुष्टसखहीनान् वै चलतोऽभ्य
ब्रवीदिदं ॥२॥ श्रीयेषूरुवाच ॥ मद्धेतोर्निखिला यूयं स्यातास्यां पातिना निशि । प्रवक्तृ ८५
जकरीयस्य प्रत्नवाक्यानुसारतः ॥३॥ अयि खड्ग निहन्तुमाशु मत्सखमुत्तिष्ठ ममावि
पालकं । निहते त्वविपालके मया भवितारोऽप्यवयः पृथक् पृथक् ॥४॥ इत्थं सेनेश
विभुना यथोक्तं पुण्यपुस्तके । हते मय्यखिला यूयं छिन्नभिन्ना भविष्यथ ॥५॥ किंत्वहं
मरणस्थानाद्यदा स्यां पुनरुत्थितः । तदा वोऽग्रे गमिष्यामि गलीलां पालको ह्यहं ॥६॥

गुरूरुवाच ॥ एवं भव्यवचः श्रुत्वा स्ववृन्दविषयं स्फुटं । प्रस्तराभिधसीमोनोऽवादोदति
कुतूहलात् ॥७॥ प्रस्तर उवाच ॥ त्वद्धेतोर्निखिला एव यद्यपि स्युर्निपातिताः । न तथैव
भविष्यामि पातितोऽहं कदाचन ॥८॥ श्रीयेषूरुवाच ॥ यावन्नास्वीकृतिं त्रिर्मे कुर्य्यास्तावद्द्वि
रद्य न । निशि स्यात्ताम्रचूडस्य वागिति त्वां ब्रवीम्यृतं ॥९॥ प्रस्तर उवाच ॥ यद्यप्या
वश्यकं मे स्यान्मर्त्तुमेव त्वया सह । तदाप्यस्वीकृतिं तेऽहं न करिष्ये कदाचन ॥१०॥ ८६
गुरूरुवाच ॥ इत्युवादात्मदौर्बल्याज्ञानादतिकुतूहली । सीमोनस्तद्वदपि च शेषाः शिष्या
दथाब्रुवन् ॥ ११ ॥ अचिरात्पूरणीयं तु त्यजन् भव्यवचोऽखिलं । प्रभुर्नूत्नोपदेशं तान
स्थिरानिममब्रवीत् ॥ १२ ॥ श्रीयेषूरुवाच ॥ द्राक्षाद्रुमोऽहं किल सत्यरूपः पिता तु मे तत्कृ
षकोऽस्ति नूनं । मयि स्थिता यापि च निष्फला स्याच्छाखा छिनत्त्येव स तां समन्तात् ॥

१३॥ मत्स्था तु शाखा फलदा भवेद्या पुनाति तां सोऽधिकशस्यदन्यै । यूयं तु मत्प्रोदित
वाक्यतो वो भूता इदानीमपि पूतरूपाः ॥१४॥ मयि ध्रुवं तिष्ठत खल्वहं च तिष्ठानि युष्मासु
यथा हि शाखा । स्वयं द्रुहीना फलदैव न स्यात् तथैव यूयं न मयि स्थिताश्चेत् ॥१५॥ द्राक्षा
द्रु ोऽहं हि शिपाश्च यूयं यो मत्स्थितः स्याद्यपि यत्स्थितोऽहं । फलं स दाता बहु मां विना
हि यूयं न कर्तुं किमपि क्षमाः स्थ ॥१६॥ यो यो न तिष्ठेन्मयि सोऽपहीनश्छिन्ना शिफेवाप्यव ८७
शुष्क एव । संचित्य ताश्चापि नराः किलाग्नौ प्रणिःक्षिपन्ति प्रदहन्ति चापि ॥१७॥ तिष्ठेत
यूयं मयि चेन्मदीयवाक्यं च चेद्वोऽन्तर एव तिष्ठेत् । यद्यत्तदा कांक्षथ यूयमेतत्संप्राथ्र्य
खल्वाप्स्यथ तुष्टचित्ताः ॥१८॥ भवेत भूयिष्ठफलप्रदा यत्तेनैव तेजो लभते पिता मे । तथैव
चापि स्थिरसत्यताया यूयं मदीया हि भवेत शिष्याः ॥१९॥ अस्निह्यदाय्र्यस्तु पिता यथा मां

तथैव वोऽस्निह्यमपीशजोऽहं । अतोऽपि सर्वाधिकयत्नतोऽपि यूयं मम प्रेम्ण्यवतिष्ठतैवं ॥
२०॥ रक्षेत यूयं यदि मामकाज्ञा मत्प्रेम्ण्यवस्थास्यथ तर्हि सम्यक् । यथाहमात्मीयपितुः
किलाज्ञाः सुरक्ष्य तत्प्रेम्ण्यवतिष्ठ एवं ॥२१॥ मदीयहर्षस्य तु सद्गुणस्य युष्मद्धृदन्तःस्थितये
सदैव । युष्मत्सदानन्दसुपूर्तये चाप्येतानि वाक्यान्यहमब्रुवं वः ॥२२॥ यथा हि वोऽस्निह्य
महं तथान्योऽन्यं स्निह्यतेत्थं मम संस्थिताज्ञा । न्यस्येत्प्रियार्थे निजजीवनं चेन्नरोऽधिकं प्रेम ८८
न विद्यतेऽस्मात् ॥२३॥ यूयं प्रिया मे यदि यन्मया व आज्ञातमेवाखिलमाचरेत । नाख्यामि
दासांस्त्वित एव वोऽहं स्वनाथकार्य्यं न हि वेत्ति दासः ॥२४॥ प्रियांस्तु युष्मानित एव
सम्यगाख्यामि यस्मादहमात्मपित्रा । यच्छ्रावितं तत्सकलं समन्तादज्ञापयं वोऽतिरहस्य
वादी ॥२५॥ यूयं तु मां नावृणुतैव किंतु युष्मान् कृपातोऽवृणवं किलाहं । समार्पयं चैव यतः

प्रगत्य फलं प्रदध्यात बहु स्थिरं च ॥२६॥ ततोऽपि यद्यत्पितरं मदीयनाम्नार्थयेतैव स
तत्प्रदद्यात् । समर्प्य वस्तत्कृत एव यत्नात्परस्परं स्नेहितुमादिशामि ॥२७॥ चेत्संसृति
र्द्रुह्यति वस्तथा साद्रुह्यत्पुरा मामिति वित्थ सम्यक् । यूयं तु चेत्संसृतिजा भवेतास्नेहि
ष्यदेव स्वजनांस्तदा सा ॥२८॥ यस्मात्तु नो संसृतिजाः स्थ किंतु मया वृताः संसृतिमध्यतो
ऽतः । सा वः सदा द्रुह्यति मद्वचस्तु स्मार्य्यं न दासोऽर्य्यतरोऽस्ति नाथात् ॥२९॥ इत्यु ८९
क्तितो मां समताडयंश्चेत्तथैव ते वः किल ताडयेयुः । चेन्मे त्वरक्षन्नुपदेशमार्य्यं रक्षेयुरेवं किल
युष्मदीयं ॥३०॥ युष्मांस्त्विदं कुर्य्युरमी समस्तं मन्नामहेतोर्यत एव मां यः । संसार
मध्येऽनुददीश्वरस्तं सम्यङ्न जानन्ति तमोविमग्नाः ॥३१॥ चेन्नाहमभ्येत्य समब्रवं तान् न
स्यादघं तेष्वधुना तु नास्ति । तद्वारणोपाय इतो यतो यो द्रोह्यस्ति मे द्रोह्यपि मत्पितुः सः ॥

३२॥ क्रियाः किलान्येन न केनचित्प्राकृता अहं तेषु न चेद्कार्षं । न स्यादघं तेष्वधुना तु दृष्ट्वाद्रुह्यन्नमी मां पितरं च मे ऽपि ॥३३॥ द्रुह्यन्ति ते मां तु मृषेति तेषां सद्ग्रन्थमध्ये लिखितोक्तिपूर्त्यै । तत्सर्वमासीद्त एव यं व आदेशकं स्वीयपितुः प्रणेतस्ये ॥३४॥ स वै सदात्मा पितृनिःसृतो ऽतः सत्यः प्रसाक्षी विषये मम स्यात् । यूयं तथा साक्षिण एव भव्या मया सहाद्यावधि संस्थिता हि ॥३५॥ अनपेक्षितदुःखौघाद्यूयं यन्नाप्नुयात तु । पातहेतुं तदर्थे ऽहमेतानि प्रवदामि वः ॥३६॥ युष्मान् हतमठीकुर्य्युरागामी समयो ऽपि च । यदा हन्तैव वो यः सो ऽस्मिन् मन्येतेशसेवनं ॥३७॥ एवं कुर्य्युरमी यस्मान्न मां मत्पितरं न वा । विदुः कालागतौ त्वेतत्स्मृत्यै वो वच्मि सांप्रतं ॥३८॥ न त्वेतान्यवदं पूर्वं युष्माभिर्हि सहस्थितः । किंतु प्रेरयितारं स्वमिदानीं गाम्यहं ध्रुवं ॥३९॥ न च युष्मासु मां

कोऽपि त्वं क्व गामीति पृच्छति । किंत्वेतत्कथनान्मेऽतो दुःखव्याप्तहृदः स्थ नु ॥४०॥
सत्यं वच्मि तु वोऽर्थे मद्गमनं सफलं भवेत् । यतोऽहं चेन्न गच्छेयं नागाम्यादेशकः परः ॥
४१॥ गत्वाहं प्रेरयिष्ये तु तं वः स त्वेत्य संमृतिं । पापधर्म्मविचाराणां विषये विवदिष्यते ॥
४२॥ संमृतेः पापविषयो विवादस्तेन खल्वतः । करणीयो यतो मां ते न प्रत्यायन् कदा
चन ॥४३॥ सद्धर्म्मविषयः कार्य्यस्तद्विवादोऽपि तेन तु । यतोऽहं पितरं गामीतश्च मां न ९१
प्रपश्यथ ॥४४॥ विचारविषयः कार्य्यस्तद्विवादोऽपि तेन च । यतः संमृतिनाथोऽपि
विचारमधुनाप्नुते ॥ ४५ ॥ युष्मान्प्रत्यधिकं वाच्यं भूर्यपि त्ववशिष्यते । किंत्वियत्सां
प्रतं यूयं दृढं सोढुं न शक्नुथ ॥४६॥ सत्यात्मा तु यदागामी स सत्येऽप्यखिले तदा । युष्मा
न्नेष्यति न ह्यात्मवस्तूनि स वदिष्यति ॥४७॥ यद्यत्तु शृणुयात्तत्स ब्रूयाद्भव्यानि चापि वः ।

ज्ञापयिष्यति मे चापि माहात्म्यं दर्शयिष्यति । यस्मान्मदीयवस्तूनि लब्ध्वा ज्ञापयिता स
वः ॥४८॥ पितुर्यद्यदस्ति तन्मे ऽपि स्थितं सर्वमतो ऽब्रवं । स मदीयानि वस्तूनि लब्ध्वा वो
ज्ञापयेदिति ॥४९॥ अल्पे काले गते मां न पश्येताल्पे पुनर्गते । ईक्षिष्यध्वे तु यस्मात्स्वं
पितरं प्रति गाम्यहं ॥५०॥ गुरुरुवाच ॥ इत्थं संश्रुत्य शिष्याणां के ऽप्यवोचन् परस्परं ।
अल्पे काले गते मां न पश्येताल्पे पुनस्त्वितः ॥५१॥ ईक्षिष्यध्व इति प्रोक्तवचसो ऽर्थो ऽस्ति ९२
कीदृशः । यस्मात्स्वं पितरं चाहं गामीत्युक्त्यर्थ एव कः ॥५२॥ एवमुक्त्वा मिथो ऽवोचन्नल्प
इत्यादिकं वचः । न संबुध्यामहे सम्यगव्यक्तमिति विस्मिताः ॥५३॥ एतज्ज्ञानंस्तु सन्मोक्ता
तांश्च तत्प्रष्टुमिच्छुकान् । नोरवानपि संदृश्य तथा समवदत्पुनः ॥५४॥ श्रीयेषूरुवाच ॥
किं याचध्वे ऽर्थमुक्तेर्मे ऽल्पे काले मां न पश्यथ । पुनरल्पे गते चैवेक्षिष्यध्वे तर्हि मामिति ॥

५५॥ सत्यं वः प्रवदाम्येतदचिरात्साश्रुलोचनाः । विलपिष्यथ यूयं हि हर्षिष्यति तु सं
सृतिः ॥५६॥ अल्पकाले तदा दुःखमग्नाः स्थास्यथ मत्कृते । किंतु तस्मात्परे युष्मद्दुःखं
हर्षीभविष्यति ॥५७॥ प्रसूतिकाले समुपस्थिते हि स्त्री दुःखमाप्नोति शिशौ तु जाते । पूर्वा
र्त्तिनं विस्मरति प्रहर्षात्संसारमध्ये नरजन्महेतोः ॥५८॥ तथैव यूयं ह्यधुनाप्नुथार्त्तिं द्रक्ष्यामि
भूयस्त्वहमत्र युष्मान् । तदा प्रहर्षिष्यति हृद्व एव हर्षं न तं वोऽपहरेत्तु कोऽपि ॥५९॥ मां ९३
खल्वमुष्मिन् समये न किंचिद्याचेत यूयं पितरं तु यद्यत् । याचेत नाम्ना मम हीनशङ्का
स्तदेव युष्मभ्यमितः स दाता ॥६०॥ पूर्वं किलैतत्समयान्न किंचिन्नाम्ना ममायाचत विश्व
नाथं । इतस्तथा याचत तु प्रगाढं नित्यं च संप्राप्स्यथ हर्षपूर्त्यै ॥६१॥ इयन्ति गूढोक्तिभि
रेव युष्मान् समब्रवं काल उपस्थितस्तु । ब्रूयां न गूढैः किल वो यदाहं स्पष्टं वदेयं विषये

पितुस्तु ॥६२॥ तदार्थयेध्वं हि मदीयनाम्नाभीष्टं समस्तं पितरं त्वहं स्वं । युष्मत्कृते
प्रार्थयितास्मि तर्हीत्येतद्वचो नास्त्यधुना मदीयं ॥६३॥ पिता स्वयं स्निह्यति वो हि सम्यग्
यूयं यतोऽस्निह्यत मामिदानीं । तथापि च व्यश्वसताहमीशाद्विनिःसृतोऽवातरमत्र चेति ॥
६४॥ विनिःसृतोऽहं पितृतो हि पूर्वं संसारमध्येऽपि ततोऽवतीर्णः । पुनश्च संसारमहं
विवर्जन् गच्छामि नूनं पितृसंनिधाने ॥६५॥ गुरूरुवाच ॥ एवमाकर्ण्य सन्देहहरमी ९४
शात्मजेन तत् । अभ्युक्तमवतीर्णेन वचः प्रत्यूचुरेव ते ॥६६॥ श्रीयेषूशिष्या ऊचुः ॥ व्यक्तं
त्वयाहो अधुना न गूढमुक्तं ततः सर्वविदं वयं त्वां । विघ्नो न चावश्यकमन्यदेव प्रष्टुं त्वमी
शोत्थ इति प्रसिद्धं ॥६७॥ श्रीयेषूरुवाच ॥ प्रतीथ किं मामधुना किलाहो कालः समीपः स
मुपस्थितश्च । यस्मिन् विशङ्कापरिपूर्णचित्ताः स्वस्वालयेऽभ्येत्य पृथक् पृथग्वै ॥६८॥ मामात्म

कीयं प्रभुमेव यूयमेकाकिनं त्यक्ष्यथ शत्रुहस्ते । नैकाक्यतोऽहं तु भवेयमत्र यतः पिता
मेऽपि मयास्ति सार्द्धं ॥६९॥ एतन्मयोक्तं मयि सन्धिलब्ध्यै युष्माकमर्त्तिस्त्विह संसृतौ
स्यात् । यूयं त्वहो निर्भयमानसाः स्त मया जिता संसृतिरेव यस्मात् ॥७०॥ गुरूरुवाच ॥
इत्थमुक्त्वा निजावीन् स घात्य ईशसखो महान् । पालको ऽथोत्थिताक्षः स्वःस्थितं
पितरमार्थयत् ॥७१॥ श्रीयेषूरुवाच ॥ कालोऽधुना पितरूपस्थित आत्मपुत्रमाहात्म्य ९५
मीक्षय स चेक्षयतु त्वदीयं । न्यास्यो यतोऽखिलजनोपरि शक्तिमस्मिंस्त्वद्दत्तनृभ्य इह
दातुमनन्तजीवं ॥७२॥ त्वामद्वितीयमृतमीश्वरमूर्द्धवासं त्वत्प्रेरितं च भुवने किल
ख्रीष्टयेषूं । यद्विद्युरेव मनुजा अविभिन्नबुद्ध्या तन्मात्रसंस्थमिह जीवनमस्त्यनन्तं ॥७३॥
माहात्म्यदर्शनमहं तव भुव्यकार्षं त्वन्न्यस्तमेव मयि कर्म्म समाप्नवं च । यन्मे त्वया सह

जगत्स्थितितोऽप्यभूत्प्राक् तेजः पितस्तदधुना नय मे त्वदग्रे ॥७४॥ दत्तांस्त्वया वरद
संसृतिमध्यतो नॄंस्त्वन्नाम खल्वहमदर्शयमत्र संस्थः। आसन् हि ते तव नरा अददाश्च तान्मे
वाक्यं त्वदीयमपि ते शरला ररक्षुः ॥७५॥ यन्मे त्वयाखिलमदायि तदुत्थितं त्वदित्थं प्र
जज्ञुरपि ते ददिथैव यन्मे। तेभ्यो वचस्तददद्दां मम चोदयं त्वज्जज्ञुस्त्वयाहमपि नुन्न इति
प्रतीयुः ॥७६॥ नाहं हि संसृतिकृते किल ये त्वया मेऽदीयन्त तद्गणकृते त्वधुनार्थयामि। ९६
ते तावका हि सकला मम येऽपि ते ते ये ते तु तेऽपि मम तेषु च तेज आप्स्ये ॥७७॥ नेतो
ऽस्मि संसृतितलेऽहमिमे तु तत्स्थास्त्वत्संनिधौ मयि गतेऽप्यत आत्मदत्तान्। तान् मेऽव पुण्य
पितरेव निजार्य्यनाम्नाथावामिवैकमनसस्त इतो भवेयुः ॥७८॥ यावत्स्थितोऽहमिह तैः
सह संसृतौ तांस्तावत्सदावमपि ते पितरार्य्य नाम्ना। दत्तांस्त्वया हि समपालयमेषु चापि

नैको विनापचयपुत्रमिहापचिच्ये ॥७९॥ सद्ग्रन्थपूरक उतापचयस्त्वमुष्य शेषाखिलेष्विह तु मामकहर्षपूर्त्यै । एतानि तद्विषय एव हि संसृतिस्थो ऽहं संवदामि तव संनिकटे गमिष्यन् ॥८०॥ वाक्यं त्वदीयमददामहमेव तेभ्यो ऽद्रुह्यन्ततो ऽपि च सदा किल संसृतिस्तान् । यस्माद्यथाहमिह संसृतिभूर्न विद्ये ते ऽप्यत्र संसृतिभुवो न तथैव सन्ति ॥८१॥ सम्यक्तु संसृतितलादपहर्तुमेतानेवं दृढं पितरहं किल नार्थयामि । किंत्वत्रसंस्थितसमस्तदुरात्मतायाः शक्तेरिमानवितुमेव विभो ऽर्थये त्वां ॥८२॥ एते न संसृतिभुवः किल संस्थिता हि यद्वत्कदाचन न संसृतिभूः स्थितो ऽहं । शक्त्यैव तानत इहात्मकसत्यतायाः पुण्यीकुरुष्व तव वाग्घ्यपि सत्यरूपा ॥८३॥ मामेव यद्वदनुदस्त्विह संसृतौ त्वं तद्वन्नुदाम्यहमिमानधुनैव तस्यां । आत्मानमेव विमलीप्रकरोमि तेभ्यो ऽतस्ते यदप्यृततया विमली 97

क्रियेरन् ॥८४॥ एषां कृते तु न हि केवलमर्थयेऽहमेषां तु सर्व्वपृथिवीतलविस्तृतेन ।
वाक्येन ये मयि तथा किल विश्वसेयुस्तत्सर्व्वसंचयकृतेऽर्थय एवमीश ॥ ८५ ॥ यन्ने
ऽखिला अपि तदेकमनःस्थिताः स्युस्त्वं हे पितर्मयि यथा त्वयि चाहमेव । एकस्तथा तद
खिलव्रज आवयोः स्यात्त्वत्प्रेरितत्वमपि मे च जगत्प्रतीयात् ॥८६॥ तेजो यद्ददिथार्य्य मे
नददां तेभ्योऽत आवां यथैकात्मानौ हि तथैकका: स्युरपि ते त्वं मय्यहं तेषु च । सर्वैकत्वसु ९८
सिद्धयेऽथ च जगत्त्वत्प्रेरितत्वं मम त्वत्स्निग्धत्वमतो ममेव तु तथा तेषां प्रविद्याद्ध्रुवं ॥८७॥ यान्
मह्यं पितरार्य्य नॄंस्त्वमददास्ते मत्स्थितेरालये तिष्ठेयुस्तु मया सहेति किल मे पूर्णक्रियस्य
स्पृहा । पश्येयुर्मम चैव तर्हि सकलास्त्वद्दत्ततेजोऽयिमं त्वं सिस्नेहिथ मां यतो हि जगतः
प्राक् पूर्व्वसृष्टेरपि ॥८८॥ धर्म्मात्मन्पितरार्य्य नेह समवेत्त्वां* संसृतिः क्काप्युताहं तु त्वाम

विदं तथा विदुरिमे त्वत्प्रेरितत्वं च मे । तानज्ञापयमेव नाम तव सतञ्ज्ञापयिष्यामि चा नस्त्वत्प्रेम यदस्ति मय्यपि तदेष्वेवास्त्वहं चैष्वपि ॥८९॥ इति श्रीखृष्टसंगीतायां मोक्ष माहात्म्यपर्वणि (दाविज्ञीतानां पंचत्रिंशोनसप्ततितमाभ्यां जकरीयभव्यवाक्यानां त्रयोदशसर्गा न्मत्थायस्य षड्विंशसर्गान्मार्कस्य चतुर्द्दशसर्गाद्योहन्नेः पंचदशषोडशसप्तदशसर्गेभ्यश्चोद्धृतः) पुण्य सप्ताहवृहस्पतिवारोत्तरचरित्रसूचको महामध्यस्थचरमोपदेशो नामाष्टमोऽध्यायः ॥ ९९

गुरुरुवाच ॥ एतदैशवचस्तावत् सोपदेशार्थनात्मकं । समाप्येशात्मजः स्वीयगणाग्र्यप्रेम कारकः ॥१॥ अद्रुपत्यकसंस्थां तां किद्रोणसरितं तदा । उपस्थायातरदथ तैलवृक्षस्थले ऽविशत् ॥२॥ तद्यहूदैस्तु संज्ञातं गेत्सेमानं मुहुर्मुहुः । पूर्वं तेन सशिष्येण विरामार्थेऽध्य गम्यत ॥३॥ पूर्णेन्दुभासितायां तु रात्रावस्यां वृहस्पतेः । तदुद्याने प्रविश्यैतत्स्वशिष्या

नभ्युवाच सः ॥४॥ श्रीयेषूरुवाच ॥ अत्र यूयं समासध्वमष्टौं यावदहं स्थले । शिष्यत्रया
न्वितः किंचिद्दूरे गाम्यर्थनाकृते ॥५॥ सकलास्तु तथा यूयं यत्नात्प्रार्थयतैव च । यन्नेतो दु
ष्परीक्षायां प्रविशेताघकृत्यपि ॥६॥ गुरुरुवाच॥ इत्युक्त्वा स ससीमोनो निर्जने जिबिदीयजौ ।
नयन् भवितुमारेभे व्याकुलत्वातिखिन्नहृत् ॥७॥ तत्रयं चोच आमृत्यप्यतिदुःखेन मे मनः ।
व्याप्तं यूयमतः स्थित्वात्र जागृत मया सह ॥८॥ इत्युक्त्वा स तदग्रे ऽश्मक्षेपमित्यन्तरे गतः । १००
दण्डवत्प्रणिपत्योर्व्यां प्रार्थयन्निदमब्रवीत् ॥९॥ श्रीयेषूरुवाच ॥ त्वया शक्यानि तिष्ठन्ति
पितरार्य्याखिलान्यतः । कटुपानस्य पात्रं यदुग्रार्त्तिसहनात्मनः ॥१०॥ प्रस्तुतं तदपैत्वेव
शक्तं यदि मदन्तिकात् । किंत्विच्छानुक्रमान्मे न भूयात्तव तु हे पितः ॥११॥ गुरुरुवाच ॥
एवं प्रार्थयता तेनैक्ष्यत स्वर्गात्समागतः । ऐशदूतो दृढीकर्त्तुं तमत्युग्रार्त्त्यपेक्षणे ॥१२॥ स तु

व्याप्तो व्यथोर्म्यैवार्थयद्दृढतरं तदा । तत्स्वेदो ऽभून्त्वसृक्स्थूलविन्दुवत्पतितो भुवि ॥१३॥
प्रार्थनात्तु समुत्थाय पुनः शिष्यत्रयं गतः । दुःखभारेण सुप्तांस्तान् प्राप्य प्रस्तरमब्रवीत् ॥१४॥
श्रीयेषूरुवाच ॥ त्वं किं स्वपिषि सीमोन ससखस्त्वं मया सह । किं तथैकमुहूर्त्ते ऽपि प्र
जागरितुमक्षमः ॥१५॥ परीक्षावेशरोधार्थं जागृतार्थयतापि च । उद्यतो वः किलात्मास्ति
शरीरं त्वतिदुर्बलं ॥१६॥ गुरुरुवाच ॥ मृदुनिन्दामिमां प्रोच्य पापहर्त्ता दयार्णवः । स १०।
ततो ऽपैत्य भूयो ऽपि प्रार्थयद् व्यथनावृतः ॥१७॥ श्रीयेषूरुवाच ॥ मत्पितश्चेदिदं पात्रं मत्तो
ऽपैतुं न शक्नुयात् । आवश्यं स्यात्तु तत्पानं भवत्विच्छा तदा तव ॥१८॥ गुरुरुवाच ॥ ततो
द्वितीयवारे तु शिष्यानभिगतः प्रभुः । सर्व्वान्सुप्तानवापैवं निद्रापीडितलोचनान् ॥१९॥
अतस्त्यक्त्वा स तान्भूयः पूर्व्ववद्वाग्भिरार्थयत् । पश्चात्तृतीयवारे स्वान् शिष्यानभ्येत्य सो

ऽवदत् ॥२०॥ श्रीयेषूरुवाच ॥ इतः स्वपित विश्रान्त्यै हितजागरणस्य हि । गतः कालो

ऽधुना चोयमुहूर्तः समुपस्थितः ॥२१॥ अधुना नरपुत्रो वै न्यस्यते पापिनां करे । उत्तिष्ठत

प्रयामैव मन्निधातान्तिकेऽस्ति हि ॥२२॥ गुरुरुवाच ॥ इदं ब्रुवति खृष्टेऽहो इष्कार्य्योत्या

ख्य आगतः । यहूदः खड्गदण्डोल्कादीपधार्य्योघसंवृतः ॥२३॥ तत्सोऽपचयपुत्रो हि तैलोद्यानम

वेद्यतः । तत्र द्वादशमध्ये सोऽन्वायाद्येषू मुहुर्मुहुः ॥२४॥ अतः पत्तिगणं प्राप्य फरीष्यश्रेष्ठ १०२

यज्वतः । प्रभुभोजनतः पश्चात्तं ग्रहीतुं तदा ययौ ॥२५॥ तदुद्यानं विशंश्चापि मध्यरात्रे ददौ

शठः । चिह्नं पत्तिगणायेतत्स स्वनाथगृहीतये ॥२६॥ नरं यमहमभ्येत्य चुम्बेयं सोऽस्ति

ढुण्ढितः । तं गृह्णीत दृढं यूयं तदापनयतैव च ॥२७॥ अतः कैश्चित्प्रधानैरप्यन्वितोऽपे

क्षिते स्थले । यदा नाथमपश्यत्स्वं जागृतैकादशान्तरे ॥२८॥ तदा पत्तिगणस्याग्रेऽभ्येत्या

चुम्बत्प्रभुं क्षणात् । गुरो गुरो नमस्तुभ्यमित्यादरववो वदन् ॥२९॥ धूर्तं प्रत्यवदत्तं तु
येषूः कस्मा उपस्थितः । चुम्बेन नरपुत्रं त्वं यहूद निदधासि किं ॥३०॥ शिष्यास्तूत्था
पितास्तस्य वाग्भिः पत्रिरवेण च । भव्यं कर्म्मानुभूयोचुः किं हन्यामासिना प्रभो ॥३१॥
स त्वार्य्यः सर्व्वभव्यज्ञोऽग्ये गत्वोवाच पत्रिकान् । कं ढुण्ढथेत्यथोचुस्ते येषूं वै नशरेतकं ॥३२॥
ततः सोऽस्म्यहमेवेति तानार्य्यै वदति प्रभौ । सयहूदा ययुः पश्चात्ते पेतुश्चापि भूतले ॥ १०३
३३॥ ततः पुनरपृच्छत्तान् प्रभुः कं ढुण्ढथेत्यथ । नशरेतीययेषूमित्युत्तरं प्राप्य सोऽब्रवीत् ॥
३४॥ श्रीयेषूरुवाच ॥ सोऽहमस्मीति वः प्रोक्तमतश्चेद् ढुण्ढथैव मां । तदैताननुमन्यध्वं गन्तु
मेकादश स्वयं ॥३५॥ गुरुरुवाच ॥ इत्थं स्वीयप्रियार्थं सोऽब्रवीदात्मोक्तिपूर्तये । मह्यं
त्वद्दत्तनृष्वेको नापचिच्ये कदाचन ॥३६॥ प्रस्तरस्त्वसिमुत्तुल्य मल्काख्यं श्रेष्ठयज्वनः ।

भृत्यमाक्रम्य वेगात्तत्कर्णं चिच्छेद दक्षिणं ॥३७॥ तत्कुतूहलतस्त्वार्य्योऽविपालो नरमोचकः ।
असन्तुष्ट इदं वाक्यं प्रावदन्नर्तसनात्मकं ॥३८॥ श्रीयेषूरुवाच ॥ सहध्वं यूयमेतावत् कोषे न्य
स्यो ह्यसिर्निजे । येऽसिं दधति ते सर्व्वेऽसिना नंक्ष्यन्त्यपि ध्रुवं ॥३९॥ पानपात्रं पिता
यन्मे ददौ कद्वपि तत् स्वयं । कथं नाहं प्रपास्यामि ह्यागतोयमुहूर्तकः ॥४०॥ अहं प्रार्थ
यितुं शक्तोऽधुनापि पितरं निजं । तस्माल्लब्धुं च दूतानां द्वादशाधिचमूरपि ॥४१॥ इत्थं १०४
न बुध्यसे त्वं किं चेत्त्वियद्रक्षणं मया । प्राप्येत कथमेषां स्याच्छास्त्रोक्तानां प्रपूरणं ॥४२॥
गुरुरुवाच ॥ इत्युक्त्वा सन्नृपः कर्णं स्पृष्ट्वा मल्कस्य तत्क्षणे । सुस्थीचक्रेऽथ तद्वृन्दप्रधानानेत
दब्रवीत् ॥४३॥ श्रीयेषूरुवाक ॥ किं दस्युमिव मां यूयं खड्गदण्डादिधारिणः । आक्रमध्वे
गृहीत्यर्थं यज्वाध्यक्षादयोऽप्युत ॥४४॥ प्रत्यहं सह युष्माभिर्यदाहं मन्दिरे स्थितः ।

उपदेष्टा तदा हस्तान्नार्पयध्वं ममोपरि ॥४५॥ किंत्वयं वो मुहूर्त्तोऽस्ति तमोविक्रम एव च ।
सद्ग्रन्थभव्यवाक्यानां पूरणायेदमस्ति हि ॥४६॥ गुरुरुवाच ॥ ततस्ते तं गृहीत्वार्य्यमबध्नन्न
नयन्त च । शिष्याः सर्व्वे तु तद्दृष्ट्वा भयाक्रान्ताः पलायिताः ॥४७॥ रात्रि वस्त्रं युवा
कश्चित्केवलं परिधाय तु । तमन्वायाद्गठाज्ज्ञातरवहेतुबुभुत्सया ॥४८॥ पत्तिभिश्च धृतो
यस्मात्स येष्वोऽनुमितोऽनुगः । वस्त्रं संत्यज्य तद्धस्तेष्वद्रवन्नग्न आकुलः ॥४९॥ तद्व १०५
त्खल्वविपालकं विभुसखं हन्तुं बलेनोत्थिते तत्खड्ग परिपूर्त्तयेऽग्रलिखितग्रन्थोदितानां
गिरां । भूता एव पृथक् पृथक् तदवयः सर्व्वे जहुः स्वप्रभुं बद्धं शत्रुगणैर्निजे च नगरे
नीतं नगोपत्यकात् ॥५०॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (जकरीयादि
भव्यवाक्येभ्यो मत्थायस्य षड्विंशसर्गान्मार्कस्य चतुर्द्दशसर्गाल्लूकस्य द्वाविंशसर्गाद्योहन्नेरष्टा

दश्यसर्गाच्चोद्धृतः) पुण्यसप्ताहवृहस्पतिशुक्रवारमध्यरात्रिचरित्रसूचक उद्यानीयव्यथनं नाम नवमोऽध्यायः

शिष्य उवाच ॥ तमोविक्रम एवासौ निधानं पापिनां करे । ईशसूनोर्व्यथासोढुर्हीनस्याप्यनुगैर्निजैः ॥१॥ घोररात्रिचरित्रं तत् पश्चाद्देशोपदेशनात् । गुरो मानुषदौरात्म्यकम्पिते न मया श्रुतं ॥२॥ वरं सहनपात्रं यदपेतुं व्याकुलस्तदा । ऐच्छच्छान्तो महात्मापि प्रभु १०६
स्तज्ज्ञातुमिष्यते ॥३॥ गुरुरुवाच ॥ शिष्य यत्सहनार्थेऽपीशपुत्रोऽवातरद्भुवि । यत्पूर्त्तिविषयेऽद्रौ मोस्यलीयाभ्यां सहावदत् ॥४॥ यन्मुदा प्रावदच्छिष्यानार्य्याचार्य्यो मुहुर्मुहुः । रुन्धन्तं चापि तच्छ्रेष्ठमनिन्दत्कठिनोक्तिभिः ॥५॥ यन्मुहूर्त्तागतेः पूर्वं प्रियान् खिन्नान् सान्त्वयत् । तद्दुःखं कदापि क्वापि निराकर्त्तुं स नैहत ॥६॥ तद्यदि स्यात् पिता तस्मै द्याद्

शाधिचमूरपि । स्वर्दूतानामनोत्स्यन्तद्वारणार्थे तदारितः ॥७॥ तच्छक्तोऽपि स पात्रं तु
पितृदत्तं तदाददौ । स्वयं पातुं द्विषां हस्तेष्ववविवत्स इवारवः ॥८॥ अस्वाद्यमपि केनापि पात्रं
मर्त्येन तं विना । भूमिमण्डलसर्वाघोऽतितिक्तफलमिश्रितं ॥९॥ यदृच्छयैव मनुष्यत्ववे
गोत्पन्नार्थिना ह्यसौ । पात्रं पितरपैत्वेतन्मत्तः शक्तं नु चेदिति ॥१०॥ तत्पित्रिच्छाविनीतः
स नृदयाव्याप्तहृत्स्वयं । आददौ नः कृते बद्धोऽघबद्धानां विमुक्तिदः ॥११॥ शिष्य उवाच ॥ १०७
मन्यमानाय तन्मह्यं कथयाचार्य्य सांप्रतं । घोररात्रौ स बद्धोऽस्यां किं सेहेऽधिकमार्य्यराट् ॥
१२॥ गुरुरुवाच ॥ बद्धः सोऽसिधरैर्नीतः खृष्टो येन पथा पुरा । चतुर्घस्रेऽचलत्पुर्य्यां त्राहो
शेतिस्तवावृतः ॥१३॥ विष्वा यिरूषलेमे तु तं निन्युः खड्गधारिणः । हन्नस्य भवने पूर्वं
तन्मतस्याभ्ययज्वनः ॥१४॥ स तु तं स्वीयजामातुः कायफस्यालयेऽनुदत् । तद्वर्षे तिष्ठतः

श्रेष्ठयाजकस्यादृते पदे ॥१५॥ येनैवाखिलराष्ट्रार्थे मृत्युरेकस्य नो हितः । इत्युक्तः प्राक्
परामर्शी यज्वसंसदि न स्वयं ॥१६॥ प्रस्तरस्तु तदान्वायाद्दूरतः खङ्गधृग्गणं । अन्येन सह
शिष्येणाकुलः कर्म्मान्तमीक्षितुं ॥१७॥ यदा हन्नेन नुन्नश्च बद्धः कायफसद्मनि । खृष्टोऽनायि
परे तौ द्वौ तत्सद्मद्वार्युपस्थितौ ॥१८॥ कायफेन तु शिष्योऽसौ ज्ञातोऽतः पत्तिकाननु ।
शालायां प्राविशत् किंतु प्रस्तरस्तद्बहिःस्थितः ॥१९॥ ततोऽप्यभ्यन्तरे येष्वा सह शिष्यः प्रवि १०८
श्य सः । महायज्वगृहे तस्य ज्ञातिर्द्वारं ययौ पुनः ॥२०॥ अथ दौवारिकाज्ञातः प्रस्तरं सो
ऽप्यवेशयत् । वेशयन्ती तु सा कन्यालोक्यामुमिदमब्रवीत् ॥२१॥ किं नरस्य त्वमेतस्य शिष्यो
नासीत्यथो भयात् । तां प्रत्युवाच सोमोनस्तच्छिष्यो नास्मि खल्विति ॥२२॥ श्रेष्ठयाजक
भृत्यास्तु परिचाराश्च तेऽनलं । अङ्गारैर्ज्वालयामासुर्निशाशीतत्वनुत्तये ॥२३॥ तन्मध्ये प्र

स्तरश्चापि स्थितो द्वारि प्रवेशितः । उदतापयदात्मानं कर्म्मशेषदिदृक्षया ॥२४॥ अभ्यन्तरे
तु गेहस्य कायफस्यैव संनिधौ । स्थिते येष्वि निशामध्ये दुर्विचारसमाप्तये ॥२५॥ तन्महा
यज्वनाहूतास्तत्रान्ये श्रेष्ठयाजकाः । ज्येष्ठा अध्यापकाश्चापि प्रधानाश्च सभां प्रति ॥२६॥
तेषां संचयतः पूर्व्वं स्वगृहे मध्यनिश्यपि । निदानं कायफो येषूदण्डस्यावाप्तुमिच्छुकः ॥२७॥
शिष्याणां विषये तस्य शिक्षायाश्चापि तं बहु । पृष्टोत्तरमिदं प्राप्नोन्महायज्वा दुरात्मकः॥ १०९
२८॥ श्रीयेषूरुवाच ॥ अहं व्यक्तं सदावोचं संसारं प्रति मन्दिरे । मठान्तर्वाखिला यत्र
समायान्ति यहूदिनः ॥२९॥ न किंचिदवदं गुप्तं कथं मां पृच्छसीह यैः । मद्वचोऽश्रावि तानेव
पृच्छाहो ते विदन्ति तत् ॥३०॥ गुरुरुवाच ॥ इत्थं सद्गुरुणा प्रोक्तेऽथ कोऽपि परिचारकः ।
तद्दण्डं स्वचपेटेनाघातयत्प्रवदन्निदं ॥३१॥ त्वं महायज्वनेऽप्येवं ददासि कथमुत्तरं ।

इत्युक्तः कुजनं मोक्तार्य्यस्तं प्रत्यवदद्वचः ॥३२॥ अवदं चेदहं मन्दं तन्मन्दत्वस्य साक्षितां । देहि चेत्त्ववदं भद्रं कथमाहंसि मामिति ॥३३॥ ततस्तद्दण्डनीयत्वप्रमाणायैव संचिताः । यज्वानः साक्ष्यमन्वैच्छन् न तु प्राप्तुमशक्नुवन् ॥३४॥ तद्विपक्षेऽपि संस्थेषु भूरिष्वनृतसाक्षिषु । समं नाभूद्वचस्तेषां मृत्यर्हांघप्रसिद्धये ॥३५॥ शेषे द्वावुत्थितौ मिथ्यासाक्षिणौ तु समूचतुः । येष्व एतस्य दुर्वाक्यं विभुमन्दिरमप्यहं ॥३६॥ भंक्त्वा भूयस्त्र्यहे नूनं रचयिष्यामि सर्व्वशः । इत्यावां शुश्रुव प्रोक्तं बहून्यनरगोचरे ॥३७॥ इत्युक्तेऽन्येऽब्रुवन्मिथ्यासाक्षिणः करनिर्म्मितं । भंक्त्वेदं मन्दिरमहं पश्चादकरनिर्म्मितं ॥ ३८ ॥ तत्परं रचयिष्यामीत्युक्तमेतेन शुश्रुम । एवं साक्ष्येऽपि तु प्राप्ते समत्वाभाव आबभौ ॥३९॥ तदोत्थाय महायज्वावदत् त्वं नोत्तरं कथं । ददास्येतान्यपि श्रुत्वा त्वयि प्रोक्तानि साक्षिभिः ॥४०॥ इत्युक्तो

ऽपि तु किंचिन्न प्रत्यवादीत्प्रभुस्ततः । साक्षित्रयसमत्वं यन्मृत्युदण्डाय सिद्धये ॥४१॥
मोसिशास्त्रत आवश्यं तन्नाप्त्वेच्छानुसारतः । किं कर्तव्यं परामर्शमारभन्त परस्परं ॥
४२॥ परामर्शान्तरे ते तु येषूं बद्धं समादिशन् । परिचारेषु शालायां वहिःस्थातुं सरक्षिकं ॥
४३॥ एतानि सहमाने तु प्रभौ वह्न्यन्तिके स्थितं । प्रस्तरं परिचारेषु कन्यालोक्याब्रवी
दृढं ॥४४॥ सह गालोल्ययेष्वासीरित्युक्तः सर्वगोचरे । सोऽवदत् त्वद्वचोऽहं न बुध्ये हे नारि ॥१॥
खल्विति ॥४५॥ ततोऽस्मिन् प्रघणं भीत्या गतेऽहो चरणायुधः । सत्वानान्या तु तं तत्रे
क्षित्वा दौवारिका किल ॥४६॥ सर्वानुपस्थितान् वक्तुमारेभे मानुषोऽप्यसौ । नश्वरेतीययेष्वेव
सह नूनमभूदिति ॥४७॥ एवमाकर्ण्य सीमोनोऽस्वीकारं शपथान्वितं । ऐरयत् तमहं येषूं न
जानामीत्यपि ब्रुवन् ॥४८॥ तत एकमुहूर्ते तु गतेऽन्यो दृढमब्रवीत् । तद्गणाश्रित एवैष

गालील्यो ह्यत्त्यसंशयं ॥४९॥ इत्यनुक्रमतश्चान्ये प्रस्तरं ये परिस्थिताः । उच्चुर्गालील्य एवा
सीति भाषातो ऽपि ते स्फुटं ॥५०॥ अथ तच्छिन्नकर्णस्य मल्कस्यापि च बान्धवः । को ऽपि
तत्र महायज्ञभृत्यवर्गान्तरे स्थितः ॥५१॥ तं निरीक्ष्यावदत् किं न त्वां येष्वो ऽप्यनुगेष्वहं ।
उद्याने स्थितमेतस्यां निश्चयपश्यमिति स्फुटं ॥५२॥ एतत्सर्ववचोभिस्तु त्रासितः प्रस्तर
स्तदा । येष्वज्ञानं दृढैर्वाक्यैः शपथैश्चाप्यवेदयत् ॥५३॥ वाङ्मध्ये त्वस्वनन्नाम्रचूडो येषू ११२
स्त्वपि स्थितः।तदाभ्यर्णे परावृत्तः स्वशिष्यं लोलमैक्षत ॥५४॥ प्रस्तरश्चास्मरत्तस्य वचो याव
न्न मे त्वया । त्रिः कार्य्यास्वीकृतिर्न्न द्विर्भवेत्कुक्कुटवागिति ॥५५॥ सद्यो निर्गत्य तु स्मृत्या तया
रोदीत्स निर्भरं । स्वनाथास्वीकृतेः पश्चात्तापखिन्नो ऽतिदुःखितः ॥५६॥ एतत्काले तु
सद्मान्तः संचिताः कायफादयः । प्रधानाः स्वपरामर्शं समाप्यैव रहःकृतं ॥५७॥ बहिः

स्थानात्पुनर्येषूं संसदोऽग्रे समाहूयन् । तन्मुखाच्च महायज्वा निदानं प्राप्तुमब्रवीत् ॥५८॥
कायफ उवाच ॥ जीवदीश्वरनाम्ना त्वां शपथेनादिशाम्यहं । वक्तुं नो यदि खृष्टः स्याः श्री
मद्विश्वेश्वरात्मजः ॥५९॥ गुरुरुवाच ॥ हिंस्रेणाप्यहरोणस्य पदस्थेनोदितं गुरुं । प्रश्नं
श्रुत्वैनमन्यैश्च प्रधानैः प्रभुरब्रवीत् ॥६०॥ श्रीयेषूरुवाच ॥ एतद्यद्यपि वो ब्रूयां न प्रत्येष्यथ
चेन्नहं । पृच्छेयं नोत्तरं प्राप्स्ये युष्मभ्यो न च मोचनं ॥६१॥ इतो नृपुत्रस्तु महेशशक्तेर्दक्षे स ११३
मासीन इहापि तस्मात् । स्वर्लोकमेघेष्ववतीर्ण ईक्ष्यो युष्माभिरित्थं प्रवदाम्यहं वः ॥६२॥
गुरुरुवाच ॥ इदं श्रुत्वाखिला ऊचुरतस्त्वं किं विभोः सुतः । एवं पृष्टश्च सोऽवादीत् सत्यं
युष्माभिरुच्यते ॥६३॥ इत्याकर्ण्य महायज्वा सद्यः स्वीयांशुकान्यतः । विदीर्य्याखिल
यज्वादीन् प्रोवाचेदमुपस्थितान् ॥६४॥ कायफ उवाच ॥ अहो ईशमपावादीदसौ किं

साक्षिणां फलं । इतः श्रुतोऽपवादो हि सर्वैः किं भवतां मतं ॥६५॥ गुरुरुवाच ॥ इति पृष्टाः समस्तास्ते मृत्युदण्ड्यो ऽस्त्यसाविति । प्रत्यूचुर्याजका ज्येष्ठाः प्रधानाश्चैस्त्रयेलिनां ॥६६॥ ततो ऽप्युपस्थिताः केचित्थुत्कर्तुं तन्मुखोपरि । समाच्छाद्य च तद्गण्डमाहन्तुं मुष्टिभिर्बलात् ॥ ६७॥ आरभन्ताथ वक्तुं च हे ख्रीष्टेश्वरमन्त्रणं । देहि नो विज्ञ को ऽस्ति त्वां मुष्टिनाहतवानिति ॥६८॥ तद्वन्नानापवादोक्त्याभ्यक्रामन्कुक्कुरा इव । तं कायफगृहे बद्धं चपेटैश्चा ११४ हनन् शठाः ॥६९॥ तथा स मृतिदण्डार्हस्तदा प्रोक्तो ऽक्षदर्शिभिः । ईश्वरैकसुतः श्रेष्ठः स्वोद्यानकृषकैरपि ॥७०॥ तत्परे चोषसि स्वीयविचारविहितस्य ते । दण्डस्य पूर्त्तये बद्धं तं पीलातालये ऽनयन् ॥७१॥ तद्वद्दुष्टकृतघ्नशिष्यनिहितः क्रूरारिहस्ते प्रभुः शेषैस्तैश्च विहीन एव परितस्तेषां त्वपि श्रेयसा । अन्ते ऽस्वीकृत उग्रदुःखनिचयं लज्जापवादान्वितं

सेहे स्वीयगणप्रदत्तमथ तैरन्योद्भवेष्वर्पितः ॥७२॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (मत्थायस्य षड्विंशसप्तविंशसर्गाभ्यां मार्कस्य चतुर्द्दशपंचदशसर्गाभ्यां लूकस्य द्वाविंशत्रयोविंशसर्गाभ्यां योहन्नेरेकादशसर्गाच्चोद्धृतः) सप्तक्रवारपूर्व्वचरित्रसूचको वरोपलनिराकृतिर्नाम दशमोऽध्यायः ॥

शिष्य उवाच ॥ विस्मृतैशक्रिया दुष्टा यं प्रधाना यहूदिनां । निदधुः सोढघोरार्त्तिं रोम्याध्यक्षकरे तथा ॥१॥ मृत्यर्हत्वं सतस्तस्य सत्येशाज्ञोऽप्यसौ कथं । शक्तः साधयितुं यज्वाद्युक्तोऽन्यान्वयोद्भवः ॥२॥ गुरुरुवाच ॥ तत्कथां शिष्य वक्ष्यामि किंतु प्राक् श्रूयतां त्वया । अन्तोऽपचयपुत्रस्य तन्निधातुः पुरारिषु ॥३॥ मृत्यर्हं हि यदा नाथं कृतं दुष्टाक्षदर्शिभिः । कायफोकस्यतोऽध्यक्षाग्रे नीतं मृतये ऽप्यवेत् ॥४॥ दुष्कार्य्योतियहूदः स तदा स्वीयाघ

कर्म्मणः । अनुतापकशादीर्णोऽद्रवत्तत्संसदः स्थले ॥ ५ ॥ तत्समासीनसभ्यांश्चाग्रयज्वादीनु
पेत्य सः । दुष्टमूल्यं धरंस्त्रिंशद्रौप्यकर्षकमब्रवीत् ॥ ६॥ निहितानघरक्तोऽहं महार्घं कृतवा
निति । सभ्यास्तूचुः किमस्माकं तत् त्वमीक्षस्व खल्विति ॥ ७॥ ततो मन्दिरमध्ये स तन्मू
ल्यमसृजः प्रभोः । प्रणिक्षिप्य गतः शीघ्रमात्मघाती बभूव ह ॥ ८॥ गलं ह्युद्बध्य रज्ज्वा स
उद्धितो नद्ययाक्षिपत् । आत्मानं किंतु तच्छेदान्निम्नेऽतोऽधोमुखोऽपतत् ॥ ९॥ पतनस्य ११६
तु वेगेन भग्नमध्याङ्गकोऽभवत् । तस्यान्त्राणि च निर्जग्मुर्नरकाधिगतात्मनः ॥ १० ॥ एतत्स
च्छुक्रवारेऽपि घोरमृत्युर्बभूव सः । निहितस्वप्रभोस्तस्यार्थलोभहतचेतसः ॥ ११ ॥ सभ्या
स्तूचुरिमान्रौप्यकर्षान् नोचितमस्ति नः । न्यस्तुं मन्दिरकोषान्तर्यतोऽसृङ्मूल्यमेव तत् ॥
१२॥ अतः पश्चात्परामृश्य तैः क्षेत्रं नगरान्तिकं । अक्रीणन् शवखातार्थे मृतानां परदेशि

नां ॥१३॥ असृक्क्षेत्रमितः प्रोक्तं सर्वैर्यैरूषलेमिभिः । तन्निखातस्थलं दुष्टैतन्मूल्यस्मृतये ध्रुवं ॥१४॥ किंत्विष्कार्य्योतिरेवं स तन्मूल्यं बुधवासरे । प्राप्य तेनाप्यदः क्षेत्रं पेणे त त्स्वामितः पुरा ॥१५॥ पुनर्दत्ते त्वधर्म्मस्य मूल्ये तेनाप्यसद्गुणैः । इस्रयेलप्रधानैस्तत्कृतं स ग्रन्थपूर्त्तये ॥१६॥ जकरोय उवाच ॥ अहो मे ऽपि दासीकृतस्यैस्रयेल्यैः प्रदत्तः पणत्रिं शद् श्वेतकर्षाः । तदर्घ्योघं आदाय्यथाभूत्कुलालक्रियाक्षेत्रमूल्यं यथेशार्पितं मे ॥१७॥ ११७
गुरुरुवाच ॥ एवं सदात्मपूर्णेन भव्यवक्त्रोदितं पुरा । मूल्यमार्य्यप्रभोर्मन्दं देयं भ्रान्तैस्रये लकैः ॥१८॥ विक्रीतस्यात्मवृन्दैस्तु तस्य क्षुद्रार्घदासवत् । प्रभोरन्यजहस्ते च न्यस्तस्यात्नी ब्रवीम्यहं ॥१९॥ भूरयः श्रेष्ठयज्वाद्याः प्रातस्तं कायफालयात् । अनयन् पन्त्यपीला ताय्यविचारालयान्तिके ॥२०॥ रौम्यो ऽध्यक्षो हि दूरे ऽपि पुरे ऽस्मात्सत्पुराद्वसन् । केसारी

ये फलैस्तोन्ये पश्चाद्दिश्यब्धिरोधसि ॥ २१ ॥ भूसोमास्थगृहात् सैन्यावृतो ऽभ्यायान्महा
पुरं । त्राणपर्व्वणि यात्र्योघकलहानां निरुद्धये ॥ २२ ॥ यिरूषलेमसंस्थस्तु स सदोवास
भास्वति । प्राङ्महाराजहेरोदिनिर्म्मिते सद्मसंचये ॥ २३॥ तत्रोपस्थाय यज्वाद्यास्तद्द्वारे
नाविशन् यतः । खाद्यं तैस्तत्परे सद्यो ऽपि त्राणोत्सवभोजनं ॥२४॥ अतस्तद्रोधकमलात्
स्फोतिकाररसोत्थितात् । बिभ्यतस्ते वहिस्तस्थुरन्यजाध्यक्षसद्मनः ॥२५॥ अतः प्रार्थन ११८
या तेषां समाहूतो ऽक्षदृष्टये । आगतो द्वारि पोलातो रक्षिवर्गसमावृतः ॥२६॥ पोलात
उवाच ॥ एतन्नृविषयं यूयं किं धरन्तो ऽभिशापनं । इदानीं हे यहूदीया मां समाहूय
घोषसि ॥२७॥ यहूदीयप्रधाना ऊचुः ॥ कुकारी किल चेन्नासोदेष शास्त्रविलङ्घकः । तदा
नानोयतास्माभिरध्यक्ष तव संनिधौ ॥२८॥ पोलात उवाच । यूयं तमपनीयैव निज

शास्त्रानुसारतः । विचारयत मा मह्यमेतत्कर्म्म प्रदत्त तु ॥२९॥ यहूदीयप्रधाना ऊचुः ॥
मृत्युकर्म्मेदमध्यक्ष कंचिन्मारयितुं त्विह । भवद्भिर्नो यहूदेभ्यो नह्यस्त्यनुमतं क्वचित् ॥
३०॥ अतो ऽस्मासनघात्यो ऽपि नरो ऽयं नियमेन नः । न तथा दण्डितो ऽस्माभिर्न्यस्तस्त्वयि
तु तत्कृते ॥३१॥ तद्भवद्विधिनाप्यर्ह्यो यतो ऽयं नो ऽखिलं गणं । ख्रीष्टनामाभिषिक्तो ऽहं
राजेति वदति ध्रुवं ॥३२॥ एतदुक्त्यास्य वर्गस्यापनयत्येव हृन्दि सः । सम्राजे कैशरे चापि ११९
करं दातुं निषेधति ॥३३॥ गुरुरुवाच ॥ इत्यवोचन्त ते हिंस्राः प्रभुवाक्यस्य पूर्त्तये । स्व
मृत्युविषये पूर्व्वमुदितस्याप्यनेकधा ॥३४॥ ऊर्द्ध्वं स हि समुत्तोल्यः सर्व्वाकृष्ट्यै स्वसंनिधौ ।
प्रत्येतॄणां चिकित्सायै मोस्युत्तोलितसर्पवत् ॥३५॥ तथोचे प्राग्ग्रहे तान् हि नीकदेमं पुरा
पि च । घात्यो ऽतो नास्मभिः किंतूर्द्ध्वशूले रोम्यरीतितः ॥३६॥ एतत्त्वाकर्ण्य पीलातः स्व

विचारालयान्तरे । पुनर्विष्टाह्वयत्तत्र येषूमेकाकिनं तदा ॥३७॥ अपृच्छदपि च त्वं किं
यहूद्यानां नृपः स्थितः । इत्युक्तः सत्प्रभुस्त्वेतदध्यक्षं प्रत्युवाच तं ॥३८॥ श्रीयेषूरुवाच ॥
स्वयं त्वं किमिमं प्रश्नं वक्षि तज्ज्ञातुमिच्छुकः । किं वा सूचित एवान्यैरेतन्मद्विषये नरैः ॥
॥३९॥ पीलात उवाच ॥ यहूद्यः किमहं ह्यस्मि त्वद्गणश्रेष्ठयाजकाः । मयि त्वां निदधु
स्तस्माज्जिज्ञासे किं त्वया कृतं ॥४०॥ श्रीयेषूरुवाच ॥ राज्यं न मे ऽस्माज्जगतो ऽस्ति जातं १२०
चेत्स्याद्योत्स्यन् हि तदा प्रजा मे । यहूद्यनिघ्नीभवनाय रुद्धौ न त्वैहिकं मे ऽस्त्यधुनैव राज्यं ॥
४१॥ गुरुरुवाच ॥ इत्थमाकर्ण्य पीलात उवाच किमतो ध्रुवं । त्वं राजासीत्यथैतत्तं बद्धः प्रत्य
वदत्प्रभुः ॥४२॥ श्रीयेषूरुवाच ॥ त्वयोक्तं तदहं तु दातुं सत्याय साक्ष्यं दृढमेव जातः ।
भुव्यागतश्चाप्यत एव यो यः सत्योद्भवो मे स वचः शृणोति ॥४३॥ गुरुरुवाच ॥ इत्युक्त्वा

विस्मितो ऽध्यक्षो बभाषे सत्यमस्ति किं । इदं प्रत्युच्य सद्यस्तु पुनर्द्वारि जगाम सः ॥४४॥ यहूदीयप्रधानांश्चाभ्युवाचास्मिन्नहं नरे । कृतान्वेषणको दोषं नाप्नोमि कमपि ध्रुवं ॥४५॥ इति संश्रुत्य ते वेगादभिशापकदम्बकं । उच्चैस्तद्विषये प्रोचुर्नीरवस्तु स्थितः प्रभुः ॥४६॥ अतो ऽध्यक्षो ऽब्रवीत् त्वं न ददास्युत्तरं कथं । अहो त्वयि कियत्साक्ष्यं दृढं प्रख्यान्त्यमी इति ॥४७॥ किंतु तत्रापि किंचिन्नावदद्येषूरतो ऽपि च । पीलाते विस्मयव्याप्ते ऽधिकं प्रोचुर्द्वि
१२१
षस्तदा ॥४८॥ यहूदीयप्रधाना ऊचुः ॥ अयं क्षोभयति व्यूहं यहूद्याखिलनीवृति । स्वयैतत्पुरपर्य्यन्तं गलीलावधि शिक्षया ॥४९॥ गुरुरुवाच ॥ गलीलावधिसंभूतां येषूशिक्षां निशम्य तु । पीलातस्तांस्तदापृच्छत् किं गालील्यो ऽस्त्यसाविति ॥५०॥ हैरोद्याधीनभूमेश्च तस्या येषूं समागतं । ज्ञात्वा सो ऽकल्पयन्नेतुं तं हैरोद्यान्तिपान्तिके ॥५१॥ स गलीलाप्रदेशस्य भूपो हि

त्राणपर्व्वणे । मन्दिरे ऽर्च्चयितुं शास्त्ररीत्यायातो महापुरं ॥५२॥ यिरूषलेमसंस्थस्तु पितृनि
र्म्मितसद्मनः । वृहतों ऽशे सदोवास पीलातालयसंनिधौ ॥५३॥ तं प्रति प्रेरिते ऽतो येष्व्य
भिशापिगणान्विते । अत्यहृष्यत्स हैरोद्यश्चिरात्तद्द्रष्टुकामकः ॥५४॥ बहुधा हि गलीलायां
तत्कीर्त्तिं श्रुतवान् पुरा । कांचिद्द्रष्टुं तदाप्यैच्छत्तत्कार्य्यामद्भुतक्रियां ॥ ५५ ॥ बहु पृच्छति
हैरोद्ये तं तु सैन्यसमावृते । अभिशप्यत्सु वेगाच्च याजकाध्यापकादिषु ॥ ५६ ॥ नोत्तरं १२२
प्रददौ किंचित्प्रभुस्तं वंचकं प्रति । अतस्तेन ससैन्येन जडवत्सो ऽवहेलितः ॥५७॥ हैरोद्याद्यै
श्च वसनं शुभ्रं स परिधापितः । ख्रृष्टवादावहेलाद्भिः नुन्नः पीलातसंनिधौ ॥५८॥ तत्काला
वधि पीलातान्तिपौ भूतौ रिपू मिथः । यदा होतॄन् गालील्यान् सो ऽवधीत् कलहहेतुतः ॥५९॥
मित्रत्वं जग्मतुरितो नुन्ने तेनान्तिपान्तिके । गालील्यत्वत एवार्य्यं येष्वि तस्याक्षदृष्टये ॥

६०॥ यथोक्तं तु पुनर्लब्ध्वा हेलामात्राङ्कसंयुतं । येषूं पीलात आहूयाग्र्ययहूद्यांस्तदाब्रवीत् ॥
६१॥ पीलात उवाच ॥ मदग्रे यूयमेनं वै श्रेष्ठयज्वादयो नरं । निन्य युष्मद्गणक्षोभकर्त्तारं
किल वादिनः ॥६२॥ अहं त्वन्वेषणं कृत्वा युष्माकमपि गोचरे । न किंचित्प्राप्नवं सत्य
मभिशापेषु तेषु वः ॥६३॥ नान्तिपा वापि स ह्येनं तदग्रे प्रेरितं मया । युष्मत्समन्वितं
प्राणदण्डार्हं नावदन्नरं ॥६४॥ अहो कथमयं तेनात्र नुन्नो ऽतो ऽल्पशास्तये । तमाहत्य नृप १२३
त्वोक्तिहेतोर्मोचयितास्म्यहं ॥६५॥ गुरुरुवाच ॥ रोम्यो ऽध्यक्ष इदं प्रोच ईर्ष्यामात्राद्यतः स तान् ।
अवेद्येषूरिपूभूतांस्ततो व्यूहं तथावदत् ॥६६॥ पीलात उवाच ॥ युष्मद्रीत्या यहूदीयाः प्रत्यब्दं
त्राणपर्व्वणि । मोचनीयो मया कश्चिद्बद्धानां यं यमिच्छथ ॥६७॥ कतरं मोचयिष्ये ऽतो येषूं
वृष्टाभिधं किमु । बारार्ब्बं वा नृहन्तारं दस्युं कलहनायकं ॥६८॥ गुरुरुवाच ॥ इत्युक्तौघान्

वहिःस्थान् स रोम्यो ऽध्यक्षो ऽन्तरे गतः । चित्रोपलास्तृतस्थाने ऽध्यास्त सिंहासनोपरि ॥६९॥
तस्मिं स्तत्र समासीने यावद् व्यूहा हि कर्म्म तत् । परामृश्यंस्तदा तस्मै पत्नीदं प्रैरयद्वचः ॥७०॥
पीलातभार्य्योवाच ॥ विषये धार्म्मिकस्यास्य किंचिन्मा क्रियतां त्वया । तद्धेतोर्ह्यापन्नं स्वप्ने बह्व
नीरद्य खल्वहं ॥७१॥ गुरुरुवाच ॥ एवं तद्रोम्यया वार्तेरिता सत्प्रभुसाक्ष्यदा । एतदभ्यन्तरे
भूरियत्नं चक्रुस्तु तद्द्विषः ॥७२॥ नानावाक्यैर्हि ते दुष्टाः प्रधानाध्यापकादयः । बाराब्बो १२४
न्मोचनाहूत्यै मन्दव्यूहमचोदयन् ॥७३॥ असौ वीरो हि रोम्यारिर्येषूस्त्वेष गलीलकः ।
खृष्टाख्यो ऽप्यैस्त्रयेलार्थं योद्धुं हतमना इति ॥७४॥ अतस्त्राहीश्वरेत्थं ये पंचाहे प्राग्जय
ध्वनौ । यिरूषलेममायान्तं खृष्टराजं तमाहूयन् ॥७५॥ ये परे ऽपि मुहुः स्वीयमन्दिरे ऽद्भुत
कारिणं । तन्मुदैक्षन्त खृष्टत्वावभासापेक्षिणः किल ॥७६॥ ते ऽधुना म्लानवक्त्रं तमात्ममुक्त्य

समर्थिनं । दुःखव्याप्तं समीक्ष्यातो हताशीभूय लोभिनः ॥७७॥ तदा प्रधानयज्वोक्त्या रोषिता वधितुं प्रभुं । वधान्मोचयितुं त्वेव बाराब्बं समकल्पयन् ॥७८॥ अतः पृच्छति पीलाते युष्मभ्यं कतरं तयोः । मोचयिष्ये ऽहमित्थं ते बाराब्बं नेदुरुच्चकैः ॥ ७९ ॥ अतः ख्रीष्टाभिधं येषूं प्रति कर्त्तास्मि किं न्विति । पीलातोक्त्या ननर्दुस्ते स शूले विध्यतामिति ॥ ८० ॥ पीलाते चापवदति प्रोचुर्दृढतरं तदा । बाराब्बं देहि नो ऽमुं तु शूलविद्धं नयास्त्विति ॥८१॥ भूयस्तांस्त्वब्रवीत् किं सो ऽकरोत्पापं मया न हि । मृत्यर्हः प्राप्त आघात्यः शास्त्यै मोक्तव्य एव च ॥८२॥ इदं श्रुत्वा तु ते सर्वे भीमघोषैर्वृका इव । शूले विध्येति संनेदुर्मुहुस्तद्द्वारसंनिधौ ॥८३॥ यात्रिव्यूहस्य नर्द्दो ऽतो वर्द्धितस्य क्रमात्क्रमात् । यज्वनां च प्रधानानां जिगायाध्यक्षमानसं ॥८४॥ सो ऽनस्तत्कलहाद्भीतो नेच्छन् रोद्धुं च सेनया । तेषां संकल्प

यामास दुष्टं तोषयितुं मनः ॥८५॥ प्रभोस्त्वनघतां जानन् बहुप्रमितिनिश्चितां । व्यूहाये
जलमादाय करौ प्रक्षाल्य चाब्रवीत् ॥८६॥ पीलात उवाच ॥ नास्त्येतद्धर्म्यसृक्पातमलं
मत्करसंस्थितं । तन्मुमुक्षुर्ह्यदोषो ऽहमीक्षध्वं यूयमेव तत् ॥८७॥ गुरुरुवाच ॥ इत्युवाचे
हमानः स मृषा वारयितुं स्वतः । तत्सद्रक्तमलं पत्नीवाण्यान्याङ्कैश्च भीतहृत् ॥८८॥ ततः
प्रत्यनदत्सर्वव्यूहो ऽस्मास्वेव तिष्ठतु । अस्मत्पुत्रादिषु च तद्रक्तपातफलं ध्रुवं ॥८९॥ १२६
इत्युग्रशपथं स्वीयवंशे ऽद्यावधि संस्थितं । स्थेयं चाप्यधिकं स्वीयराजासृक्पातसंयुतं ॥
९०॥ प्रोक्तवत्स्वतिदुष्टेषु यहूद्येषु विधर्म्मकः । रोम्यो ऽप्यध्यक्ष आदेक्षीतत्क्रूरत्वानुसारतः ॥
९१॥ कलहाच्च वधाच्चामुं काराबद्धं गणैर्वृतं । बाराब्बं मोचयित्वा स येषूं दण्डे तदार्प
यत् ॥९२॥ आद्यं तु रोम्यरीत्या तं कशाहतमपि प्रभुं । आत्मीयसैन्यवाहिन्यां न्यस्य

द्राजालयान्तरे ॥९३॥ ते त्वन्योन्यं समाहूय हेलितुं तं नृपाभिधं । धूम्रमाप्रपदीनांशुं
सहासाः पर्य्यधापयन् ॥९४॥ मुकुटं कण्टकैश्चापि ग्रन्थित्वा प्रणिविध्य च । तन्मूर्द्ध्नि
दक्षहस्ते च न्यस्य राडूदण्डवन्नलं ॥९५॥ तदग्रे हेलया सर्व्वे प्रोचुः पतितजानवः । महा
राज यहूद्यानां नमस्तुभ्यं नमोऽस्त्विति ॥९६॥ तदुपर्य्यथ निष्ठीव्य नलं हृत्वा च तत्करात् ।
तेन तच्छिर आजघ्नुः सेह एतत्तु सोऽरवः ॥ ९७ ॥ अध्यक्षः स्पृहयंस्त्वेतत्कशादोर्णत्वदर्श १२७
नात् । उत्पद्यां व्यूहकरुणां पुनर्गत्वावदद्बहिः ॥९८॥ पीलात उवाच ॥ अहो वोऽग्रे
नयाम्येतमलं दुःखेन दण्डितं । युष्मान् ज्ञापयितुं नाप्ताहता तस्मिन् मृतेरिति ॥९९॥
गुरुरुवाच ॥ एतद्वदति तस्मिंस्तु नीतो येषूर्व्वहिर्धरन् । मुकुटं कण्टकानां सरक्तं धूम्रांशुकं
च वै ॥१००॥ दर्शयंस्तं च पीलातो नरं पश्येत्युवाच तान् । किंतु रोम्याहतिम्लानं तं

दृष्ट्वा ते यहूदिकाः ॥१०१॥ श्रेष्ठयज्वादयो नास्मात् करुणां प्राप्य किंत्वितः । तज्जिघां
सुतरीभूता नेदुः शूले नु विध्य तं ॥१०२॥ इत्थमुक्तो मुहुः क्रूरैः पीलातो रोषितोऽवदत् ।
यूयं विध्यत तं शूले नाहं ह्यप्नोम्यहं मृतेः ॥१०३॥ एवं प्रत्युदितास्ते तु स्वसद्राजद्विषः
शठाः । श्रेष्ठयज्वादयोऽध्यक्षं रौम्यमभ्यवदन्निदं ॥१०४॥ यहूद्या ऊचुः ॥ चेन्नो मारण
शक्तिः स्यात्तदा नास्त्यत्र संशयः । अस्माकं हि व्यवस्थास्ति ययासौ मर्तुमर्हति । ईशपुत्रो १२८
ऽहमस्मीति यतोऽवादीत्स मानुषः ॥१०५॥ गुरुरुवाच ॥ इति श्रुत्वाधिकां भीतिं पीलातो
ऽधिगतः स्मरन् । अव्यक्ताः सत्प्रभोर्वाचः स्वपत्न्याः स्वप्नमेव च ॥१०६॥ अतः सद्मान्तरे
भूयो विष्ट्वा येषूं च तत्र सः । आहूय त्वं कुतोऽसीति पपृच्छे दैवचिन्तया ॥१०७॥ न तु
प्रतिवचोऽदासीद्रौम्यायैतद्विवित्सवे । प्रभुरन्यायसोढातस्तेन भूयोऽप्यपृच्छ्यत ॥१०८॥

पीलात उवाच ॥ मां किं न प्रतिवक्षि त्वं त्वच्छूलव्यधनस्य हि । त्वन्मुक्तेश्चापि शक्तिर्मे ऽस्ती
ति किं न विबुध्यसे ॥१०९॥ श्रीयेषूरुवाच ॥ चेदूर्द्धवासेन न ते प्रदत्ता शक्तिर्न ते कापि
ममोपरि स्यात् । शक्तौ तवातो निदधौ तु यो मां तस्य स्थितः पापचयो महीयान् ॥११०॥
गुरुरुवाच ॥ इत्थमध्यक्ष आकर्ण्य प्रभुं मोचयितुं तदा । अत्यैहत यहूद्यास्ये नेदुर्दृढतमं तु ते ॥
१११॥ यहूद्या ऊचुः ॥ एतं चेन्मोचयेर्नासि तदा त्वं कैशरो हितः । यो वक्त्यात्मनृपत्वं सो १२९
ऽपवदत्येव कैशरं ॥११२॥ गुरुरुवाच ॥ इदं श्रुत्वातिभीतः सो ऽध्यक्षस्तदभिशापतः । कैश
रो ऽये तिबर्य्यस्य शङ्काक्रूरीकृतात्मनः ॥११३॥ कुक्रियाश्च स्मरन् स्वीया अध्यक्षत्वे कृता
भुवि । तद्विज्ञातृयहूदीयातुष्टीकरणतो ऽत्रसत् ॥११४॥ अतो ऽधर्म्मविचारायातुष्टश्चित्रोप
लास्तृतं । स्थानं गत्वा तदा भूते काले सूर्य्योदयाङ्किते ॥११५॥ तत्र सिंहासनासीनो ऽब्रवी

त्तान् पश्य वो नृपं । इत्युक्तास्ते ऽनदन् शूले नय तं नय खल्विति ॥११६॥ पीलाते तु ब्रुवति
किं शूले व्यत्स्यामि वो नृपं । प्रधाना अब्रुवन्नास्ति नृपो नः कैशरं विना ॥११७॥ इत्युक्त
वत्सु हिंस्रेषु तेषु खृष्टापवादिषु । तच्छूलव्यधनस्याज्ञां पीलातः प्रददौ तदा ॥११८॥ हृत
धूम्रांशुकं तं च स्ववस्त्रपरिधापितं । निदधौ द्विदस्यु हन्तव्यं सैन्यगुल्माभिरक्षितं ॥११९॥
मृत्युस्थाने ऽचिरान्नेयं सशूलं पूरयेद्यदा । सहघात्यकुकर्तॄणां पीलातः सो ऽक्षदर्शनं ॥१२०॥
इत्येव द्विमुहूर्तमात्रसमयाभ्यन्तर्यहूदीयभूम्यध्यक्षेण मुमुक्षितो ऽपि निरघो ज्ञातः किलोक्तो
ऽपि च । शेषे हिंस्रकृतघ्नवृन्दनदनाकृष्टेन दुर्न्यायिना लज्जाताडनयुक्तमृत्युनिहितः सद्राज
ईशात्मजः ॥१२१॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्वणि (जकरीयभव्यवाक्याना
मेकादशसर्गान्मत्थायस्य सप्तविंशसर्गान्मार्कस्य पंचदशसर्गाद्योहन्नेरष्टादशोनविंशसर्गाभ्यां लूक

स्य त्रयोविंशसर्गात् तद्रचितप्रेरितगणक्रियाणां प्रथमसर्गाच्चोद्धृतः) सच्छुक्रवारमध्यमचरित्रसू
च्चकः पापिहस्तेप्रभुसमर्पणं नामैकादशोऽध्यायः ॥

शिष्य उवाच ॥ विस्मयव्याप्त आचार्य्य सर्व्वमेतच्छृणोम्यहं । कृतघ्नत्वं यहूद्यानां रौम्यस्य
च विधर्म्मितां ॥१॥ तत्क्रूरत्वान्वियल्लज्जादुःखौघसहने प्रभोः । पूर्त्तिं वेद्मि त्वदुक्ताया इषायस्य
गिरः पुरा ॥२॥ किंतु नोऽधर्म्मतस्तस्य व्रणितस्यार्त्तिपूरणं । यदासीत्सद्वचःपूर्त्यै उर्द्धमुत्तो १३१
लनं किल ॥३॥ तदेव व्यधनं शूले विहितं रौम्यरीतितः । कीदृगासीत्तदज्ञं मां ज्ञापया
तिविवित्सुकं ॥४॥ गुरुरुवाच ॥ एष रौम्येषु दण्डोऽभूद्दासानां कुकृतां किल । दस्यूनां
नरहन्तॄणां नीतौ कलहकारिणां ॥५॥ एष शूल ऋजुभ्यां तु दारुभ्यां परिनिर्म्मितः ।
विज्ञेयः स्तम्भवत्त्वेकं तयोरन्यच्च दिङ्मुखं ॥६॥ सप्तहस्तमितं पूर्व्वं स्तम्भवत् स्थापितं

भुवि । तच्चूडान्तिकलग्नं तु मध्यमन्यस्य दारुणः ॥७॥ इदं व्याममितं त्वस्ति दिङ्मुखं
किल संस्थितं । नद्धं तदग्रयोर्हस्तौ तत्रोत्तोलितदोषिणः ॥८॥ तस्य दण्डायमानस्य देहं
तु स्तम्भदारुणि । लग्नं नद्धौ पदौ चास्मिंस्तलाद्यस्तत्रयान्तरे ॥९॥ रज्जुभिस्तु तमु
तुल्य पूर्वं कीलैस्ततः पदौ । स्तम्भदारुण्यविध्वंस्ते तथा हस्तौ च दिङ्मुखे ॥१०॥ चतुरङ्गेषु
विद्धं तु तथोर्ध्वमुत्तोलितं नरं । नान्यत्कृत्वात्यजन्तुग्रमृतिप्राप्त्यै शनैः शनैः ॥११॥ तन्मू १३२
र्द्धोपरि तु प्रोक्तदारुणोर्मेलनोपरि । दोषः शूलप्रविद्धस्य सर्वैः पाठ्यो व्यलिख्यत ॥१२॥
घोरा मृतिरियं शिष्य कशादीर्णो ह्यसौ पुरा । रौम्यरीत्या कुकर्म्मास्मिन् शूलेऽतिवित
ताङ्गकः ॥१३॥ विद्धाङ्घ्रिकरकः सर्व्ववपुर्गुरुतया तते । क्षते चाप्यनिलस्पृष्टयारुन्तुदेर्म्म
चतुष्टये ॥१४॥ पीडनादुत्थितायां च हृदि रुद्धासृगूर्म्मिके । व्यथायामप्यसह्यायां वर्द्धितायां

क्रमात् क्रमात् ॥१५॥ शूलविद्धः स भीमार्त्तिर्व्याप्न आगमनं मृतेः । अत्यैच्छत्सकले ऽह्नोव
ऽप्यहे वापि कदाचन ॥१६॥ तस्मिन् दारुद्वये लग्नो ऽत्यज्यतापि परे शवः । दाक्षाय्याद्यै
र्विदार्य्यो हि भयकृत्यै प्रदर्शिनां ॥१७॥ अयं दण्डो ऽधमानां तु पारशीकादिषु स्थितः ।
रौम्येष्वेतत्परे ऽतिष्ठत्रिशताब्दे ऽपि केवलं ॥१८॥ कैशराख्या हि सम्राजः कोंस्तान्तीनादय
स्तदा । खृष्टीयमतमालंब्य प्रतिरुद्धं पुरा भुवि ॥१९॥ द्विदारुं शूलमालिंग्य मुक्त्युपायं १३३
प्रियं ध्वजं । चक्रुः स्वीयं न्यषेधंश्च शूलदण्डममुं ततः ॥२०॥ शिष्य उवाच ॥ भैरवो
ऽयं त्वया दण्डो वर्णितो मे स्फुटं गुरो । येन त्वेषापि घोरार्त्तिः स्वयं सोढा नृमुक्तये ॥२१॥
स दयालुः कथं खृष्टः पीलातादेशनात्परे । स्वलज्जादुःखशृङ्गं तमुपेतः क्रूरशत्रुतः ॥२२॥
गुरुरुवाच ॥ पोलातेन तदा पूर्णे विचारे स्तेनयोर्द्वयोः । समं संहार्य्ययोः सार्द्धमुहूर्त्ते ऽकोद

याझते ॥२३॥ तदा न्यस्तो ऽनघो येषूर्गुल्माधीशकरे पुरात् । वहिर्नेतुं मृतिस्थाने तद्वायु

दिशि संस्थिते ॥२४॥ नहि पुण्यपुरान्तः सा कर्तव्या मलिना क्रिया । मोसिशास्त्रे ऽभि

शप्तो हि दारूढ्ढः किलोच्यते ॥२५॥ स त्वस्मिन् गमने स्वोयदण्डशूलं द्विदारुकं । स्वस्कन्धो

परि वोढुं तैः क्रूरैराज्ञापितो ऽरिभिः ॥२६॥ क्लान्तः सप्ततिदण्डीयदीर्घजागरणेन यः ।

परे सद्वोजनान्नित्यं दुःखाब्ध्यूर्म्मिपरिप्लुतः ॥२७॥ यो ऽसृक्स्वेदव्यथापन्न उद्याने विष्व १३४

पत्स्विह । शिष्येष्वथ च तैर्हीनः सत्पुरे ऽपहृतो निशि ॥२८॥ आहतः कायफस्याथ

शालायां यो ऽथ चोषसि । अध्यक्षालय एवोग्रकशाकण्टकताडितः ॥२९॥ स तथा व्रणितः

सम्यग्दुष्टभारप्रपीडितः । यिरूषलेमतो वाह्ये स्तोकशः प्रावलत्पथि ॥३०॥ इयत्सोढु

मशक्ते तु भूते ऽर्थ्ये शूलवाहने । अन्यं तद्वहनार्थं ते विष्टीचक्रुर्नरं ततः ॥३१॥ क्षेत्रतो यस्तदा

देवाच्चलन् हि नगरं प्रति । कुरेणीवास्यपि त्राणपर्व्वणे समुपस्थितः ॥३२॥ तस्य सीमोन
संज्ञस्य स्कन्धोपर्य्यर्पयन् बलात् । तच्छूलं स्वगणाग्रे ते वोढुं ख्रिष्टजिघांसवः ॥३३॥ तत्प
रे त्वेष सीमोनः पितालेक्षन्द्ररूफयोः । सस्वपुत्रद्वयः शिष्य ख्रिष्टीयं धर्म्ममाश्रयत् ॥३४॥
तस्य मुक्तिदशूलं च हृदये ऽप्यवहत्स्वयं । यस्य तर्ह्यवहद्दारुशूलं विष्टीकृतो बलात् ॥३५॥
येषूं त्वनुगता बह्वी जनता स्त्रिय एव च । आघ्नत्यः स्वीयवक्षःसु विलपन्त्यो ऽपि चोच्चकैः ॥ १३५
३६॥ एतासां करुणां दृष्ट्वा दुर्मृत्यर्थे चलन् प्रभुः । प्रत्यावर्तितवक्त्रस्ता इदं स्मार्य्यं वचो
ऽब्रवीत् ॥३७॥ श्रीयेषूरुवाच ॥ मा वो मदर्थे ऽस्तु यिरूषलेमकन्या विलापः किल रोदनं
च । किंत्वात्मनामर्थ इहात्मपुत्रवृन्दस्य चार्थे रुदितास्तुयुक्ताः ॥३८॥ अहो समायान्ति
हि वासराणि नरा यदेमां प्रवदेयुरुक्तिं । धन्या नु बन्ध्या अनवाप्तगर्भास्तोकैरपोतस्तनका

स्तथेति ॥३९॥ अद्रींस्तदाह्वातुमुपक्रमेरन् प्रगुप्तये नः पततोपरीति । आर्द्रद्रुमे चेद्धि कृतं
तथैव शुष्के तदाहो प्रकरिष्यते किं ॥४०॥ गुरुरुवाच ॥ इत्युवाच दयालुः सोऽर्तीः स्वप्रोक्ताः
स्मरन् किल । भव्या यिरूषलेमेऽस्मिन् सप्ताब्दे षड्गुणे त्वितः ॥४१॥ यदा दण्ड्यपुरेऽपू
ताक्षौहिणोपरिवेष्टिते । पोडा स्याद्यावती नोर्व्यां सृष्ट्यावध्यालयं कुचित् ॥४२॥ तस्मिन्
जीवद्द्रुमूले च ज्वालितोऽर्त्यनलोऽधुना । परे शुष्कात्मकांस्तत्र स्वराजघ्नान् दहेद्ध्रुवं ॥ १३६
४३॥ हन्तॄणां त्वधुनैषां सोऽङ्घ्रोमानपरिपूर्तये । नीतो वृन्देन शेषे तां समाप्नोत् स्तोक
कां गतिं ॥४४॥ घात्याभ्यामितराभ्यां च सहोपस्थाय दुःस्थले । गुल्गुथे देशभाषोक्ते कपाल
स्थानसंज्ञके ॥४५॥ तस्मिन् क्षुद्रगिरौ नातिदूरे गोपुरतः स्थिते । तत्रमारितदुष्कारि
कपालाद्यस्थिविस्तृते ॥४६॥ गुल्मसैन्यास्तदा शूलांस्त्रोन्निष्ठापयितुं भुवि । सर्वं प्रस्तो

न्नमप्युयदण्डायारेभिरे दृढं ॥४७॥ तदाप्यार्य्यप्रभोरये रोम्यरीत्यनुसारतः। कटुना रस
गन्धेन मिश्रितामानयन् सुरां ॥४८॥ बोधहत्यै तु दत्तां तां व्यथाभोगश्रमाय च। न लेभे
ऽतिसहिष्णुः स मुमूर्षुर्नरमुक्तये ॥४९॥ सिद्धज्ञानेन्द्रियः सोऽन्त उर्द्धमुत्तोलितो भुवः। कीले
दारुद्वये विद्धाङ्घ्रिकरः सर्व्वगोचरे ॥५०॥ मध्ये दस्य्वोर्द्वयोः संस्थस्तद्वच्छूलप्रविद्धयोः। न
किंचिद्वदत्क्रूरपीडाव्याप्त इदं विना ॥५१॥ श्रीयेषूरुवाच ॥ हे पितर्दययैतेषां क्षमस्व वध 137
पातकं। नहि ते स्वकृतं कर्म्म जानन्ति भ्रान्तमानसाः ॥५२॥ गुरुरुवाच ॥ इत्यूचे नह्यमानः स
कीलैः शूले दयानिधिः। यदाद्यः प्रहरो यातो द्वितीयश्चोपचक्रमे ॥५३॥ तदा तदभिशप्तेश्व प्राक्
पीलातेन या लिपिः। लेखिता सार्पिता सैन्यैः शूले तन्मस्तकोपरि ॥५४॥ त्रिभाषा सैस्त्र
येलीयभाषया लिखिताथ च। यावन्याथ च तच्छेषे लटीनाभिधरोम्यया ॥५५॥ नशरेतीय

एषो ऽस्ति येषूराजा यहूदिनां । इत्यलेख्यखिलैः पाठ्यं वङ्गैर्भाषात्रयाक्षरैः ॥५६॥ ततो ऽग्र्या
याजका यस्मात्पाठ्यमेतद्वचो ऽखिलैः । यहूद्यैरन्यजैश्चैवातुष्टाः पीलातमब्रुवन् ॥५७॥ असौ
राजा यहूद्यानामिति मा लिख किंत्वसौ । आत्मोक्तो राड् यहूद्यानामित्येवाध्यक्ष लिख्यतां ॥
५८॥ एवं श्रुत्वा तु पीलातस्तद्वाक्यैः कुपितो ऽवदत् । यन्मयालेखि तन्मात्रं लिखितं ताव
दस्त्विति ॥५९॥ गुल्मसैन्यास्तु चत्वारः शूले विद्धैस्त्रयेलिनां । सद्राजं वस्त्ररहितं तत्र बद्ध्वा १३८
च तां लिपिं ॥६०॥ तदा तस्याम्बरं सर्वं चतुर्धा व्यभजन् समं । आत्मार्थे रीतितस्ते ऽशं
नयन्तः पृथगेकशः ॥६१॥ तत्र श्रेष्ठांशुकं त्वाप्त्वा न सूत्रयुतखण्डकं । किंत्वयावध्यभिन्नं वै
व्यूतमूचुः परस्परं ॥६२॥ वयं मा खण्डयामेदं गुटिकापातनेन तु । विजानीम तदस्माकं
कतमस्य भवेदिति ॥६३॥ एवं चक्रुः पुराणायाः ख्रीष्टार्त्तिविषये गिरः । दृढसंपूर्त्तये सैन्या

रौम्यास्तदविदोऽपि ते ॥६४॥ यहूद्या याजकाद्यास्तु पीलातलिखितात् प्रभोः। दोषपत्रा
दसंतुष्टा हेलनायेदमब्रुवन्॥६५॥ यहूद्यप्रधाना ऊचुः॥ अन्यमोक्तायमात्मानं किं न मोच
यितुं क्षमः। शूलतोऽवतरत्वेव खृष्टः स ह्यैस्रयेलराट्॥६६॥ तद्दृष्ट्वा तं प्रतीयाम खृष्ट
मीशवृतं किल। ईशे स व्यश्वसत् तेनाव्यतां तद्दयितोऽस्ति चेत्॥६७॥ गुरुरुवाच॥ तथा
प्रत्नवचःपूर्त्यै ज्येष्ठाध्यापकयाजकैः। सत्खृष्टो दाविदः पुत्रः सहासैरवधीरितः॥६८॥ १३९
तद्वत्सर्वगणाश्चोयशूलसंनिधिगामिनां। येषूं संपीडितं तत्राहेलयन् धुतमस्तकाः॥६९॥ यहूद्या
ऊचुः॥ अहो भनक्षीश्वरमन्दिरं यत्त्र्यहे च निर्म्मासि पुनर्महात्मन्। विमोचयात्मानमपीश
पुत्रश्चेत्स्यास्त्वमत्रावतरैव शूलात्॥७०॥गुरुरुवाच॥ इत्युक्ते रौम्यसैन्यास्तु तद्दयालुतरा अपि।
शूलरक्षकेरा भूते पादोनप्रहरद्वये॥७१॥ तदग्रे स्वाम्लपानीयमुद्धरन्तो न तेन तु। गृहीतं दुःख

सह्निना सहासा अवदंस्तथा ॥७२॥ चेत्त्वं राजा यहूद्यानां मोचयात्मानमप्यहो । इत्येतास्तु
गिरः शूलविद्धदस्युद्वयश्रुताः ॥ ७३ ॥ अथैको ऽपि तयोर्व्यूहावहेलानुक्रमात् प्रभुं । अवद
द्यदि ख्रीष्टः स्या आत्मानं नौ च मोचय ॥७४॥ इत्युक्तं म्रियमाणेन दस्युनाकर्ण्य तत्सखः ।
श्रीयेष्वितरपार्श्वस्थो गर्हंस्तत्कुमनो ऽब्रवीत् ॥७५॥ परदस्युरुवाच ॥ अरे कथमिदानीं
त्वं न बिभेषि महेश्वरात् । आपन्नो ऽपि समं दण्डं त्वन्निन्दितमुमूर्षुणा ॥७६॥ न्यायतस्तु १४०
तदापन्नावावामर्हं क्रियाफलं । प्राप्नुवन्तावयं त्वड्ढो नाचचार कदाचन ॥७७॥ गुरुरुवाच ॥
इत्युक्त्वात्मसखं शूले स्वकुकर्म्मानुतप्तहृत् । नम्रात्मा स तदा येषूं सद्विश्वासवचो ऽब्रवीत् ॥७८॥
परदस्युरुवाच ॥ हे प्रभो त्वं यदा स्वीयराज्यं प्राप्यैस्रयेलकं । आगतः स्यास्तदा नूनं
दयया संस्मरार्य्य मां ॥७९॥ गुरुरुवाच ॥ तथोक्तः शूलविद्धेन दस्युनाघानुतापिना । अनघः

पापिभीतोऽयमन्यथाव्याप्ततरोऽब्रवीत् ॥८०॥ श्रीयेषूरुवाच ॥ परलोकसदुद्याने त्वमद्यापि मया
सह । संस्थितः स्याः किलेति त्वां सत्यवाक्यं ब्रवीम्यहं ॥८१॥ गुरुरुवाच ॥ तथा स्वासृग
मूल्यं योऽघमुक्त्यै तदापातयत् । यथेषायोदितं चाघकृन्मध्ये गणितोऽप्यतः ॥८२॥ स स्वयञ्च
महाशक्तिं भुवनाकर्षिणीं तदा । प्रथमं तस्य मुक्त्यैव पापकर्तुरदर्शयत् ॥८३॥ तद्विश्वा
सानुतापौ च नृरोढान्तः प्रदर्शितौ । रक्तेनेवाप्तसंस्कारौ सदुद्यानेऽप्यवेशयत् ॥८४॥ शिष्य १४१
उवाच ॥ दुरात्मककरैः शूले हन्यमानस्य सत्प्रभोः । तदनन्तदयाचिह्नं संशृणोमि तदर्च्यहं॥
८५॥ किंतु यत्प्रत्नवचसः पूर्त्यै दुष्टा यहूदिनः । व्यथाव्याप्तं सहासास्ते स्वमवाधीरयन्
नृपं ॥८६॥ सैन्याश्च व्यभजन् वस्त्रं गुटिकापातनैरपि । तान्यपि प्रत्नवाक्यानि श्रोतुमिच्छा
मि ते गुरो ॥८७॥ गुरुरुवाच ॥ तत्सर्वं दाविदा शिष्य स्वपुत्रस्य महीयसः । चिराद्भव्यस्य

नाम्नैव तथा व्यक्तमलिख्यत ॥८८॥ इस्रयेलराज उवाच ॥ अहहेश ममेश मे कथं व्यथने
मां विजहासि पीडितं । कथमप्यतिदूरसंस्थितोऽसि मम त्वं सविलापघोषतः ॥८९॥ अह
मत्र महीलतेव हि स्थित ओघैर्घृणितोऽवहेलितः । प्रहसन्त्यखिलाः समीक्ष्य मां वितताेष्ठा
धुतमस्तकाश्च ते ॥९०॥ प्रवदन्त्यपि चायमीश्वरे सततं व्यश्वसदात्ममुक्तये । अधुनात्र तु
तेन सोऽव्यतामपि चेत्तद्दयितो भवेदिति ॥९१॥ जठराद्युदपादयोऽपि मां त्वयि च १४२
व्यश्वसमुद्भवावधि । अथ मा भव दूरसंस्थितोऽप्यधुना हीनसहायकाङ्क्षि मत् ॥९२॥ बहवो
वृषभा हि सांप्रतं बलवन्तः परिवेष्टयन्ति मां । अभिनर्द्दिविदारिसिंहवन् स्वमुखं व्याद
दतो ममोपरि ॥९३॥ जलवद्भवं निजस्थलादखिलास्थीनि वहिर्गतानि च । स्रुतसिक्थ
कवन्ममोदरे हृदयं सम्यगपि प्रलीयते ॥९४॥ बलमेव च शर्करेव मेऽस्त्यवशुष्कं रसनाप्यतो

मम । चिबुकद्वयलग्नवत्यहं त्वपि मृत्योरजसि त्वयार्पितः ॥९५॥ परितः श्वनिभैः शठ
व्रजैरपि विघ्नाङ्घ्रिकरः स्थितो ह्यहं । सकलास्थ्यपि चैकशः क्षमे किल संख्यातुममीभिरी
क्षितः ॥ ९६ ॥ विभजन्ति च ते मदम्बरं गुटिकापातनतश्च मे ऽशुकं । विदधत्यपि
ते ऽतिलीलया त्वमतो रक्षितुमेहि मां विभो ॥९७॥ असितः प्रियजीवनं त्वव श्वबलात् सिंह
पराक्रमात्तथा । अथ नाम तवैस्त्रयेलके स्वजनौघे स्तवितास्म्यहं सदा ॥९८॥ अतिदीन १४३
गणोऽपि भोजनं सदिहात्वा परितृप्तिमाप्नुयात् । परिवृत्तहृदोऽखिलेतरान्वयजाश्चापि
भजेयुरीश्वरं ॥९९॥ गुरुरुवाच ॥ तथा दाविद्यवाक्यैः स सत्येशभजनं प्रति । सकलान्व
यजाकर्षी प्रोक्तः शूलो नृमुक्तिदः ॥१००॥ यल्लग्नोऽप्यैस्त्रयल्यानां राजा विद्धकराङ्घ्रिकः ।
विततांङ्गो व्यथाव्याप्तहृदयान्त्रास्थिमांसकः ॥१०१॥ अवहेलां समस्तानां वृषसिंहश्वचेतसां ।

वक्त्रभागयुतां सेहे पितृविश्वासशक्तितः ॥१०२॥ असोढमितरैः सर्वैर्हेलादुःखभुजां नृणां ।
भूमिमण्डलसर्वाङ्गभारं किल समूढवान् ॥ १०३ ॥ तमीशेच्छाविनीतः स नृदयान्व्याप्नुहत्
स्वयं । सेहे स्वक्रूरहन्तार्थे मृत्युदुःखान्तरेऽर्थयन् ॥१०४॥ शिष्य उवाच ॥ विस्मितो
ऽहं शृणोम्येतां पूरितां सर्वशो गिरं । अस्मृतामपि दुर्यज्वगणैस्तद्वागुदारकैः ॥१०५॥ मुमू
र्षोस्तु कथां मोक्तुर्भद्रदस्य्वघमार्जनात् । परेऽहमधुनाचार्य्य संश्रोतुं स्पृहयामि ते ॥१०६॥ १४४
गुरुरुवाच ॥ दस्युमोचनसद्वाक्यात्किंचित्पर उपस्थितः । मध्याह्नः शुक्रवारस्य ज्ञेयस्तस्य सतः
खलु ॥१०७॥ ततः शूलव्यथार्द्धे तु समाप्ते सत्प्रभोस्तमः । अष्टदण्डेषु तन्मृत्युपर्य्यन्तं व्याप
तां क्षितिं ॥१०८॥ सूर्य्योऽपि हि निजस्रष्टुर्नरीभूतस्य भूतले । मृत्यर्त्तीरक्षमो द्रष्टुमन्धेनाच्छा
द्यतोरुणा ॥१०९॥ ततः परिस्थितव्यूहहेलनेऽपि न तिष्ठति । तदुग्रतरदुःखोर्म्मिमग्नमीश

सुतस्य हृत् ॥११०॥ तत्पितुश्चेश्वरस्यापि मुखं गुप्तं नृणां तु ये । प्रियाः सर्व्वे स्थिता दूराद्
विना तत्सच्चतुष्टयं ॥१११॥ शिष्य उवाच ॥ के त आचार्य्य चत्वारो ऽवतीर्णेशसुतप्रियाः ।
तदुग्रप्रहरे शूलसमीपे समुपस्थिताः ॥११२॥ गुरुरुवाच ॥ मध्याह्नात्प्राक् प्रभोः शिष्या योहन्ना
द्याश्च याः स्त्रियः । गलीलातस्तमन्वायंस्तत्कर्म्मैक्षन्त दूरतः ॥११३॥ तन्माता तु मरी
यार्य्या समुपस्थातुमैहत । स्वपुत्रव्यथने शूलं वेष्टमानेष्वरिष्वपि ॥११४॥ स्वीयप्रेतपतेः १४५
भ्रातो ऽन्विता स्वस्रा मरीयया । पत्न्याल्फायस्य मात्रा चाल्पयाकोबयहूद्योः ॥११५॥
अन्विता च तथा सत्या मग्दलीयमरीयया । सन्मोक्तृप्रेष्ठशिष्येण किल योहन्निनापि च ॥
११६॥ कपालस्थानमारुह्य शूलदारुतले स्थिता । तत्र प्रियतमस्यात्मसुतस्यार्त्तीर्निरैक्षत ॥
११७॥ तत्र यत्र शिशौ तस्मिंस्तामुवाचेशशिक्षितः । वृद्धस्त्रिंशत्समाभ्यः प्राक् सिम्योनो विभु

मन्दिरे ॥११८॥ तस्य वै सत्यतां प्राप धन्याम्बा शूलसंमुखे । निन्दालक्ष्मात्मपुत्रार्त्या
शूलवद्दुःखविद्धहृत् ॥११९॥ तां तु दृष्ट्वार्य्यपुत्रः स्वशूलविद्धहृदं प्रियां । तत्सहस्थितमप्यात्म
प्रियं तं जिबिदोयजं ॥१२०॥ स्नेहाविष्टोऽभ्यवादीत्तां नारि पश्य सुतं तव । इत्यथोवाच
योहन्निं पश्य त्वज्जननीमिति ॥१२१॥ एवं चरममादेशं प्राप्य स्वीयप्रभोरसौ । इतः स्व
गृहमानीय तां पुपोषात्ममातृवत् ॥१२२॥ मोक्तृशूलतले त्वेवान्धमुहूर्त्तचतुष्टये । सत्स्वल्पस १४६
त्सु तच्छेषे तृतीयप्रहरे किल ॥१२३॥ स्वपित्रा दत्तपात्रात्स्वं कटुपानं निपीय सः । नृ
मोक्ता सान्त्वनाभावाद् भूम्यङ्कःफलभुक् तदा ॥१२४॥ उच्चैर्दाविद्यगीतस्य तस्याद्योक्तीरुदै
रयत् । अहहेश ममेश त्वं कथं मां विजहासि नु ॥१२५॥ इत्युक्त्वा पितरं तर्हि सर्व्वपूर्त्ति
मुपस्थितां । जानन् सद्ग्रन्थवाक्पूर्त्त्यै तृष्यामीत्यर्थने ऽवदत् ॥१२६॥ दाविद्यवचसो त्वाद्ये

उक्ते सूरीयभाषया । एली एली इति श्रुत्वा यहूद्याः के ऽपि तत्स्थिताः ॥१२७॥ अलीयं
ह्याह्वयत्येष ख्रृष्टाग्रचरताकृते । इत्यूचुरविदस्तस्यार्थस्येशेश ममेति ते ॥ १२८ ॥ कश्चित्तु
भाजनात्तत्र स्थितादम्लीकृतेरया । पूरितान्तूलवत्पिण्डं विभृत्य द्रवशोषकं ॥१२९॥ वेत्राग्रे
स्थापयित्वा चाथोर्द्ध्वमुत्तुल्य तेन च । मुमूर्ष्वोष्ठद्वये न्यास्यत्तद्दुस्तृष्णानिवृत्तये ॥१३०॥ अन्ये
तु तिष्ठतालीयः किं तं मोचयितुं मृतेः । आगच्छेदिह पश्यामेत्यवोचन्नवहेलिनः ॥ १४७
१३१॥ प्रभुस्त्वम्लसुरां पीत्वा संपूर्णमिति चख्यिवान् । अनर्हत् त्वत्करे ऽहं स्वमात्मानं पित
र्र्पये ॥१३२॥ इत्युदीर्य्य स दाविद्धवाक्यान्युच्चैर्विभोः सुतः । मूर्द्धानं नमयित्वाथो स्वीय
प्राणानवर्ज्जयत् ॥१३३॥ तदा पुण्यतमस्थाने महाजवनिका स्थिता । अखिलैरप्रवेश्या या
रहस्याच्छादिनो विभोः ॥१३४॥ सोर्द्धतस्तलपर्य्यन्तं विदीर्णा तत्क्षणे द्विधा । प्रायश्चित्ते

ऽखिलाघानां समाप्ते प्रभुमृत्युना ॥१३५॥ भूमिकम्पोऽभवच्छैला विभिन्नाश्चापि तत्क्षणे ।
चिरादपि निखाताश्च व्यादीयन्त शवावटाः ॥१३६॥ बहूनां मृत्युनिद्रातो देहाश्चाप्युत्थिताः
सतां । प्रभूत्थानात्परे दृष्टा भूरिभिश्चैव सत्पुरे ॥१३७॥ किंतु येऽधिगता व्यूहास्तत्र
तद्दण्डदृष्टये । सर्वे खिन्नहृदः शेषे वक्षांस्याहत्य ते ययुः ॥१३८॥ गुल्मेशोऽपि तु यस्तदुग्र
मरणाध्यक्षः ससैन्यः स्थितो भूकम्पादिभिरन्वितं स सकलत्रासप्रदैर्लक्ष्मभिः । संदृश्यैव यहूद्य १४८
राजमरणं तद्वाचमप्यन्तिमां श्रुत्वेशादरवाद्युवाच नितरामीशात्मजोऽसाविति ॥१३९॥
इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्वणि (दाविद्गीतानां द्वाविंशैकत्रिंशोनसप्ततितमेभ्यो
मत्थायस्य सप्तविंशसर्गान्मार्कस्य पंचदशसर्गाल्लूकस्य त्रयोविंशसर्गाद्योहन्नेरूनविंशसर्गान्नाना
रोम्यप्रबन्धेभ्यश्चोद्धृतः) सच्छुक्रवारोत्तरचरित्रसूचको महायज्ञसंपूरणं नाम द्वादशोऽध्यायः ॥

शिष्य उवाच ॥ एतत्सर्व्वं विलोकात् को न गुल्माधीशवद्वदेत् । दयालुः स स्थिरः सोढे

श्चात्मजो नितरामिति ॥१॥ गुरुरुवाच ॥ यो मनुष्यीकृतेशे वै खृष्टे सद्गुणसंचयः । उत्पन्य

बधि तत्सर्व्वंचरित्रान्निर्म्मलाद्बभौ ॥२॥ तस्य भद्रतमं सारमतुल्यममलं परं । एतस्मिन्

पश्य हे शिष्य शूले सम्यक् प्रदर्शितं ॥३॥ अनघो दण्डितो येन विद्वश्च प्रियनानिधिः । मारित

श्च प्रभुर्मृत्युं विजिग्ये तेन सर्व्वशः ॥४॥ नृपापफलमत्यन्तं सर्व्वपापहरस्तु सः । लज्जाया १४९

अधमोऽङ्कोऽपि नित्यादरविधायकः ॥५॥ दौर्बल्यान्तिमलक्ष्मापि दयाशक्तेर्महाकरः ।

अतिदुःखोग्रवासोऽपि परमानन्ददः सतां ॥६॥ मृत्यूपायोऽप्यमरताप्रदस्तत्सहभागिनां ।

तमोविक्रममूर्द्धापि तमोनाथविनाशकः ॥७॥ तेन ह्याहत्य दुष्टात्मा स्त्रीसूनोः पार्ष्णिमेव सः ।

महानागोऽथ तेनापि बभूवाहतमस्तकः ॥८॥ अतः पूर्व्वंनराघघ्नं सन्मुक्तिफलधारकं ।

शूलसंज्ञमिदं दारु दृढभक्त्याद्रियामहे ॥९॥ तं शूलं पुण्यकवचं कामक्रोधादिनष्टये । दधा
मो हृदि वक्त्रे च गृहान्तःस्था वहिर्गताः ॥१०॥ तं मोक्तृस्मृतये हर्षे दुःखे सत्सान्त्वनाय च । आ
लिंगामोऽङ्कमैशस्य प्रेम्णः स्वादुतमं सदा ॥११॥ तं सदैकमहायज्ञवेद्याख्यं ह्याश्रयामहे । तस्मि
न्नेवैकविजयध्वजे गल्भामहे सदा ॥१२॥ शिष्य उवाच ॥ अस्याः खृष्टार्च्चिनां भक्तेर्लज्जा
दुःखाङ्कधारिणां । अद्भुताया अपि स्पष्टं हेतुरुक्तस्त्वया गुरो ॥१३॥ किंतु तच्छूलविद्धान्ते १५०
किमार्य्यस्य प्रभोः शवः । दाक्षाय्याद्यैर्विदार्य्योऽस्मिंस्त्यक्तस्त्वत्प्रोक्तरीतितः ॥१४॥ गुरु
रुवाच ॥ तथा न त्वभवच्छिष्य विभुपुत्रतनौ यतः । यहूद्याः पर्वकालेऽस्मिन्नैशशास्त्रोक्ति
मस्मरन् ॥१५॥ मोसिरुवाच ॥ मृत्यर्हपापकृदितोऽभिहतो विचाराद्वृक्षमूर्त्तिरपि दारुणि
वो गणश्चेत् । रात्रौ तदैव न शवस्तदुपर्य्यमुष्य त्याज्योऽस्ति किंतु तदहेऽप्यवटेऽर्पणीयः ॥

१६॥ यो यः कदापि हि नरेषु किलास्ति दारुड्वः स ईश्वरगिरोक्त उताभिशप्तः ।
तस्मात्तमेव परिगुप्य मृदीशदत्तां भूमिं न तेन मलिनीप्रकरिष्यथार्य्यां ॥१७॥ गुरूरुवाच ॥
ततो भीत्या हि शूलेषु शवस्थित्याः परेऽह्न्यपि । त्राणीयोत्सवविश्रामशनौ श्रेष्ठे यहूदिनः ॥
१८॥ पीलातं प्रार्थयन् शूलाद् भग्नजङ्घं शवत्रयं । सूर्य्यास्तात्प्राक् समुद्धर्त्तुमवटन्यस्तये किल
॥१९॥ इत्यर्थनानुसारेण तृतीयप्रहरात्परे । शूलविद्धत्रयान्ताशुकृतिं पीलात आदि १५१
शत् ॥२०॥ ततोऽभ्येत्यैकदस्योस्तेऽभञ्जन् जङ्घे तु सैन्यकाः । परदस्योश्च तद्वत्तन्मृत्याशु
करणार्थकं ॥२१॥ किंतु येषूं ततोऽभ्येत्य गतासुं प्राप्य दीर्घया । दुर्ब्बलीकृतमर्त्यो ना
भञ्जंस्तत्प्रसृते अतः ॥२२॥ तेषां त्वेको मृतं ज्ञात्वा स्वयं शल्येन सत्प्रभोः । तत्क्रूलाधःस्थितः
कक्षं विव्याधातिबलात्तदा ॥२३॥ तद्व्रणाच्चोत्थिते सद्योऽसृक्पानीये अमिश्रिते । यस्तदैक्षत

साक्षी तु सत्यवाक् सत्यविन्न सः ॥२४॥ प्रेष्ठशिष्यो हि योहन्निः प्रभुशूलतले स्थितः । स्वसं
दृष्टमिदं पश्चाल्लिलेखास्मत्प्रतीतये ॥२५॥ प्रत्नवाचोरपि त्वेतदभवत्पूर्त्तये यतः । त्राण
पर्व्वीयमेध्याविवत्सस्य विषये तथा ॥२६॥ विद्धस्यैशेष्टिविम्बस्यादिष्टमीशेन मोसये । तस्या
स्थ्नां न कृचिद्भंज्यं मेध्यस्यैकमपि न्विति ॥२७॥ जकरीयेण चाप्युक्तं परे यैरूषलेमकाः । आत्म
विद्धं निरीक्षेरन् दुर्व्विलापयुता इति ॥२८॥ शिष्य उवाच ॥ किं ततो मृतयोर्दस्य्वोराद्यैस्ता १५२
भ्यां सह प्रभुः । द्विट्प्रार्थनानुसारेण न्यस्तो मन्दशवावटे ॥२९॥ गुरुरुवाच ॥ स्मरणीया त्वया
शिष्य प्रवक्तुः प्रभुणाखिलं । लोकाघाद्व्यथनं सोढं प्रोचुषो वागियं श्रुता ॥३०॥ कुजनैः सह तस्य
च व्यसोर्व्विहितं गर्त्तनिखातमेकदा । धनिना तु सहस्थितो ध्रुवं मृदि सो ऽभूत् समवाप्तमृत्यु
कः ॥३१॥ एतस्येषायवाक्यस्य त्वं शिष्य श्रुतवान् पुरा । पूर्व्वाङ्कुतवचःपूर्त्तीः शृण्वर्थमधुना

स्फुटं ॥३२॥ धनी योसेफनामार्य्यो महासंसदि चाश्रितः । यहूद्यायां सदाचारो ऽरिमथाय

पुरोद्भवः ॥३३॥ यः प्रत्यैक्षत चाप्यैशराज्यं येषूं पुरापि च । प्रत्यायज्ञोपने स्वीयवर्ग

भीत्यैव संहृतः ॥३४॥ स तदा साहसीभूतः क्रोधहेलनतो न च । त्रस्यन्नप्यन्यसभ्यानां

तत्कुमन्त्रपराङ्मुखः ॥३५॥ रोम्यमध्यक्षमभ्येत्य येषूदेहमयाचत । स्वीये ऽर्पयितुमुद्याने शूल

वेधस्थलान्तिके ॥३६॥ तद्वाक्यं तु समाकर्ण्य पीलातः किल शीघ्रतां । मरणस्येयतीं येष्वो १५३

ऽत्याश्चर्य्यां समबुध्यत ॥३७॥ अल्पं प्राक्प्रेरितैर्जङ्घाभित्तये ज्ञापितो नहि । सैन्यैः स

मरणं येष्वो भूतं तर्ह्यपि खल्विति ॥३८॥ किंतु तन्निश्चयीकृत्यै गुल्मेशं शूलरक्षिणं । आह्वयत्

स तदा पूर्वं योसेफवरदत्तितः ॥३९॥ तं च पृष्ट्वा कियद्दीर्घं मृतो येषूरिति स्फुटं । शुश्रा

वान्तं प्रभोर्यामे तृतीये ऽन्यवचो ऽपि च ॥४०॥ विस्मितो ऽतस्तु पीलातो ऽरिमथायनिवा

सिने । सभ्याय शवमार्य्यस्य समर्पयितुमादिशत् ॥४१॥ ततो गत्वा धनी धर्म्म्यो यत्नतो
वेदिरूपकात् । शूलात्पुण्यतमं देहं स्वभृत्यानुदधारयत् ॥४२॥ दारूद्बद्धतया सोढशास्त्रोक्ता
घाभिशापनं । निराकृतविधिद्वेषं कीलविद्धतयापि च ॥४३॥ अनन्तार्घेष्टिशक्त्यैव जित
भूतेन्द्रविक्रमं । ईशत्वस्वस्तिकं पूज्यं सर्व्वसद्देहमुक्तिदं ॥४४॥ तथाभग्नास्थिमुद्धार्य्य योसेफ
स्तं दयानिधिं । पर्य्यधापयदात्मीयमतिशुभ्रं सुचेलकं ॥४५॥ नीकदेमश्च यः सभ्यो निश्य १५४
भ्यायात् प्रभुं पुरा । सोऽपीतः साहसोभूत्वादरितुं तद्वपुर्ययौ ॥४६॥ अगुरुं चानयत्तत्र
रसगन्धकमिश्रितं । सपादषट्तुलामानं निखातेऽङ्गनियुक्तये ॥४७॥ ततस्तौ धनिनौ मृत्यु
स्थलात् पटविवेष्टितं । कपालाद्यन्तिके देहं योसेफोद्यान उहतुः ॥४८॥ तदुद्यानान्तरे नूत्ना
मृतन्यस्त्यै गुहा स्थिता । स्वीयार्थे दृशदुत्खाता कित्वन्यस्तशवा तदा ॥४९॥ तद्बहिःस्थेऽङ्गने

नीत्वा देहं मृद्यर्पणाय तौ । यथारीति यहूद्यानां धनिनां प्रास्तुतां द्रुतं ॥५०॥ सागुर्वादिं
हि तं यत्नात् प्रच्छदैः परिनह्य तौ । गुहायां न्यास्यतां शेषे ऽतिसायाह्ने स्थिते किल ॥५१॥
सूर्य्यास्तात्प्राग्धि तत्कर्म्म समाप्तव्यं यतस्तदा । सद्विश्रामसमारम्भ ऐत्तयेल्यन्यव्यवस्थया ॥
५२॥ अतस्तत्पूर्व्वमपि तौ धर्म्म्यौ सद्गह्वरस्य वै । द्वार्याघूर्ण्योपलं वड्रं तत्सुरक्षाकृते गतौ ॥
५३॥ किंतु नार्य्यो गलीलीया या निरैक्षन्त दूरतः । प्रभुमृत्युं मरीये च ये तच्छूलान्तिके
स्थिते ॥५४॥ मग्दलीया किलाल्फायपत्नी चाप्यखिला हि ताः । तत्सद्देहापनयनं गह्वरे ददृ
शुर्दृढं ॥५५॥ किंतु सत्प्रभुमाता सा मरीया प्राक् ततः सती । योहन्निनान्विता शूलात् तद्गेहे
समुपागता ॥५६॥ प्रोक्ते त्वन्ये मरीये द्वे गह्वराङ्गनसंनिधौ । सन्ध्यापर्य्यन्तमासीने रक्षन्त्यौ
तत्प्रियस्थलं ॥५७॥ स्त्रियो ऽन्यास्तु गलीलीया योहन्ना तु विशेषतः । पत्नी खूजस्य हेरोद्या

न्तिपौकःसचिवस्य या ॥५८॥ तदाद्याश्चाशु सत्पुर्य्यां प्रययुः क्रेतुमिच्छुकाः । अर्कास्तात्प्राक्
सुगन्धीनि प्रभुदेहानुलिप्तये ॥५९॥ एवं चक्रूरवौ त्वस्तगते खल्वित एव ताः । आशनैश्चर
वारान्तं व्यश्राम्यन्नैश्वराज्ञया ॥६०॥ विश्रामं तु य ऐश एव षडहे संपूर्णविश्वक्रियः शब्दो
धन्यमुदीरयन् समविशच्छ्रस्तं पुरेशार्च्चिभिः । श्रेष्ठं सो ऽप्यवतीर्णसूनुरविशद्विश्राममुद्यानके
पुण्ये गह्वर एव पूर्णपरमाचारो विमोक्ता नृणां ॥६१॥ इति श्रीख्रिष्टसंगीतायां मोक्तृमाहात्म्य १५६
पर्व्वणि (मोसिपंचशास्त्रे निःसृतिस्कन्धस्यद्वादशसर्गात्संख्यास्कन्धस्य नवमसर्गादनुवाक्यस्कन्ध
स्यैकविंशसर्गादिषायभव्यवाक्यानां त्रिपंचाशत्तमसर्गाज्जकरीयभव्यवाक्यानां द्वादशसर्गान्मत्था
यस्य सप्तविंशसर्गान्मार्कस्य पंचदशसर्गाल्लूकस्य त्रयोविंशसर्गाद्योहन्नेरूनविंशसर्गाच्चोद्धृतः) सच्छुक्र
वारशेषचरित्रसूचक आर्य्यदेहनिखातार्पणं नाम त्रयोदशो ऽध्यायः ॥

गुरुरुवाच ॥ विलापः खृष्टशिष्याणां तद्द्विषां तु जयध्वनिः । पुण्यसप्ताहशेषे ऽस्मिन्
शनौ विश्रामके श्रुतः ॥१॥ प्रभुमृत्यतिखिन्नैस्तैः स्थूलहृद्भिर्हि विस्मृतं । तन्मृत्यूत्थानविषयं
वचः प्रोक्तं मुहुर्मुहुः ॥२॥ दुर्म्मनोभिः फरीष्यैस्तु समन्तात्स न विस्मृतः । दुष्टसंजयसंपूर्त्ति
रोधकः सत्प्रतिश्रवः ॥३॥ अतस्तत्त्राणविश्राममहाघस्रे ऽपि याजकाः । अग्र्या अभ्येत्य पीलातं
सफरीष्या वचो ऽब्रुवन् ॥४॥ यहूदीयप्रधाना ऊचुः ॥ हे महाशय जीवन् स वञ्चको ऽहं १५७
दिनत्रये । मृत्युतः पुनरुत्थास्ये नूनमित्यवदद्गणान् ॥५॥ एवं संस्मृतमस्माभिरतो ऽध्यक्ष
सुयत्नतः । रक्षणीयं त्वया तस्य शवन्यर्पणगह्वरं ॥६॥ तन्न चेत्स्याद्धि तच्छिष्या निश्युपेत्य
छलात्तदा । गर्त्ततो ऽपहरेयुस्तं ततो ब्रूयुस्त्वविद्गणान् ॥७॥ अहो मृत्यूत्थितः सो ऽस्ति
गुरुरित्यथ चोत्तरः । तदुत्पाद्यो भ्रमः पूर्व्वादपि मन्दतरो भवेत् ॥८॥ गुरुरुवाच ॥ इत्थ

मध्यक्ष आकर्ण्य सततावेदनस्य सः । तेषां विरतये रोम्यो दुर्हदामिदमब्रवीत् ॥९॥ पीलात उवाच ॥ युष्मभ्यं रक्षिणां वर्गो मया दत्तोऽस्ति तत्कृते । तान् यथावश्यकं नीत्वा दृढीकुरुत रक्षणं ॥१०॥ गुरूरुवाच ॥ ततस्तेऽरिमथायीययोसेफोपवनं शठाः । गत्वा गूथाख्यनगर वायुदिग्गोपुरान्तिकं ॥११॥ सद्गह्वरमुखे न्यस्तं प्राग्वज्रोपलमाङ्क्यन् । मुद्रया तेऽथ सैन्या नां द्वाःस्थानस्थापयन्निह ॥१२॥ मृषा त्वेतानि सर्व्वाणि सान्यजैरैस्रयेलकैः । कायफान्तिप १५८ पीलातादिभिः संकल्पितानि ह ॥१३॥ नहि ते विभुपुत्रस्योत्थानं रोद्धुमशक्नुवन् । सर्व्व राजोऽभिषेचस्य दाविदुक्तं यथा पुरा ॥१४॥ इस्रयेलराज उवाच ॥ वर्गाः किमर्थमति वर्द्धतुमूलमायन्नन्योन्नवेष्वपि मृषा परिकल्पयत्सु । उत्थाय भूमिपतयो हि परामृशन्ति रोद्धुं विभुं तदभिषिक्तनृपं च सेन्द्राः ॥१५॥ तच्छृङ्खलान् वयमहो परिभंज्य दूरेऽपास्याम

पाश्चयमेव तयोर्निजाङ्गात् । इत्याहुरात्ममदतो ह्यधिपाः स तूर्द्ध्ववासी विभुः सहसनो
ऽप्यवधीरयेतान् ॥१६॥ क्रोधान्वितः स तत एव भयंकरोक्त्याप्यात्मस्पृहाप्रतिरूत्सुनरान्
वदेतान् । राजानमात्मविहितं ह्यधुना सदद्रौ शीयोननाम्न्यहमहो न्यदधां तमित्थं ॥
१७॥ शंस्यैव तद्विषयदत्तविभुव्यवस्था त्वं मे सुतोऽसि जनितोऽपि मयाद्य नूनं । मामेव
तेऽर्थितवतेऽन्यजसर्व्ववर्गान् भृत्यान् किलाधरणिसीममहं प्रदास्ये ॥१८॥ दण्डेन तांस्त्वमपि १५९
भेत्स्यसि लौहकेन कुम्भादिकानिव करिष्यसि खण्डखण्डं । एवं नृपं प्रति गिरोदितयेश्व
रेण धीरीक्रियध्वमधिपा दृढशास्तिमाप्ताः ॥१९॥ भीत्येशमर्च्चत दरान्वितहर्षपूर्णाः पुत्रं
नमस्कुरुत शास्तिभृतं नवेद्धि । तत्क्रुड्ज्वलेन लघुनापि हतत्नमार्गाः स्यात प्रतीतिकृत एव तु
तस्य धन्याः ॥२०॥ गुरुरुवाच ॥ इत्थमैश्वरवाक्यस्य यद्भूतं शिष्य पूरणं । खृष्टरोद्भूनृपा

दीनां संकल्पौघातिखण्डनात् ॥२१॥ तस्य राज्यविधानाच्च जनितत्वाच्च सद्विभोः । तत्कार्य्याच्च समस्तानां दिशां राज्ञां च संजयात् ॥२२॥ तत्सर्व्वं संस्थितं विद्धि तृतीये ऽह्नि परे रवौ । न्यस्तमृत्यूत्थितौ दाविज्ञिरो ऽद्येत्यर्थधारके ॥२३॥ तद्देशसुतता ह्यस्य शक्त्या निश्चायिता भुवि । नवजन्म च नित्ये ऽभूज्जीवने मुक्तिदायिनः ॥२४॥ तत्कृते स्थापितं भूमौ पापहर्तृमृतेः परे । नित्यजीवनसद्बीजं सतां प्राप्तानुजन्मनां ॥२५॥ सर्व्वशाखादिमूलात्मा जीवदीशात्मजो ऽद्वयः । स त्वतः शिष्य मृत्वापि निखाते न्यर्पितो ऽपि च ॥२६॥ न शेषा इव तत्रैतः पूयिताङ्गो ऽभवन्मृदि । एतद्वस्त्त्रये दाविदुक्तं तद्विषये यथा ॥२७॥ इस्रयेलराज उवाच ॥ विभुं सदास्थापयमात्मसंमुखे ऽहमक्षरो ऽस्मिन्मम दक्षिणस्थिते । ततः सजिह्वं मम हृत् प्रहृष्यते वपुः प्रतीत्यापि शयीत चाभयं ॥२८॥ न मे त्वमात्मानमधःस्थले

त्यजेर्नचेक्षितुं पूयिततां स्वपुण्यकं । विहापयेर्जीवनमार्गदर्शकः स्वदक्षिणस्थाक्षयसौख्यको
ऽपि मे ॥२९॥ शिष्य उवाच ॥ स्वीयपुण्यसुतस्येशो न वपुर्मृतगह्वरे । त्यजेत्पूयिततावाप्त्यै
नवात्मानमधःस्थले ॥३०॥ इत्युक्तं दाविदा खृष्टविषये संशृणोम्यहं । रक्षां तद्वपुषश्चामूं बुध्ये
त्वत्पूर्ववाक्यतः ॥३१॥ तदात्मा तु कथं पित्राधोलोके न विहापितः । तज्जिज्ञासे प्रभोस्त
त्रावताराज्ञो हि खल्वहं ॥३२॥ गुरूरुवाच ॥ स्मार्य्यं सत्यवचः शिष्य परदस्युं प्रतीरितं । १६१
परलोकसदुद्याने ऽद्य मया स्याः सजूरिति ॥३३॥ अतस्तच्छुक्रवारे ऽपि सह तेनानुतापिना ।
पापशृङ्खलमुक्तेनाधोलोके ऽवततार सः ॥३४॥ तत्र चास्मिन् शनेवीर आमृत्युपुनरुत्थिति ।
तस्थौ तत्पुण्यमण्डल्या यथा विश्वसितं सदा ॥३५॥ अब्रह्मक्रोडसंस्थेभ्यस्तत्र सर्वेभ्य एव सः ।
विश्वासिभ्यः प्रतीक्ष्यस्तत्सत्संवित्प्रपूरणं ॥३६॥ प्रददौ मङ्गलां वार्तां पूरितस्य निजा

सृजा । प्रायश्चित्तस्य स पुरारूढस्वर्द्वारमोचिनः ॥३७॥ पूर्वेभ्यश्चानुतापिभ्यो नोहकाले
ऽपि स प्रभुः । चिरापेक्षितसन्मुक्तिं स्वकृतां प्रावरत्स्फुटं ॥३८॥ तथा स मृतिपाशेन
वेष्टितोऽपि तदा त्र्यहे । सुवार्तामानयन्मुक्तेः सर्वलोकप्रहर्षदः ॥३९॥ लेभे तु द्विविधं य
आत्मवपुषोः संस्थं नृभावं स्वयमीशस्यैकसुतो नवप्रकृतये ऽङ्गीमारितानां नृणां । मृत्यावाप्य
स भेदमात्मवपुषोः स्थाने इतोऽनुभयोर्गत्वाधोभुवने वरैरपि पुरानिष्टे प्रियांप्राकरोत् ॥४०॥ १६२
इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्वणि (दाविद्गीतानां द्वितीयषोडशाभ्यां मत्थायस्य
सप्तविंशसर्गाल्लूकरचितप्रेरितगणक्रियाणां द्वितीयचतुर्थसर्गाभ्यां सीमोनप्रस्तरलिखितप्रथम
साधारणलिपेस्तृतीयसर्गाच्चोद्धृतः) पुण्यशनैश्चरवारचरित्रसूचकः परमविश्रामो नाम चतुर्दशो
ऽध्यायः ॥

गुरूरुवाच ॥ तमोबलविमर्द्दिनं मरणदंशसंहारिणं नृणां सदनुजन्मदं सततजीवनोज्ज्वा
लकं । विमोक्तृजयपूरकं सकलवासराधीश्वरं प्रणम्य कथयामि ते तदतिचित्रकर्म्माण्यहं ॥
१॥ त्राणीयरविवारे ऽस्मिन्नरुणात्प्राक् समुत्थिते । मरीये द्वे सलोमी च जिबिदीयस्य
पत्न्यपि ॥२॥ ये हि शुक्रे यथाप्रोक्तमासूर्य्यास्तगति स्थिते । मरीये सद्वपुर्धारिगह्वराङ्गन
संनिधौ ॥३॥ या सलोमी च तर्ह्यात्मपुत्रयोहन्निना सह । बाध्या खृष्टार्य्यजननीं सान्त्वय १६३
न्ती स्ववेश्मनि ॥४॥ तत्सन्नारीत्रयं पूर्णे विश्रामे ऽर्के ऽस्तगे शनौ । सुगन्धीनि सम
क्रीणात् पूर्वोक्तस्त्रीगणा इव ॥५॥ प्राक् तत्सर्वगणाच्चार्काहे सलोमीगृहाद्द्रुतं । अचलद
गह्वरं द्रष्टुं प्राक् सद्देहानुलिप्सितः ॥६॥ सृतौ तिस्रस्तु ताः को ऽस्मत्कृते वड्रोपलं मुखात् । गह्व
रस्य विघूर्ण्यापनयेदित्यवदन् मिथः ॥७॥ योसैफनीकदेमाभ्यां दृष्टवन्त्यौ तमर्पितं । स्मरतः

स्म मरोये हि पररक्षाविदावपि ॥८॥ किंत्वभ्यर्णे उपस्थाय तिस्रो ऽर्कोदय इव ताः ।
भतं तं ददृशुर्वद्रं न कस्मिन्नप्युपस्थिते ॥९॥ शिष्य उवाच ॥ सैन्यास्तु कु गताः त्वाभिर
ज्ञाता अपि ये ऽर्पिताः । शनौ गह्वररक्षार्थं सपोलाताग्ययाजकैः ॥१०॥ को नार्य्यागमनात्
पूर्वं हेतुस्तद्विकृतेरभूत् । मुद्रितस्यापि च यात्णो ऽपनीतेर्वद मे गुरो ॥११॥ गुरुरुवाच ॥
तते ऽहं कथये शिष्य जिबिदोयगृहाद्यदा । सन्मातृन्युषितान्तिस्रस्ताः कपालादये ऽचलन् ॥ १६४
१२॥ तदैवोषसि भूकम्पो रोम्यगुल्माभिरक्षिते । वृहंस्तत्गह्वरस्थाने धूतमृत्यालयो ऽभवत् ॥
१३॥ स्वर्गाज्जहो अवततार तडिद्वदास्यो दूतो विभोर्हिमवदर्ज्जुनवस्त्रशुभ्रः । उद्यान एव
धनिनो ऽरिमथायवासिसभ्यस्य तत्र शयितप्रभुसेवनार्थे ॥१४॥ भीमो ऽथ रक्षकगणस्य स
गोचरे ऽपि तद्गोतिकम्पिततनोर्मृतवत्स्थितस्य । सद्गह्वराङ्गनमतीवबलात्प्रविश्य वद्वं व्य

चालयद्दिहोपलमयसस्थं ॥ १५ ॥ शक्त्या विभोर्विगतविघ्न इतो निरायान्मृत्युंजयः स्वयम
पीश्वरपुत्र आर्य्यः । मृत्युव्यथादिदृढबन्धमितो न गामी नित्याव्ययत्वपरिधापितमर्त्य
देहः ॥१६॥ शिष्य उवाच ॥ ये मृत्युगह्वरस्यैतां चित्रां शून्यीकृतिं तदा । ददृशुः किमकुर्वं
स्ते मोक्त्रैश्वर्य्याङ्कदर्शिनः ॥१७॥ गुरुरुवाच ॥ भीत्या पलायितेष्वेव सैन्येषु त्रिस्त्रियो यदा ।
तत्परेऽल्पतमे कालेऽर्कोदये तद्युपस्थिताः ॥१८॥ मरीया मग्दलीयैव तदा योष्याङ्गना १६५
न्तरे । व्यादत्तं गह्वरमुखं स्मृतवड्डोपले गते ॥१९॥ तद्धेतुविषये शङ्काविप्लुता व्यद्रवत्
पुनः । नगरेऽद्भुतवार्त्तां तां शिष्यान् ज्ञापयितुं प्रभोः ॥२०॥ इतरा तु मरीयाम्बाल्पया
कोबयहूद्योः । महायाकोबयोहन्न्योर्माता तद्वत्सलोम्यपि ॥२१॥ ते स्त्रियो गह्वराभ्यर्णे
तत्काले समतिष्ठतां । मग्दलीयागतिं भूयोऽपेक्षमाणे हि शङ्कया ॥२२॥ किंचित्कालं तु

भीत्या ते विलम्ब्य द्रष्टुमिच्छुके । किमासीदित्यविशतां हतत्रासे तदङ्गनं ॥२३॥ दक्षिणे
ऽहों समासीनः प्रोक्तवड्रोपलोपरि । अर्जुनाप्रपदीनोऽसौ युववद्दूत ऐक्ष्यत ॥२४॥
तस्मादतिभयं नार्य्योर्गतयोरङ्गनस्थितः । स्वर्गीयः स इदं वाक्यं पुण्यसान्त्वदमब्रवीत् ॥
२५॥ दूत उवाच ॥ मा भैष्ट यूयं नश्वरेत्ययेषूर्यः शूलविद्धो हि तमेव यत्नात् । अन्विच्छथेत्थं
खलु वेद्मि किंतु न संस्थितः सोऽत्र समुत्थितस्तु ॥२६॥ अहो यदात्मोयमृतिस्थलादप्युत्थान १६६
वाक्यं तदतीवपूर्णं । यत्रार्पितोऽद्यावधि खल्वशेत प्रभुः स्थलं पश्यत हीनशङ्काः ॥२७॥ गत्वा
शु शिष्यांस्तु युवां प्रवक्तं विशेषतः प्रस्तरमुत्थितः सः । मृत्योर्गलीलां पुरतो व एष्यंस्तत्रेक्ष्य
इत्युक्तमहो मया वां ॥२८॥ गुरूरुवाच ॥ एवं श्रुत्वाङ्गनादाशु निर्गम्य द्वे पलायिते । स्त्रियौ
भीतियुतानन्दशक्त्याकम्पितवर्ष्मणो ॥२९॥ त्रासहेतोश्च शिष्येभ्योऽप्यागच्छन्त्यः सूतौ तदा ।

दातुं नाशक्नुतां धन्यवार्त्तां दूतसमोरितां ॥३०॥ शिष्य उवाच ॥ किं ते तत्र समागच्छन्
मग्दलीयमरीयया । व्यादत्तं गह्वरस्यार्य्यांगधर्त्तुर्ज्ञापिता मुखं ॥३१॥ गुरुरुवाच ॥ एवं प्र
स्तरयोहन्नी ज्ञापितौ तनया प्रभुं । हत्वा ते गह्वरान्न्यासन् क्वेति वेद्मि न खल्वहं ॥३२॥
इत्थं नार्य्योदितं साध्व्या श्रुत्वा तौ गह्वरं प्रति । पुरतोऽद्रवतां सद्योऽद्भुतकर्म्मविवित्सया ॥
३३॥ योहन्निः प्रस्तरात्तत्र द्रवंस्त्वाशुतरं ततः । तमतीत्य द्वयोराद्यः सगह्वर उपस्थितः ॥ १६७
३४॥ न दृष्ट्वा चापि तत्स्थानात्पालयन्त्यौ स्त्रियावमू । सोऽङ्गनेऽभ्येत्य कुंचित्वात्माङ्गं व्यैक्षत
गह्वरे ॥३५॥ केवलान् प्रच्छदांस्तत्र स्थितान् दृष्ट्वा तु यत्नतः । नाविशत् किंतु तत्पश्चात्
प्रस्तरस्तह्युपस्थितः ॥३६॥ तन्निर्भयतरो द्रुत्वा गह्वरान्तरपि स्वयं । प्राविशन्न च तत्संस्थं
प्राप्नोदार्य्यप्रभोर्वपुः ॥३७॥ किंतु तत्परिनद्धान् प्राक् सागुरून् प्रच्छदान् स्थितान् ।

नरपृथकस्थां च तन्मूर्द्धबद्धां प्राग् गात्रमार्ज्जनीं ॥३८॥ सीमोनो विस्मितोऽपश्यत्तत्राथापि प्रभोः
प्रियः । योऽहन्निर्गह्वरे विष्टा सर्व्वमेतन्निरैक्षत ॥३९॥ अतस्तद्धृदि विश्वासो जातो
मृत्यूत्थितेः प्रभोः । सद्ग्रन्थोक्तीस्त्ववबुध्येतां न तौ तद्विषयास्तदा ॥४०॥ मरीया मग्दलीया
तु तावनुद्गतवत्यपि । यथाशक्त्याशु नगरात् तत्र पश्चादुपस्थिता ॥४१॥ गतयोश्च तयो
र्भूयो गृहे सा गोपुरान्तिके । अतिष्ठद्रुदती शङ्काव्याप्ता गह्वरतो वहिः ॥४२॥ नतांगी १६७
त्वन्तरेऽपश्यदासीनौ सड्पुःस्थले । दूतौ शुक्लाम्बरावेकं मूर्द्ध्नोऽन्यं च पदोः स्थले ॥४३॥ तौ तु
यत्र पुरा देहः प्रभोस्तत्र स्थितौ किल । स्वर्गदूतौ तदाब्रूतां नारि रोदिषि किंकृते ॥
४४॥ इत्युक्ता साब्रवीद् यस्मादहरन्नेव मत्प्रभुं । कुत्र न्यास्यंश्च तमिति नूनं न ज्ञायते
मया ॥४५॥ एवमुक्त्वा सितांशुभ्यां ताभ्यां भूत्वा पराङ्मुखी । वहिर्दण्डायमानं सा श्रीयेषू

मपि पश्यति ॥४६॥ स तया त्वनभिज्ञातोऽवदत् त्वं नारि किंकृते । तथा रोदिषि कं वात्रा
न्विच्छसि व्याकुला न्विति ॥४७॥ सा तु स्वीयमनोभ्रान्त्या तमुद्यानाधिरक्षकं । तत्क्षणेऽनुभव
न्त्येतत्प्रष्टारमवदद्वचः ॥४८॥ मग्दलीयमरीयोवाच ॥ हे महाशय चेत्तं त्वमेतद्गह्वरतोऽग्रहीः।
क्वन्यास्य इति मां ब्रूहि स मया चापनीयतां ॥४९॥ गुरुरुवाच ॥ ततस्तां श्रीप्रभुः सद्यो मरीय
इति चख्यिवान् । अतिष्ठत् तं त्वितः सैवाभ्यजानाद्विस्मयावृता ॥५०॥ आचार्य्येति च सं १६९
वद्य तस्याप्यालिङ्गितुं पदौ । उद्यताभ्यनमत्किंतु तां तदोवाच जीवराट् ॥५१॥ श्रीयेषू
खृष्ट उवाच ॥ मां मा गृहाण नहि खल्वधुनाहमूर्द्ध्वमारूढ आत्मपितरं प्रति किंतु मे त्वं ।
भ्रातॄन् प्रगत्य वद मे पितरं नु वश्चारोहाम्यहं मम तथैव च वोऽपि वेशं ॥५२॥ गुरुरुवाच ॥
एवं मृतिस्थलत उत्थित ईशपुत्र आद्यां स्वदृष्टिमददात्तदुदारनार्य्यै । तस्याः पुरा हि विनि

रस्य स सप्तभूतान् धन्योचकार परमेण तदा वरेण ॥५३॥ सद्धर्षविप्लुतमना अथ मग्दलीया स्रोद्यानतस्त्वरितमद्रवदेशवार्त्तां । जीवत्परप्रभुसमीक्षणकां समस्ततच्छिष्यसंमुख उदीरयितुं समन्तात् ॥५४॥ आद्ये त्वन्यां मरीयां सा सलोमीं च सखीद्वयं । पुनः प्राप्यातिधन्यं तत्सद्मासनमवेदयत् ॥५५॥ स्त्रियौ ते हि यथाप्रोक्तं पुरोद्यानात्पलायिते । गुहान्यादातृदूतोक्त्या भीयुतानन्दकम्पिते ॥५६॥ तद्धन्यत्वस्मरेणाथ परे निर्भयतां गते । सखीमस्मरतां स्वीयां गह्वरेऽपेक्षितां पुरा ॥५७॥ तां तु तत्र पुनर्यातां तदा ज्ञात्वा हिते अमू । गोपुरोद्यानयोर्मध्ये व्यलम्बेतां तदाप्तये ॥५८॥ द्रवन्तीं वीक्ष्य चोद्यानात् तामज्ञापयतां मुदा । दूतोक्तिं प्रापतुस्त्वस्याः श्रेयो दृष्टप्रभोर्वचः ॥५९॥ अतिहर्षात्तु तत्सर्व्ववार्त्तां दातुं सखीत्रये । शिष्येभ्यो गच्छति पुरमहो तत्संमुखे स्थितः ॥६०॥ प्रभुरार्य्योऽथ चोवाच शुभं युष्मभ्य

मस्त्विति । प्रणतास्तास्तु तस्याङ्घ्री गृहीत्वार्च्चन्त विस्मिताः ॥६१॥ श्रीयेषूरुवाच ॥
मा भैष्ट यूयमधुना त्वधिगम्य सद्यो भ्रातॄन् ममादिशत यत्नत एतदेव । गालील्यदेशमधियान्तु
यिरूषलेमात् ते तत्र मामपि दृढं च समीक्षितारः ॥६२॥ गुरुरुवाच ॥ तथा भाति प्रभौ नारीः
प्रति तासु यतीषु च । तत्सुवार्त्ताप्रदत्त्यर्थं शृणु यन्नगरेऽप्यभूत् ॥६३॥ गुल्मसैन्या यथाप्रोक्तं
रौम्या गह्वररक्षिणः । तद्यादात्रीशदूताद् भीकम्पिता मृतवत्कृताः ॥६४॥ पुरे पलायितास्ता १७१
वत्कथामग्र्ययाजकान् । ज्ञापयामासुरुद्याने भूतानां विस्तरात्तथा ॥६५॥ सैन्या ऊचुः ॥
भीमो विद्युद्वदास्यो नः शुभ्रो देवोऽर्ज्जुनांशुकः । प्राक् सूर्य्योदयतोऽकस्माद्बभौ गह्वरसंनिधौ ॥
६६॥ तन्मुखाच्च भवन्मुद्राङ्कितवड्डोपलं स वै । विचाल्यातिबलेनास्मांस्ततो व्यद्रावयत्
क्षणे ॥६७॥ रौम्यसैन्या वयं मृत्युदण्डं रक्षाविवर्जिनं । विद्म किंतु सुरान् मर्त्याः प्रति

रोद्धुं क्षमाः कथं ॥६८॥ गुरुरुवाच ॥ इत्यद्भुतवचः श्रुत्वा स्थातुमादिश्य तान् पृथक् ।
सैन्यांस्ते दुर्हृदोऽतः किं कार्य्यमित्यत्यचिन्तयन् ॥६९॥ गह्वरान्तःशवाभावं निश्चित्य च
परामृशन् । सैन्यानभिशपेयुः किं पीलातं प्रति किं न वा ॥७०॥ तत्कथानृततां ते तु सं
स्थापयितुमक्षमाः । इच्छवोऽप्यृतसापत्न्या लोभेर्षाभ्रान्तमानसाः ॥७१॥ तद्विश्वासं निरा
कर्त्तुमध्यक्षस्य गणस्य च । शेषे खल्वाह्वयन् सैन्यांस्तत्तूष्णींकृतये तथा ॥७२॥ प्रधानय १७२
ह्वया ऊचुः ॥ हे भद्रा दोषरहिता रक्षकाः स्थात एव वः । बहुरूप्यं ददामोऽपि कुर्य्यताज्ञा
न एव चेत् ॥७३॥ एतद्भूत निशामध्ये स्वपत्स्वस्मासु गह्वरे । येषूशिष्या उपेत्याहो शवं
तस्याहरन्निति ॥७४॥ मा भैष्ट मृतिदण्डात्तु सुप्तानां किल रक्षिणां । चेच्छ्रूयेतैतदध्यक्ष
पीलातेन हि वो वचः ॥७५॥ मृदुवाक्यैस्तदा युष्मद्रक्षात्यत्यर्द्दिता वयं । तं संतोष्य विना

शङ्कामदण्ड्यान् स्थापयेम वः ॥७६॥ गुरुरुवाच ॥ इत्यादिष्टा अमी रौम्याः सैन्यास्तद्रूप्य
लिप्सया । अङ्गीचक्रुरिदं वक्तुं तथा चाभूज्जनश्रुतिः ॥७७॥ तद्यथार्थकथया शिष्य श्रेष्ठय
ज्वादयः शठाः । रोद्धुमैहन्त सत्योक्तिं ख्रिष्टशिष्योदितां परे ॥७८॥ चेच्छक्याप्यभवत् सा
हि गालील्यैः क्षुद्रशक्तिभिः । अल्पैरौम्ययहूदीयदृढरक्षणतो हृतिः ॥७९॥ चेच्छक्योऽप्य
भवत्सैन्यैः स्वीयमृत्यर्हदुष्कृतेः । स्वयं स्वीकार एवैष सर्वपूर्वासिगोचरे ॥८०॥ तदापि १७३
कथमेतस्य निश्चयं प्राप्य तेऽरयः । अतिक्रुद्धा अपि न वै चक्रिरेऽन्वेषणं दृढं ॥८१॥
कथं नाल्पानमून् क्षुद्रान् ख्रिष्टोत्थापनवादिनः । सत्पुरेऽप्यभयांस्तेषु समगृह्णन्नहःस्वपि ॥८२॥
रक्षिणोऽध्यक्षदत्तांश्च किमर्थं कुसुमुप्सया । निराकृतस्वमुद्रादिफलकानभ्ययोजयन् ॥८३॥
चेन्नसत्या कथैषासीत् ख्रिष्टोत्थानमृषावचः । रोद्धुमेव प्रधानैस्तैः कल्पिता व्यूहगोचरे ॥८४॥

तदा कथमिदं मिथ्यावचोऽप्यत्यन्तलक्ष्मणा । निराचक्रुः शवस्यात्मवशसंस्थस्य दर्शनात् ॥
८५॥ पूर्व्वेशव्यापि वाक्यं तु तत्पंचाशदहेऽपि ते । सर्व्वदिग्गित्परे चापि भूतं संरोद्धुमक्षमाः ॥
८६॥ शिष्य उवाच ॥ प्रभूत्थानस्य सत्यत्वप्रमाणेन जितोऽस्म्यहं । विस्मितोऽपि प्रधा
नानां मिथ्योक्त्याज्ञतयापि च ॥८७॥ किंत्वस्मिन् धन्यसूर्य्याहे याभूत्खृष्टार्च्चिनामपि । स्त्री
र्विनाज्ञहृदां शङ्काहृतिः कथय मे गुरो ॥८८॥ गुरुरुवाच ॥ हैरोद्यसचिवस्यैव खूजस्यौकसि १७४
संचिताः । तद्वन्योषसि योहन्नाद्याः स्त्रियः खृष्टसेविकाः ॥८९॥ यथोक्तं ना हि विश्रामात्प्राक्
परश्वो गलीलकाः । सुगन्धीनि पुरे क्रीत्वा सन्मोक्त्रङ्गानुलिप्तये ॥९०॥ सूर्य्याहोषसि तद्गेहे
सकलानि समानयन् । ततो नेतुं सकृत्सर्व्वा गह्वरे न्यस्तसत्तनौ ॥९१॥ ततो येष्वनुगाः सर्व्वाः
सन्मरोयात्रयं विना । ससलोमि ययुः प्रातः सुक्रियां कर्त्तुमेव तां ॥९२॥ हैरोद्यसद्मतश्चापि

येनाग्रे प्राचरत् पथा । कपालाद्रौ प्रभुस्तेन ययुस्तद्गह्वरं प्रति ॥९३॥ ताभिः सार्द्धं तथा
चान्याः स्त्रियो यैरूषलेभकाः । येषूविश्वासिका जग्मुस्तत्सद्देहादराय हि ॥९४॥ तामहूस्व
सृतिं तास्तु पुरभित्तिवहिःस्थितां । प्रचल्य तावतां शेषे योसेफोपवनं ययुः ॥९५॥ यदा
तूपस्थितास्तत्र तत्प्रागल्पतमं द्रुता । मरीया मग्दलीयापि दृष्ट्वा दूतान्वितप्रभुं ॥९६॥
तदन्तिकतमे सा तु यथोक्तं गोपुरे द्रुता । गूथारव्ये नैक्षतान्याध्वागच्छदालीमहागणं ॥९७॥ १७५
तास्तु गह्वरमभ्येत्योपलहीनमुखं तदा । आप्त्वा तदन्तरे ऽत्रासाः प्राविशन् ससुगन्धिकाः ॥
९८॥ न तदा तु प्रभोर्देहमवलेप्यमवाप्य ताः । महाशङ्कां ययुः के तं पुरा विष्ठाहर
न्निति ॥९९॥ किन्त्वेतद्विषये ऽन्योन्यं विवदत्स्त्रीगणान्तिके । भास्वद्वस्त्रावहो स्वर्गदूतौ
द्वौ समुपस्थितौ ॥१००॥ अतिभीत्या तदग्रे च प्रणतास्वखिलास्वपि । सन्नारीषूचतु

वाक्यमिदं सत्सान्त्वनप्रदं ॥१०१॥ दूतावूचतुः ॥ मृतेषु यूयं कथमेव यत्नाज्जीवन्तमन्वि
च्छथ मुक्तिनाथं । न संस्थितः सोऽत्र समुत्थितस्तु किं न स्मृतं यच्छ्रुतमेव पूर्वं ॥१०२॥ नरा
त्मजः पापकृतां नराणां न्यास्योऽस्ति हस्तेष्वथ शूलवेध्यः । तृतीय उत्थास्यति स त्वतोऽह्नी
त्युक्तं गलीलाभुवि तेन युष्मान् ॥१०३॥ गुरुरुवाच ॥ इत्युक्ता अस्मरन्नार्य्यो गालील्यास्तां
प्रभोर्गिरं । तत्पूर्तिं च तृतीयाहेऽस्मिन् भूतां व्यश्वसन्मुदा ॥१०४॥ ततो गह्वरतो भूयः पुरे १७६
गत्वा यदीक्षितं । श्रुतं चैकादश श्रेष्ठशिष्यानज्ञापयन्त तत् ॥१०५॥ योहन्नाद्याभिरुक्तास्तु
पूर्बसत्स्त्रीत्रयेण च । तद्वाचरस्थितस्वर्गदूतवाचोऽतिसान्त्वदाः ॥१०६॥ मग्दलीयादिभि
श्चापि तिसृभिस्ताभिरीरिता । पुनर्जीवत्प्रभोर्दृष्टिस्तत्सत्सान्त्वनवादिनः ॥१०७॥ न तदैका
दशादीनां प्रभोर्विलपतां वधं । अपहर्तुं क्षमा शङ्कां पूर्बाधिस्तब्धचेतसां ॥१०८॥ उन्मत्ता

स्वाश्रया भूताः स्त्रिय इत्युपलभ्य ते । कथाः प्रहेलिका जग्मुर्विस्मृतार्य्यप्रभूक्तयः ॥१०९॥
शवाभावमपि ज्ञात्वा तद्द्वयं न समीक्ष्य तु । सत्प्रभुं स्वर्गदूतान् वा शङ्कां तद्विषये ययौ ॥११०॥
प्रस्तरोऽतः समुत्थाय तत्परीक्षाकृते पुनः । गह्वरेऽद्रवदात्माङ्गं कुब्जित्वा च निरैक्षत ॥१११॥
प्रच्छदानेव तु प्राग्वत् पृथक्स्थान् वीक्ष्य निर्गतः । विस्मितः किं प्रभोर्देहो बभूवेत्यज्ञमानसः ॥
११२॥ किं मोसेर्देह इव स दूतैरह्रियत स्थले । मनुष्यानीक्षितेऽन्यास्यः किं वा प्राह्रियता १७७
रिभिः ॥११३॥ ख्रीष्टीयानां प्रहर्षानवरतजनको धन्य एषोऽर्कवारस्त्राणाभिख्यस्तदैवादिम
वरसमये पीडनाच्छादितोऽभूत् । शिष्याणां ह्रुतमानामपि हृदि निजराट्प्रोदितोत्थानवाक्या
विश्वासोर्म्मिप्रमग्ने स्फुटतममपि तत्प्राप्न आर्य्याबलौघे ॥ ११४ ॥ इति श्रीख्रीष्टसंगीतायां
मोक्षमाहात्म्यपर्व्वणि (मत्थायस्याष्टाविंशसर्गान्मार्कस्य षोडशसर्गाल्लूकस्य चतुर्विंशसर्गाद्योह

न्नेर्विंशसर्गोदन्यप्रेरितवचोभ्यश्चोद्धृतो) महात्राणरविवारपूर्वचरित्रसूचकस्तमोबलपराजयो
नाम पंचदशोऽध्यायः ॥

शिष्य उवाच ॥ कथं साङ्कुतशङ्का तु प्राप्तसद्वचसामपि । दिग्गुतॄणां च तेनापि पश्चादुन्मू
लिताभवत् ॥१॥ गुरुरुवाच ॥ तद्दिनेऽपि प्रभुः श्रेष्ठशिष्यसंसदि वै बभौ । यथा वक्ष्येऽखिले
भ्यस्तु पूर्वं प्रस्तरगोचरे ॥२॥ प्राक् तस्मादपि सन्मोक्तुः सीमोनाग्राधिभासनात् । यदा तत् १७८
केवलं ज्ञातं यदुक्तं विस्तरान्मया ॥३॥ तदा प्राचलतां शिष्यौ खृष्टस्य द्वौ महापुरात् ।
अम्मावं प्रति पादोनचतुःक्रोशान्तरे स्थितं ॥४॥ अल्पायस्तु तयोरेको मरीयायाः पतिः
किल । एकस्या मङ्गलस्त्रीणां जीवत्खृष्टदृशां तदा ॥५॥ तत्सर्वविषये त्वेव तयोः सं
वदतोः सृतौ । शङ्कामग्नहृदोर्वार्तां स्त्रीणां विचरतोर्भृशं ॥६॥ अहो कश्चित्पथो मध्ये ताभ्यां

सह चलन् बभौ । तदभिज्ञानतो रुद्धनेत्राभ्यामथ सोऽब्रवीत् ॥७॥ अनभिज्ञात उवाच ॥
कीदृशा युवयोरेताः संवादा व्रजतोस्तथा । मार्गे कुतूहलव्याप्तमनसोर्वै परस्परं ॥८॥
अल्फाय उवाच ॥ त्वमुदासीनमात्रोऽपि मध्ये यैरूषलेमिनां । किं न जानासि यत्तत्र भूतमेते
ष्वहःस्वपि ॥९॥ अनभिज्ञात उवाच ॥ एतद् यिरूषलेमे यद्भूतमल्पदिनान्तरे । किम
स्तीत्यधुना मह्यं कथयैतद्दिवित्सवे ॥१०॥ अल्फाय उवाच ॥ नशरेतीययेष्वस्तत्कर्म्म वाक्षु १७९
क्रियासु च । शक्तस्येशप्रवक्तुर्वै विभोः साक्षाद्गणस्य च ॥११॥ प्रधाना नस्तु सश्रेष्ठयाजका
मृत्युनैव तं । दण्ड्यं विचार्य्य शूलेऽपि परश्वोऽव्याधयन्निह ॥१२॥ इस्रयेलविमोक्ता तु स
भावीति वयं पुरा । प्रत्यैक्षाम तृतीयस्तु ततोऽयं दिवसोऽस्त्यपि ॥१३॥ स्त्रियस्त्वस्मद्गणे
काश्चित्तच्छवन्यासगह्वरे । अद्योषसि प्रचल्यास्मान् परे व्यस्मापयन् दृढं ॥१४॥ तद्देहं च न

तत्राप्त्वा गता ङ्चुश्च वीक्षितः । स्वर्दूतानां गणो येषूजीवतावादिनामिति ॥१५॥ अतः केऽपि नरा अस्मद्गणे प्रस्थाय गह्वरं । देहहीनं यथा ह्युक्तं प्रापुर्न ददृशुस्तु तं ॥१६॥ गुरुरुवाच ॥ एतत्कथयति स्पष्टमल्फाये ससखे तदा । अकस्मादिदमभ्यूचे पान्थोऽसौ पृष्टवान् पुरा ॥१७॥ अनभिज्ञात उवाच ॥ हे अबोधाः समस्तानां भव्यवाचकसद्गिरां । विश्वासायाहिताः सम्यक् स्तोकगामिहृदोऽपि च ॥१८॥ किं न सर्व्वमिदं ख्रृष्टः सोढुमार्हन्ततोऽपि च । प्रवेष्टुं गौरवे स्वीये युष्मत्सर्व्वप्रतीक्षिते ॥१९॥ गुरुरुवाच ॥ इत्युक्त्वा सोऽनभिज्ञातो मोसेरारभ्य शास्त्रतः । सर्व्वानीशप्रवक्तॄंश्चाधिगम्यातोऽप्यनुक्रमात् ॥२०॥ यद्यत् तत्रस्थितं ख्रृष्टविषयं भव्यसद्वचः । दाविदाद्युदितं तत्तद्व्याचख्येऽतिस्फुटं खलु ॥२१॥ एतद्विस्तीर्णवाङ्मध्ये त्रयस्तेऽम्माव्युपस्थिताः । शीघ्रं यत्रेव संस्थातुं ससखोऽल्फाय ऐहत ॥२२॥ अज्ञातः स

त्वतिक्रान्तिसंकल्पं समदर्शयत् । किंतु ताभ्यां दृढं तत्र स्थातुं संप्रार्थितस्तथा ॥२३॥
अल्फायाद्यावूचतुः ॥ आवाभ्यां सह हे मित्र विभुशास्त्रज्ञ तिष्ठ नु । अन्तिके ह्यधुना सायं दिनं
प्रायोगतं च नः ॥२४॥ गुरुरुवाच ॥ एवं संप्रार्थितस्ताभ्यां सह शालां किलाविशत् । समासी
नश्च तत्रापि भोक्तुं तद्वितभोजनं ॥२५॥ ततः सो ऽन्नं स्वहस्ताभ्यां गृहीत्वा च विभज्य च ।
आशीर्वाद्य च धन्योक्त्या परे संव्यदधात्तयोः ॥२६॥ तत्क्रियातस्तु तौ सद्यः प्रभुर्येषूः स इत्यहो । १८१
निःशङ्कमभ्यजानीतां स त्विती ऽन्तर्हितो ऽभवत् ॥२७॥ व्यादत्ताक्षौ ततस्तौ तु जीवत्प्रभुसमीक्ष
णात् । विस्मयानन्दसंव्याप्तौ समवक्तां परस्परं ॥२८॥ अल्फायाद्यावूचतुः॥ किं न स्वर्गाग्निने
वासीद्दह्यमानं हृदावयोः । यदावां पथि सो ऽभ्यूचे ग्रन्थान् व्याख्यान् सतः स्फुटं ॥२९॥ कथं
तं नाभ्यजानाव तदा किंत्वधुनेह न । तिष्ठावाशु तु सद्वार्तादत्यै याव पुरं पुनः ॥३०॥

इत्युक्त्वा सद्य एवोभौ पथि यैरूषलेमके । प्रस्थाय द्रुतमभ्येतां श्रेष्ठशिष्यसभां प्रति ॥३१॥
तत्रैकादश तानेकं विना प्राप्य सहापि च । तैरन्यात् ससखस्तातो ऽल्पयाकोबयहूदयोः ॥३२॥
अल्फायः प्रथमं तेभ्य इदं समशृणोद्वचः । समुत्तस्थौ प्रभुः सत्यं सीमोन्नाय बभाविति ॥३३॥
तदा तावपि यद्वृत्तं मार्गे ऽकथयतां ततः । अप्माव्यन्नविभक्त्यापि तत्प्रादुर्भवनं प्रभोः ॥३४॥
यदाकथयतां त्वेतत् सर्वाग्रे ऽक्रीस्ततः परे । गृहद्वारेषु बद्धेषु भीत्या दुर्द्दयहृद्दिनां ॥३५॥ १८२
अहो तेषां सभामध्ये ऽकस्माद्येषूः प्रभुः स्वयं । दृष्टो दण्डायमानो ऽथ सन्धिर्वो ऽस्त्वित्यमब्र
वीत् ॥३६॥ अतिमुग्धास्तु ते दृष्टो भूत इत्युपलब्धितः । त्रासव्याप्तास्ततो ऽभ्युक्ता इदं तेन
दयालुना ॥३७॥ श्रीयषूखृष्ट उवाच॥ क्षुब्धाः किमर्थमधुना स्थ कथं च हृत्सूत्तस्थौ नु वो विफल
चिन्तनवृन्दमेवं । अङ्घ्री करौ च मम पश्यत संस्पृशन्तो भूतो ऽस्ति नास्थिपलवान् हि यथेक्षितो

ऽहं ॥३८॥ गुरुरुवाच ॥ जीवन्नाथ इदं प्रोच्य करौ साङ्घ्री अदर्शयत् । सकक्षौ पूर्वविद्धत्वपंचे
र्म्माङ्कोपलक्षितौ ॥३९॥ तदापि तु यदानन्दात् ते नहि व्यश्वसन् खलु । विस्मयाप्तास्तदा
तान् सोऽपृच्छत् किं वोऽन्नमस्ति नु ॥४०॥ इत्यादिष्टा ददुस्तस्मै खण्डमुष्णझषस्य ते । तथा
मधुक्रमस्यापि स चादत्सर्वगोचरे ॥४१॥ शिष्येषु त्वतिहृष्टेषु जीवत्प्रभुसमीक्षणात् । भूय
एतां सदुक्तिं स नित्यराज अवोचत ॥४२॥ श्रीयेषूखृष्ट उवाच ॥ सन्धिरस्तु नु युष्मभ्यं यथा १८३
मां प्रैरयत्पिता । तथा वोऽहमपोदानीं प्रेरयामि भुवि स्वयं ॥४३॥ गुरुरुवाच ॥ इत्युक्त्वा
न्यश्वसत्तेषु जीवन्नाथः पृथक् पृथक् । इदं शक्तिदवाक्यं च सकृदभ्यब्रवीदपि ॥४४॥ श्रीयेषू
खृष्ट उवाच ॥ आत्मानमप्यवलभध्वमिहैव सन्तं मद्भक्तो हि परमार्थिकशक्तियोनिं ।
पापानि मोचयथ यस्य तदर्थमेवं मुक्तिर्भवेद् धरत यस्य धृतिस्तु तस्मै ॥४५॥ गुरुरुवाच ॥

एवं शीयोनसंज्ञे विभुविहितनृपः पुत्र आर्य्यः सदद्रौ तस्मिन् वारे प्रजातो विजितमृतिबलो विष्टशाश्वत्समायुः । स्वीयां शक्तिं विधातुं सकलनृपजितं पापमोक्षीमिहैकामारेभे स्वीय वृन्देऽतिसरलमनसां प्रस्तरादोरितानां ॥४६॥ इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (मार्कलूकयोश्चरमसर्गाभ्यां योहन्नेर्विंशसर्गात् पौलस्य कुरिन्थ्यान् प्रति प्रथमलिपेः पंचदशसर्गाच्चोद्धृतो) महात्राणरविवारोत्तरचरित्रसूचको मृत्युंजयप्रदर्शनं नाम षोडशोऽध्यायः ॥ १८४

शिष्य उवाच ॥ एतैर्धन्याहकार्य्यैः किं न शङ्कापहृताखिला । सन्मोक्तुरुत्थानविषया शिष्याणां चित्ततो ध्रुवं ॥१॥ गुरुरुवाच ॥ अल्पायः ससखः पश्चादन्यांस्तत्प्रभुदर्शनं । ज्ञापयन्नप्यविश्वासान् प्राप स्तब्धहृदोऽपि च ॥२॥ तथा येऽपि सभायां चाग्र्यशिष्याणां स्थिता यदा । रवौ सायं प्रभुः स्वाङ्गं सव्रणं समदर्शयत् ॥३॥ तेऽवशिष्टानविश्वासांस्तत्कर्म्म

विषये बहून् । स्वगणस्यापि चैकं यो न तदा तैः सहाभवत् ॥४॥ थोमाः स दिदुमाख्यो हि
दशशेषेभ्य एव तत् । श्रुत्वा भूतेक्षणं जानन् प्रत्युवाचाप्रतीतिकः ॥ ५ ॥ थोमा उवाच ॥
कीलाङ्कमीक्षेय न चेदहं तत्करद्वये ऽथाङ्गुलिमर्पयेयं । तत्राथ तस्यापि विभिन्नकक्षे करं नि
दध्यां न हि विश्वसेयं ॥६॥ गुरुरुवाच ॥ इत्यूचे स न भूयस्तु धन्यसप्तदिनान्तरे । महा
त्राणाभिधे स्वृष्ट आत्मानं स्वानदर्शयत् ॥७॥ गते तस्मिंस्तु सूर्य्याहो यदा भूयो ऽध्यभासत । १८५
सन्मोक्तुत्थानतो धन्यो वत्सरे तावति स्थितः ॥८॥ तदा यः श्रेष्ठसूर्य्याहे प्रस्तरेण कृतां पुरा ।
त्रिरात्मास्वीकृतिं पूर्व्वाधिभासेनापि चक्षमे ॥९॥ सर्व्वेषां यो ऽपि मत्संसत्स्थितानां प्राक्
पलायनं । आत्मतो ऽतिव्यथारात्रौ तदाक्षाम्यत भद्रवाक् ॥१०॥ स थोमामधुना स्वीयप्रेम
भागिनमेव तं । शङ्काव्याप्तमपि क्षान्त्या दृढश्रद्धीचकार ह ॥११॥ न तद्द्वादशवृन्दाद्धि विभु

पुन्नावृताङ्गवि । विनापचयपुत्रं को ऽप्यपचिचे कदाचन ॥१२॥ अतो भास्करवारे ऽस्मिं
स्त्राणीयानन्तरे यदा । सर्वे ऽप्येकादश श्रेष्ठशिष्या आसन्त संसदि ॥१३॥ तदा द्वारेषु बद्धेषु
पूर्ववत् सत्प्रभुर्विभो । तेषु दण्डायमानो ऽथ सन्धिर्वो ऽस्त्वित्यमब्रवोत् ॥१४॥ एवं सर्वान्
समभ्युच्य जितमृत्युर्विभोः सुतः । तदा थोमामिदं वाक्यमभ्यवादीद्विशेषतः ॥१५॥ श्रीयेषू
खृष्ट उवाच ॥ स्वीयामहो त्वमधुनाङ्गुलिमत्र नीत्वा स्पृष्ट्वा परीक्षय करौ मम कोलविद्धौ । १८६
कक्षे तथैव च मम त्वमहो करं स्वं न्यस्य प्रतीतिरहितो न भवेस्तु तस्मात् ॥१६॥ गुरुरुवाच ॥
एतद्द्वौ प्रमाणं स कोलविद्धकराङ्घ्रिकः । कक्षात्पातितवान् शल्यभिन्नाच्चासृगपो ऽपि च ।
स्वरहस्यप्रसादस्याङ्कं ततः स्रवतो ध्रुवं ॥१७॥ दयासिन्धोस्तु तस्मात्तां परीक्षां प्राप्तवां
स्तदा । थोमाः समवदद्धे मे प्रभो हे मे ऽपि चेश्वर ॥१८॥ इत्थं सत्प्रत्ययोक्तिं तु तस्य श्रुत्वे

श्वरात्मजः । सर्व्वप्रत्ययकर्त्तृणामिदं सान्त्ववचो ऽब्रवीत् ॥१९॥ श्रीयेषूखृष्ट उवाच ॥ यस्मा
द्ध्रुवं त्वमधुना समपश्य एव प्रत्यक्षमापिथ ततो मयि सत्प्रतीतिं । ये मानुषास्तु न समीक्ष्य
तदा प्रतीयुर्मां ते विशेषत इहैव भवन्ति धन्याः ॥२०॥ गुरुरुवाच ॥ तथा तदखिलानां सो
ऽविश्वासं हृत्कठोरतां । अप्यगर्हन्मृदूक्त्यैव तत्समीपस्थितः प्रभुः ॥२१॥ यतस्तं जीवितं पूर्व्वं
स्फुटं दृष्टवतीः सतीः । नारीर्न व्यश्वसन् शङ्काबद्धचित्ता अतीव ते ॥२२॥ ज्ञात्वा सर्व्वे त्विदा १८७
नीं विचलितहृदया मूढतामप्रतीत्याः स्वीयायाः पूर्व्विकायाः प्रभुमृतिविजयप्रत्ययं गाढमापुः ।
श्रेष्ठाः शिष्या इतश्चाप्यविरतमखिलेष्वेव वक्तुं समर्थीभूताः शब्दप्रमाणानुगसकलनृणां धन्यकर्त्रीं
सुवार्त्तां ॥२३॥ इति श्रीखृष्टसंगीतायां मोक्तृमाहात्म्यपर्व्वणि (मार्कस्य षोडशसर्गाद्योहन्नेर्विंश
सर्गाच्चोद्धृतो) महात्राणानन्तराष्टाहचरित्रसूचकः सत्प्रत्ययप्रशंसा नाम सप्तदशो ऽध्यायः ॥

गुरूरुवाच ॥ स्थिरविश्वासमापन्ना वरशिष्याः प्रभोस्तदा । गलीलायानविषयं तद्वचो
दृढमस्मरन् ॥१॥ तत्र तद्दृष्टये ह्येव यथा सत्त्रीत्रयश्रुतं । प्रभुणा विहितोऽद्रिस्तत्सभायां
काल एव च ॥२॥ तत्र चैकादश श्रेष्ठशिष्या बह्वितरैरपि । अन्विता विहिते घस्रे स्थिताः
पंचशताधिकैः ॥ ३ ॥ तत्सदद्रौ प्रभुः सर्वैस्तदार्य्यस्तैः समीक्षितः । भूरिभिश्चार्च्चितः सद्यो
ऽप्यभिज्ञाततदाननैः ॥४॥ केषुचिच्छङ्कमानेषु त्वनभिज्ञानहेतुतः । दूरात्पश्यत्सु सोऽभ्यर्णे १८
ऽभ्येत्यात्मानमदर्शयत् ॥५॥ स्वन्यस्तां चावदच्छक्तिं स्वर्भुवोरथ चोत्तमं । आदेशं श्रेष्ठशिष्ये
भ्यस्तत्प्रवक्तुं भुवि ध्रुवं ॥६॥ जीवत्खृष्टावभासानां सामान्यतम एष वै । बहुखृष्टीयवृन्दैश्च
सततं संस्मृतस्ततः ॥७॥ शिष्य उवाच ॥ दूरे यिरूषलेमात्किं प्रदेशेऽस्मिंश्चिरं स्थिताः ।
श्रेष्ठशिष्याः प्रभुः किं वा तत्र तेभ्यो बभौ पुनः ॥८॥ गुरूरुवाच ॥ कंचित्कालं गतास्तेषां

भूरयः स्वालयान्तिके । गालील्यस्य ह्रदस्यैव तैबर्य्याख्यस्य रोधसि ॥९॥ प्रस्तरो नथनै
लश्च कनाख्यनगरोत्थितः । नाम्ना बार्थुलुमायोऽपि थोमाश्च दिदुमाभिधः ॥१०॥ तथा याकोब
योहन्नी जिबिदीयसुतावुभौ । अन्यौ द्वौ सद्गणस्यापि स्थितास्तत्र समं क्वचित् ॥११॥
सीमोनः प्रस्तरोऽवादीज्जन्तुं यामि झषानिति । षडन्ये चाब्रुवन् याम त्वया सार्द्धं वयं
न्विति ॥१२॥ ततो नावं समारोहन् सद्यः स्थित्वा त्वपि ह्रदे । तावद्रात्रौ न मत्स्यांस्ते १८९
कांश्चिज्जन्तुमशक्नुन् ॥१३॥ उषसि त्वागतेऽतिष्ठन्नावभ्यर्णरोधसि । प्रभुस्तदनभिज्ञात
स्ततस्तानब्रवीद्वचः ॥१४॥ किं बाला वोऽन्तिकेऽस्त्यन्नमित्थं ते नेति चावदन् । सोऽथ
नौदक्षपार्श्वेऽस्त्वा जालं प्राप्स्यथ बह्विति ॥१५॥ तथैव जालमस्त्वा ते खल्वितो झष
भारतः । नाकर्ष्टुमपि सर्वे तेऽशक्नुवन् नौस्थिता नराः ॥१६॥ तामाश्चर्य्यक्रियां दृष्ट्वा स्वा

ह्वाने कृतया समं । योऽहन्निः प्रस्तरं प्रोचे प्रभुरेवास्त्यसाविति ॥१७॥ एतच्छ्रुत्वा प्रभु
प्रेष्ठशिष्यान्निश्चित्य च स्वयं । क्रियातो दृष्टितश्चापि सीमोनः प्रस्तरो हठात् ॥१८॥ परि
धायांशुकं वाह्यं हृदे ऽप्यात्मानमक्षिपत् । अधिगन्तुं प्रभुं तीरे शतहस्तद्वयान्तरे ॥१९॥
षट् ते नावि तु तिष्ठन्त आकर्षन्तश्च यत्नतः । मत्स्यपूर्णं तटे जालं शेषे तर्ह्यप्यवातरन् ॥
२०॥ तत्र प्रस्तुतमप्यापुरङ्गारज्वालितानलं । तदुपर्यर्पितान् मत्स्यान् गोधूम्यं पिष्टमेव १९०
च ॥२१॥ तान् प्रभुः स्माह वेदानीं धृतानानयतात्र वः । मीनानित्यथ सीमोनो जाल
मभ्येत्य तत्कृते ॥२२॥ पूर्णमाप्नोद्बृहन्मत्स्यैस्त्रिभिः सार्द्धशताधिकैः । न तु तद्गाढभारेण
विदीर्णं भग्नमेव वा ॥२३॥ ततः प्रभुरुवाचाहो भुंग्ध्वमित्थं न तेषु तु । को ऽपि कस्त्वमि
ति प्रष्टुं तदा तं साहसी स्थितः ॥२४॥ सादरैस्तैर्हि सर्व्वैः सो ऽभिज्ञातो ऽन्नं तदा करे ।

आदायाशास्य चैवाथो मीनांस्तेभ्यो व्यभञ्जत ॥२५॥ थोमै तृतीयवारे स प्रभुर्मृत्यूत्थित
स्तथा । बभौ तूर्य्यें तदन्येभ्यः प्रस्तराय तु पंचमे ॥२६॥ समाप्ते भोजने मोक्ता प्रस्तराय
वचोऽब्रवीत् । किं मां योनज सीमोन स्निह्यस्येभ्योऽधिकं न्विति ॥२७॥ अहं त्वां हे प्रभो
सत्यं स्निह्यामीति सुवेत्स्यपि । एवं प्रत्युक्त उवे स पुषाण मद्वीनिति ॥२८॥ पुनस्तूवाच
सीमोन किं मां स्निह्यसि योनज । इत्थं भूयश्च प्रत्युक्तस्त्वां स्निह्यामीति वेत्स्यपि । अथो १९१
वाचाविवत्सान्मे त्वं पुषाणेह खल्विति ॥२९॥ पुनस्तूवाच सीमोन मां किं स्निह्यसि योन
ज । इति त्रिरुदितत्वात्तु खिन्नहृत् प्रस्तरोऽभवत् ॥३०॥ प्रभो त्वं सर्ववित् स्निह्याम्यहं
त्वामिति वेत्स्यपि । एवं प्रत्युदितो मोक्ताभ्युवाचावीन् पुषाण मे ॥३१॥ सत्यमेतद्ब्रवीमि
त्वां यदासीस्त्वं युवा तदा । मेखलां परिधायाया यत्र यत्राभ्यकांक्षथाः ॥३२॥ किंतु वृद्धो

यदा स्यास्त्वं तदा विततहस्तकः । अन्येन किल नेतव्यो ऽसि यत्रापि न कांक्षसे ॥ ३३ ॥
इत्युवाचेङ्गमानः स कीदृङ्मृत्योपलाभिधः । श्रेष्ठशिष्यो ऽचिरात् पूर्व्वं त्रिरस्वीकृतवानपि ॥
३४॥ परे सन्मण्डलीमूलनिर्म्मातृचरितं शुभं । संपूर्य्य विभुमाहात्म्यं दर्शयेत्कूल एव सः ॥
३५॥ एवमुक्त्वा तु तं मोक्तान्विहि मामित्यमब्रवीत् । तथादिष्टस्तु सीमोनः परावर्त्य मुखं
हठात् ॥३६॥ अन्वायन्तं प्रभुप्रेष्ठं योहन्निं वीक्ष्य तत्क्षणे । प्रभुवक्षो ऽन्तिकासीनं चरमे १०२
पुण्यभोजने ॥३७॥ तं तथा दर्शयन् येषूमभ्युवाच ततस्त्वयं । किं कुर्य्याद्धे प्रभो न्वित्थ
मतः प्रत्युदितस्तथा ॥३८॥ श्रीयेषूख्रीष्ट उवाच ॥ मदागमनपर्य्यन्तमयं तिष्ठेदिति स्पृहा ।
चेन्मे स्यात् किं तवैतेन त्वमेवान्विहि मां खलु ॥ ३९ ॥ गुरुरुवाच ॥ शिष्येषु श्रुतवत्स्वे
तदितो वार्त्ता प्रकीर्त्तिता । न म्रियेत स योहन्निरित्याप्रभ्वागतिस्थिनः ॥४०॥ न प्रभूक्तं

तु तत् किंतु मदागत्यन्तमेव सः । तिष्ठेदिति स्पृहा मे चेत्किमेतेन तवेत्यलं ॥४१॥
जिबिदीयसुतः शान्तोऽयमेतदलिखत्परे । याकोबाद्यखिलश्रेष्ठशिष्याणां तं विना वधात् ॥
४२॥ अतिसत्यं च तस्यास्ति शेषाणां लेखिनां च वै । सतां साक्ष्यं प्रभोः सर्व्वसत्क्रियाविषयं
तथा ॥४३॥ बहुषु तदितरेषु प्राप्तनृत्वेशसूनोर्कृतमगणितसंख्येष्वार्य्यकार्य्येषु सत्सु । अलमय
मणुसारः केवलो नृप्रतीत्यै भुवि विलिखित आप्त्यै नित्यजीवस्य चास्मात् ॥४४॥ इति श्री १९३
खृष्टसंगीतायां मोक्तृमाहात्म्यपर्व्वणि (मत्थायस्याष्टाविंशसर्गाद्योहन्नेर्विंशैकविंशसर्गाभ्यां पौल
स्य कुरिन्थ्यान् प्रति प्रथमलिपेः पंचदशसर्गाच्चोद्धृत) स्त्राणीयसप्ताहानन्तरानेकदिनचरित्र
सूचको नित्यपालकावभासनं नामाष्टादशोऽध्यायः ॥
गुरुरुवाच ॥ भूयो यिरूषलेमे तु सर्व्वे मध्येऽव्ययपर्व्वणोः । संचिताः श्रेष्ठशिष्यास्ते विभु

मन्दिरसंनिधौ ॥१॥ पूर्व्वपर्व्वणि यद्वद्धि प्रत्नविम्बप्रपूर्त्तये । मिश्रनोऽप्यैत्त्रयेलीयात्त्राणाच्छ्रेयो
ऽभवन्नवं ॥२॥ यदा संपूर्णसत्याविनित्ययज्ञाग्र्यपालिना । त्राणनायकमोक्त्राब्धिस्तीर्णः शुष्क
पदा मृतेः ॥ ३ ॥ तद्वदेव द्वितीयेऽपि पंचाशत्संज्ञपर्व्वणि । पूरणीयस्तदादत्तशास्त्रविम्बः
सदर्च्चिषु ॥४॥ प्रदत्त्या न शिलापात्रलिखितस्य विधेः किल । सदात्मना तु हृत्स्वेवाग्नि
शक्त्योजोऽन्वितस्य वै ॥५॥ परे भव्यमदः किंतु तत्पंचाशद्दिनान्तरे । जितमृत्युर्यथा १९४
प्रोक्तं ख्रृष्टः स्वेषु बभौ मुहुः ॥६॥ न यथा मर्त्यजीवे प्राक् तन्मध्ये विचलन् सदा । क्वचित्त्वी
शालयाद्यद्वत्तैर्दृष्टोऽन्तर्हितोऽपि च ॥७॥ स्वमृत्यूत्थानतः पश्चाच्चत्वारिंशद्दिनान्तरे । एकदा
पृथगात्मानं याकोबायाप्यदर्शयत ॥८॥ बहुधा त्वग्र्यशिष्याणां तावद्वर्गे विशेषतः । चर
मायां नृसाक्षात्स्वभातौ सर्व्वसमाप्तये ॥९॥ शिष्य उवाच ॥ चरमा भातिराचार्य्य सा यस्या

हि परे प्रभुः । न कदापि बभौ भूमौ कीदृश्यासीत्कदा च नु ॥१०॥ गुरुरुवाच ॥ चत्वा
रिंशन्नमो घत्रत्राणाग्र्यार्कादिनावधिः । गणनेन मितो नूनं यो वृहस्पतिवासरः ॥११॥ स
धन्यः सर्व्वख्रृष्टीयैः संमतः खलु सर्व्वदा । प्रभ्वभावसमारम्भो ऽप्योजोवेशनहेतुतः ॥१२॥
तत्क्रिया अधुना शिष्य कथयिष्ये वरेषु हि । तेष्वेकादशशिष्येषु प्रभुस्तर्हि हठाद् बभौ ॥
१३॥ ते तूचुर्हे प्रभो राज्यमैस्रयेलेभ्य एव किं । त्वं पूर्व्वमिव भूयो ऽपीदानीं संस्थापयेरिति ॥ १९५
१४॥ इदं पृष्टो विभोः पुत्रः पारमार्थिकशक्तिदः । विजिताखिलनृत्राणशत्रुः प्रत्यब्रवीदिदं ॥
१५॥ श्रीयेषूख्रृष्ट उवाच ॥ कालान् विशिष्टसमयांश्च पिता वशे यान् स्वीये ररक्ष नहि वो
ऽस्तु तद्विवेकः । शक्तिं त्ववाप्स्यथ यदोपरि वः सदात्मागच्छेद्वरं यदधुनाप्यमहं ददे वः ॥
१६॥ युष्माभिरेव सह यद्मवदं स्थितो ऽहं स्मर्त्तव्यमेतदपि मद्विषयं हि सर्व्वं । मोसेर्विधौ

लिखितमप्यथ भव्यवाक्षु गीतेषु दाविद इहापि च पूरणीयं ॥१७॥ गुरुरुवाच ॥ अथ
तद्धीनिरोधान् सो ऽहरत्सद्ग्रन्थबुद्धये । भव्योक्तीश्च स्वविषया व्याख्यायेदं ततो ऽब्रवीत् ॥१८॥
श्रीयेषूख्रीष्ट उवाच ॥ एवं व्यलेख्यथ च ख्रीष्ट इदं प्रसोढुमुत्थातुमह्यपि मृतेश्च तृतीय आर्हत् ।
नाम्नास्य चाप्यखिलदिक्षु यिरूषलेमाद्भाष्यो ऽनुताप इत एव सपापमुक्तिः ॥१९॥ यूयं तु
तत्सकलसाक्षिण एव संस्था आदौ प्रतिश्रुतमहो तु व ईरयामि । दानं पितुर्वसत चेह १९६
यिरूषलेमे यावन्न शक्तिमुत तस्य लभेध्वमूर्द्ध्वात् ॥२०॥ गुरुरुवाच ॥ इत्युक्त्वा स वहिर्नीत्वा
श्रेष्ठवृक्षाद्रिवर्त्मनि । पुरादाबेथनीयं तानाशास्तोच्छ्रितहस्तकः ॥२१॥ श्रीयेषूख्रीष्ट उवाच ॥
शक्तिं यदाप्स्यथ सदात्मन आगतेर्वो यूयं तदा किल भवेत नु साक्षिणो मे । एतत्पुरे ऽखिल
यहूद्यकदेश एवं सामार्य्य एव च तथावसुधान्त्यसीमं ॥२२॥ गत्वातः सकलान्वयान् किल

पितुः सूनोः सतश्चात्मनो नाम्ना ह्येककरूपकेण सलिलैः संस्कारयन्तो दृढं । यूयं शिक्षयतेत
देशवचनं यो यः प्रतीत्याम्भसा स्नातः स्यात् स विमुक्तिमाप्स्यति वरं दण्ड्यो ऽखिलो ऽप्रत्ययः ॥
२३॥ सत्प्रत्येतृगणैः सहैष भविता विघ्नौघ ऐशात्मना दत्तो भूतगणांस्त एव नरतो ऽसिष्यन्ति
नाम्ना मम । नानानूतनभाषयापि च वचो ब्रूयुर्ग्रहोष्यन्त्यहीनक्षय्या विषपानतो ऽपि गदिनः
सुस्थीप्रकुर्य्युः करैः ॥२४॥ प्रत्येतृन् जलसंस्कृतांस्तु सकला युष्मभ्यमाज्ञा मया दत्ताः शिक्ष १९७
यत प्रकर्त्तुमनिशं सर्व्वत्र भूमण्डले । युष्माभिः सह शिक्षकैर्ह्यहमहो पित्रन्तिके गाम्यपि स्थेयो
ऽद्यावधि नूनमाखिलजगच्छेषं मदीयात्मना ॥२५॥ गुरुरुवाच ॥ इत्याशिषो ऽन्तर इह
स्थित ईशपुत्रः शिष्येषु तेषु स हठादुपरि प्रणीतः । मेघस्तदीक्षणत एव नभूर्द्ध्वलोके ऽप्याच्छा
दयत्समधिगामिनमुक्तिपूर्त्यै ॥२६॥ आदत्तनृत्व इत ईशसुतो ऽङ्गजीवे आरोहयत्सकल

दिग्भुवनोपरिष्टात् । दूताग्र्यदूतजगतीः क्रमशोऽपि सोऽतिक्रम्येतरैरनभिगम्यरुचौ वि
वेश ॥२७॥ तद्वद्धि तस्य पितरं ससहोदरस्यारोहन्तथेशमपि तस्य ससोदरस्य । तद्दक्षपार्श्व
उत तत्समगौरवौजा आसीन एक उभयात्मन एकतायां ॥२८॥ शिष्यास्तु विस्मयवृता
उपरीक्षमाणा अन्तर्हितत्वदिशि हीनधरेशसूनोः । द्वावर्जुनाम्बरनरौ ददृशुस्तदाहो स्वाग्रे
स्थितौ समुदिताश्च तथैव ताभ्यां ॥२९॥ दूतावूचतुः ॥ गालील्या नु किमर्थमूर्द्ध्वनयनाः स्तब्धा ११८
स्थकास्तिष्ठथ यो येषूर्द्दिवमेव युष्मदधुना नीतो हि वो गोचरे । आरोहन् स यथा समैक्ष्यत
दृढं स्वर्गं प्रतीहाधुना भूमौ स्वर्गत एवमप्यवतरन् युष्माभिरीक्ष्यः परे ॥३०॥ गुरुरुवाच ॥
इदं श्रुत्वा प्रबोधं तेऽवाप्य भूनिर्गतं प्रभुं । पुनश्चेह विचारायागामिनं न्यार्च्चयन्मुदा ॥३१॥
सञ्चर्षादरसंव्याप्तास्ततः श्रेष्ठद्रुपर्वतात् । सत्पुत्रारोहणेनार्य्यीकृताज्जग्मुः पुरे पुनः ॥३२॥

स्थित्वा यिरूषलेमे चाशन्तिदानं तदुक्तितः । तत्र सन्मन्दिरे नित्यं प्राशंसन्नीश्वरं स्तवैः ॥
३३॥ अन्तरे तु समस्तैतत्क्रियासाक्ष्याय ते वराः । शिष्या आत्मोयसंख्यायाः पूर्त्यै द्वा
दशसाक्षिणां ॥३४॥ दुर्निधातृयहूदस्येष्कार्य्योतेर्व्वरः पदे । सार्थना गुटिकापत्या मत्त
थीयाख्यधार्म्मिकं ॥३५॥ इतस्तेष्वचिरात्पूर्य्यं स्वर्ग्यशक्तिप्रतिश्रवं । सत्प्रभोः स्थिर
विश्वासाः प्रत्यैक्षन्त पुरे मुदा ॥३६॥ तद्वत्ते शिष्य सम्यग्विभुसुतसकलाश्चर्य्यवार्त्ता १९९
यथोक्ता तत्सच्छिष्यैः सदात्मग्रसितहृदयकैरादितोऽप्यातदन्तं । भूमीलोकेऽवतारः किल
परमगुणाचार एवाथ शूले मृत्युश्चोत्थानमेवाप्यमृतगणपदात्स्वर्गयात्रापि चोक्ता ॥३७॥
इति श्रीखृष्टसंगीतायां मोक्षमाहात्म्यपर्व्वणि (मत्थायमार्कलूकरचितसुसमाचाराणां चरम
सर्गेभ्यो लूकरचितप्रेरितक्रियाणां प्रथमसर्गात् पौलस्य कुरिन्थ्यान् प्रति प्रथमलिपेः

पंचदशसर्गात्रोद्धृतः) सपूर्वापरनवाहधन्यवृहस्पतिवारचरित्रसूचकः स्वर्गारोहणं नामोनविं
शोऽध्यायः ॥

शिष्य उवाच ॥ अवतीर्णेशपुत्रस्य ससज्जन्मचरित्रकं । माहात्म्यं सम्यगाचार्य्य त्वदुक्तं मे
ऽतिविस्तरात् ॥१॥ उर्द्धतस्तु महाशक्तिदानं तत् तत्प्रतिश्रुतं । तेन चापि कृतं भूमिविजयं
शूलवाहिना ॥२॥ तं यथा त्वच्छ्रुतं पूर्वं संक्षेपादपि सांप्रतं । सर्वाज्ञानापहृत्यर्थं श्रोतु २००
मिच्छामि ते मुखात् ॥३॥ गुरुरुवाच ॥ सप्तमो रविवारो यत्त्राणीयार्कदिनात्परे । आया
तदादिघस्त्राणां यः पंचाशतमः किल ॥४॥ स द्वितीयमहापर्ववासरोऽभूद्यहूदिषु । त
त्कृते संचितेष्वेव सर्वदिग्भ्योऽपि च क्षितेः ॥५॥ तदा च प्रभुसत्योक्तिपूर्त्तये वरशक्तिदः ।
सदात्मा पितृनिर्यातोऽवातरत्प्रस्तरादिषु ॥६॥ प्रचण्डानिलशब्दे हि श्रुते तेष्वेकशस्तदा ।

विभिन्नरसनाकारानले मूर्द्धोपरि स्थिते ॥ ७ ॥ सद्यः सदात्मसंव्याप्ता नानानूतनभाषया ।
सर्व्वेषां संमुखे ऽवोचंस्ते विभोरद्भुतक्रियाः ॥ ८ ॥ पारदानां तुरष्कानां तथा बाह्लीकवासिनां ।
नद्योर्द्वीपेस्थितानां च शकानां चेन्द्रदिश्यपि ॥ ९ ॥ कप्पदुक्यास्यपम्फुल्यभ्रुग्यानां चाप्युद
ग्दिशि । मैश्रकौरेण्यरोम्याणां चापि प्रत्यग्दिशि ध्रुवं ॥ १० ॥ आरबानां किरातानां
तथावाग्दिशि चैकशः । भाषयोचुस्ततद्देशोदासीननरगोचरे ॥ ११ ॥ तस्मादविद्यगालोल्य २०१
प्रवक्तृत्वात्तु ते ऽखिलाः । यहूद्याः समतालम्बिव्यूहा विस्मयविप्लुताः ॥ १२ ॥ ततस्तान् प्रस्तरः
सर्व्वान् सहोधीव्याप्तमानसः । वधं मृत्यूत्थितिं चापि सत्वृष्टस्यात्युपादिशत् ॥ १३ ॥ सदात्म
विजितास्ते च खिन्नात्मानः स्वराड्वधात् । मुक्त्यै तद्बुदसंस्कारं लेभिरे त्रिसहस्रकाः ॥ १४ ॥
तथा तत्पुण्यसूर्य्याहे त्राणीयमनु सत्तमे । दृढं निर्म्मातुमारब्धा खृष्टस्याजेयमण्डली ॥ १५ ॥

तद्दिनावधि नित्यं च वर्द्धमाना क्रमात्क्रमात् । प्रस्तराद्युपदेशेन सद्ग्रन्थप्रोदितं यथा ॥
१६॥ इस्रयेलराज उवाच ॥ समारूढ ऊर्द्ध्वं त्वमेवारिजेता प्रबद्धीचकर्थापि बद्धत्वमार्य्यः ।
नरेभ्यश्च दानान्ययच्छस्ततस्त्वद्रिपुभ्यो ऽपि तन्मध्य ईशो वसेच्च ॥१७॥ गुरुरुवाच ॥ समारूढ
स्तु यः को ऽस्ति सो ऽवतीर्णः पुरा किल । भूमौ गर्त्ते ऽप्यधोलोके ऽथारूढस्तत्परे दिवं ॥१८॥
ततो दशदिनात्पश्चान्नृभ्यो दानानि सो ऽददात् । स्वारिभ्यो ऽपि स्थितेभ्यः प्राक् स्वहन्तृ २०२
भ्यो ऽप्यवितितः ॥१९॥ अददात्प्रेरितास्तेभ्यः प्रवक्तॄंश्च सदात्मना । व्याप्तान् सुवार्त्तीप्रच
रान् पालकान् शिक्षिणो ऽपि च ॥२०॥ सर्व्वखृष्टाङ्गसंनज्ञै तस्यैकात्मतनौ किल । सन्मण्डल्यां
प्रसिद्ध्यै च तेषु सद्वाक्यकर्म्मणां ॥२१॥ सा सद्विश्वासिनां तद्वत् खृष्टाङ्गानां तु मण्डली ।
निर्म्मिता शासिता चापि प्रेरिताद्यग्र्यपालकैः ॥२२॥ प्रत्यहे ऽवर्द्धत प्रेमस्पृहाविश्वाससंयुता॥

भासिता शिक्षकानां च वाग्भिः साश्चर्य्यकर्म्मभिः ॥२३॥ कायफादिमहायज्वगणः शिक्षां

स्त्विमां मृषा । निरोद्धुं तर्जनैः कारादिदण्डैश्चोद्यतो ध्रुवं ॥ २४ ॥ शेषे स्तिफननामानमाश्रमे

परिचारिणां । नवे पालकसाहाय्यार्थे ऽर्पिते ह्युपवेशितं ॥२५॥ अप्रत्ययेनृयहूदीया गृहीत्वा

श्मासनेन तं । जघ्नुरात्मीयहद्वर्थे प्रार्थयन्तं मृतावपि ॥२६॥ आद्यस्तेजस्विवृन्दे स वर्य्या

णां खृष्टसाक्षिणां । तदर्थे न्यस्तजीवानामगण्ये मण्डलीप्रिये ॥२७॥ तद्वधात्तु समारब्धे २०३

ताडने खृष्टसेविनां । विस्तृता बहवस्तेषां पुरा यैरूषलेमकाः ॥२८॥ मुक्तिवार्त्तां यहूद्ये

च सामार्य्ये देश एव च । सुर्य्ये फैनीक्यके चापि प्रोचुस्तत्रैत्त्रयेलकान् ॥२९॥ प्रस्तरस्त्वैश्व

रस्वप्नवाण्यादिष्टः परान्वयान् । रौम्यकान् जलसंस्कृत्यावेशयत्खृष्टमण्डलीं ॥३०॥ सौलो

नाम तदा चापि फरीष्यः पण्डितो निजे । शास्त्रे यावन्यके चापि खृष्टीयारिरविन्तितः ॥

३१॥ तत्ताडनान्तरेऽप्यूर्द्ध्वादाहूतः प्रभुणा मतिं । विकार्य्य जलसंस्कृत्या पूर्वाङ्गोमुक्तिमाप्त
वान् ॥३२॥ इतः पौलाभिधः खृष्टप्रतीत्याः शिक्षकः स्थिरः । प्रेरिताश्रमनीतश्चान्यान्वयेभ्यो
विशेषयतः ॥३३॥ सहितो बार्णबेनापि लैव्येन प्राक् प्रभोर्मतं । प्राप्तेन प्रेरितेष्वेवं
नीतेनाथापि चेतरैः ॥३४॥ फलेस्तीन्यावधि स्पष्टं सुर्य्यास्ययवनादिषु । देशेष्विस्पान्य
पर्य्यन्तं प्रत्यग्द्वीपेषु च क्रमात् ॥३५॥ पुराताडितयेषूक्तिं व्यस्तृणोत्प्रेमचण्डहृत् । नाना २०४
पीडनमाप्त्वापि यहूदिभ्योऽन्यतोऽपि च ॥३६॥ यहूद्यैस्ताडनं ह्यादौ कृतमप्रत्ययैर्हतः ।
प्रथमः प्रेरितानां यैर्याकोबो जिबिदीयजः ॥३७॥ कृतमन्योद्भवैः पश्चात्स्वदेवार्च्चनवर्जनात् ॥
खृष्टशिक्षोत्थितात्क्रुद्धैः सभ्रष्टोत्सवहेलनात् ॥३८॥ अतो यद्यपि पौलातवार्त्तया विस्मिता
त्मकः । तिबर्य्याऽर्पयितुं रौम्यदेवेषु प्रभुमैहत ॥३९॥ संकल्पोऽयं न संसिद्धः खृष्टशिक्षा

विलग्नतां । देवार्च्चनस्य सर्व्वेषु पश्यत्सु मतविस्तृतौ ॥४०॥ तत्परे चापि षष्ठेन नेरूणा
नाम केशरां । नानार्त्तियुतदुर्म्मृत्या खृष्टोया दण्डिता भृशं ॥४१॥ रोमायां शूलविद्धो ऽपि
प्रस्तरो द्वादशायियः । तदा खड्गहतश्चेह पौलो ऽन्यो राष्ट्रशिक्षकः ॥४२॥ प्रेरितानां गणे
चान्ये तथेतरनृपाज्ञया । मुदा घोरमृतिं जग्मुर्भक्तिनामार्थमेव हि ॥४३॥ देशे बार्थुलु
मायस्तु भारतीये यथोदितं । खृष्टनाम प्रचार्य्याथ पारसीकैर्हतो ऽरिभिः ॥४४॥ केरल २०५
द्राविडाद्येषु थोमास्तु प्रभुमण्डलीं । संस्थाप्यैतः सदा तत्र संस्थां ब्राह्मणमारितः ॥ ४५ ॥
तथैवैकं विना सर्व्वे मम्रुर्द्वादश ते मुदा । बहवो ऽन्ये नरा नार्य्यः खृष्टार्थे शिशवो ऽपि च ॥
४६॥ मण्डली वर्द्धिताप्येतरस्थातसाक्षिगणासृजा । न्यविशच्चार्य्यवाक् तेषां समस्तं क्षिति
मण्डलं ॥ ४७ ॥ अप्रत्येतृयहूद्याश्च मिथ्याखृष्टाशया यदा । मोहिता रौम्यसाम्रज्यं प्रति

रोद्धुं प्रचक्रमुः ॥४८॥ तीतेन कैशरातश्च ससेनेन प्रवेष्टिताः । दृष्टा यैरूषलेमीया द्विषो
भूता मिथोऽपि च ॥४९॥ यावतो न जगत्सृष्टेः पीडाभूद्भुवि तावती । यदा प्रापुः क्षुधा
शक्त्या कृता बालपचाः क्वचित् ॥५०॥ यदा शेषे च पुण्यं प्राक् पुरं सविभुमन्दिरं ।
दान्येलखृष्टयोर्वाक्यानुसारादपरिष्कृतं ॥५१॥ ततोऽग्निवधसंव्याप्तं नोपलेऽप्युपलोपरि ।
मुन्दरस्यौकसस्त्यक्ते विभुक्रोधोग्रदर्शनं ॥५२॥ तदा खृष्टविशिष्टोघस्तद्वचःश्रद्धयाद्रिषु । विद्र २०६
वन् केवलः सैन्यादप्राप्तैतद्व्यथोऽभवत् ॥५३॥ अहरोणपदस्थश्चाग्ग्ययज्वा याजकैः सह । परि
चारकलेव्यैश्च यदा छिन्नयहूदिनां ॥५४॥ ईशसंविद्विहीनोऽभूतद्घोरसमयावधि । असाध्ये
ऽप्यखिलैर्भूते पर्वेष्ट्यादिविधौ विभोः ॥५५॥ तदा नवविधिं प्राप्ता सर्वदेशीयमण्डली ।
तन्निराकृतखृष्टस्य धीसत्वार्चास्ववर्द्धत ॥५६॥ धर्म्मोश्रमत्रयेणैव प्रेरितैः स्थापितेन हि ।

ईशजाङ्गसदेकत्वे संन्नद्धा रक्षितापि च ॥५७॥ शिष्य उवाच ॥ अस्मिन् पूर्तिर्मया दृष्टा प्रभोः
प्राङ्मृत्युतस्त्रये । उदितस्या गिरो हन्तृंस्तान् प्रत्युद्यानकर्षकान् ॥५८॥ श्रेष्ठयज्वादिकानां
हि स्वामिपुत्रघ्नकर्षिणां । हन्तव्यानां कराद्धोतो ऽपहार्य्यं राज्यमैश्वरं ॥५९॥ निधेयं च
ततो ऽन्येषु तद्योग्यफलदायिषु । कर्षकेषु किलार्य्यीया मण्डल्या रक्षिषु प्रभोः ॥६०॥ त्व
दुक्त्या श्रमं त्वेनं ज्ञातुमिच्छाम्यहं स्फुटं । एकस्य चाहतस्यापि प्रेरितस्य सतः कथां ॥६१॥ २०७
गुरुरुवाच ॥ प्रेरितैः शासितायां सन्मण्डल्यामितराश्रमौ । संस्थितौ ज्येष्ठसंज्ञानां ततश्च
परिचारिणां ॥६२॥ ज्येष्ठाः पुरोहितास्त्वासन्मण्डलीपालकाश्च ते । प्रेरिता इव खृष्टीय
सद्रहस्यविधायकाः । प्रभुनाम्नाघमुक्तिं च वादिनो बन्धमेव च ॥६३॥ परिचार्याश्रमस्त्वे
तद्विना सन्मण्डलीक्रियाः । करोति प्रार्थनाशिक्षादौ तज्ज्येष्ठोपकारकः ॥६४॥ तयोस्त्वा

श्रमयोर्विध्ये योग्यानां वरणं नृणां । तत्संस्कारश्च मूर्द्धोपर्य्यर्पणेनैव हस्तयोः ॥६५॥ खृष्टा
ज्ञोच्चरणेनापि तस्मै तत्समये कृतः । केवलप्रेरितानां स मण्डलीशासिनां स्थितः ॥६६॥
किंतु सर्व्वत्र मण्डल्यां विस्तृतायां क्षितौ तदा । क्रमात्प्रतिपुरं तत्रस्थितज्येष्ठगणान्तरे ॥
६७॥ एकं संस्थापयामासुर्ज्येष्ठं सत्प्रेरिता वरं । तयोः स्वाश्रमशक्त्योरप्यंशभाजं विशिष्ट
योः ॥६८॥ ते विशिष्टोपनीत्या हि प्रेरितानां पदस्थिताः । संश्चक्रुर्वै शशासुश्च ज्येष्ठान् २०८
सपरिचारकान् ॥६९॥ तथा प्रेरितकाले सा संनद्धा सर्व्वमण्डली । तथैतत्कालपर्य्यन्तं चापि
सर्व्वक्षितौ स्थिता ॥७०॥ एतच्छक्त्यन्विते धर्म्माध्यक्षे संस्थेऽप्यपूर्षु हि । सामान्यपाल
कैस्तत्र वृते सपरिचारकैः ॥७१॥ ततो यः प्रेरितेष्वेको ऽजीवद्येषूप्रियः परे । यिरूषलेम
संदाहाद्योहन्निर्जिबिदीयजः ॥७२॥ स तदा प्रभुणादिष्टोऽस्यपुराणां किलैकशः । धर्म्मा

ध्यक्षान् प्रत्यलिखत्तन्मण्डल्यधिशस्तये ॥७३॥ परे चेफिसपुर्य्यां सोऽतिवृद्धः खृष्टसेविना ।
मध्ये शान्तो ममारैवान्योन्यप्रेमादिशन् ध्रुवं ॥७४॥ तत्कालावधि हे शिष्य तस्य भव्योक्ति
पूर्त्तये । बहुधा दुष्परीक्षौघं प्राप्नोत्सन्मण्डली प्रभोः ॥७५॥ ताडिता प्राचि हि क्रूरैः
पारसीकनृपैर्भृशं । अग्न्यर्च्चिभिः प्रतीच्यां च कैशर्भिरपि रौम्यकैः ॥७६॥ शेषे खृष्टशका
ब्दशतानां तु त्रये गते । सपादे दृष्टशूलाङ्कः कोंस्तान्तीनो महान् दिवि ॥७७॥ सत्य २०९
मालिंग्य देवार्च्चां त्यक्त्वा खृष्टमतं क्षितौ । आदिशद्दरितुं मृत्योः प्राक् चाप्नोज्जलसंस्कृतिं ॥
७८॥ इतस्तत्पुत्रकोंस्तान्त्यपदस्थो यद्यपि स्वयं । यूल्यानो नाम खृष्टीयमतं तत्याज
दुर्म्मनाः ॥७९॥ देवार्च्चां च दृढीकर्त्तुं पुनरिच्छन् स मन्दिरं । भूयो यैरूषलेमीयमपि नि
र्म्मातुमैहत ॥८०॥ खृष्टवाक्यनिराकर्तृदुःसंकल्पं त्विमं विभुः । निरुरोधाग्निगोलैरुर्व्युत्थै

निर्म्मातृघातुकैः ॥८१॥ युध्यंश्च पारसीकैः स सह शल्यहतो मृतिं । प्राप्नोत्स्वप्रतिरूज्ञाय जयं
भूप्रभवे त्यजन् ॥८२॥ तत्परे शिष्य रोमायां खृष्टीयाः सकला नृपाः । आतत्साम्राज्यसं
हारं शकैरुत्तरवासिभिः ॥८३॥ ते तु रुक्ष्मात्मकास्तूतगत्थवान्दलका गणाः । प्रत्यग्राज्या
खिलश्रेष्ठध्वंसिनः शलभा इव ॥८४॥ तथापि खृष्टधर्म्मेण जिताः क्रूरत्वमत्यजन् । तदुत्पन्न
श्च राज्यौघः संप्रत्यूरोपवासिनां ॥८५॥ प्राच्यां तु षट्शताब्देऽपि पूर्णे खृष्टशकात्परे । २१०
आरब्योर्व्युत्थिते मिथ्यामताधीशे मुहम्मदे ॥८६॥ भीमास्तदनुगा युद्धैः सुर्य्यादिस्थित
खार्ष्टकान् । विनाल्पान् हतविश्वासीचक्रिरे वृश्चिका इव ॥८७॥ तत्परेऽष्टशताब्दे च त
न्मतालम्बिनोऽजयन् । तुरुष्का रौम्यसाम्राज्यप्राच्यांशमपि यावनं ॥८८॥ कोंस्तान्तीनपुरं
चास्य राजधानीं विजित्य ते । खृष्टार्च्चनमहास्थाने स्वानृतार्च्चां समार्पयन् ॥८९॥ तथा

या ताडनैः पूर्वं नानापद्भिश्च मण्डली । खृष्टीया पुण्यताशक्त्योर्वर्द्धनाय परीक्षिता ॥१०॥
पश्चाच्च ताडनान्ते या संसारीयप्रवंचनैः । परीक्षामधिकां प्रापाध्यक्षादिष्वैहिकानि हि ।
इच्छत्सु भोगकृष्टेषु विस्मृतेश्वरकर्म्मसु ॥११॥ सर्व्वदापि च पाषण्डैर्विविधैर्या परीक्षिता ।
स्थिरात्मगणविज्ञात्यै मूढगर्व्वविभित्तये ॥१२॥ ततश्चैशात्मनोता या चतुर्मृष्वखिलक्षितेः ।
संचिताध्यक्षसंसत्सु सत्प्रतीतिं व्यवर्णयत् ॥ १३ ॥ सा परे स्वाङ्गवद्द्रोहहेतुतः प्रेमसंव्य २११
यात् । भूतासु रौम्ययावन्यमण्डलीषु पृथक् पृथक् ॥१४॥ उभयोश्चान्तरे नानाभ्रष्टभावे
समुत्थिते । दण्डिताप्यभवत्स्वाङ्गापच्छेदेनाप्रतीतिभिः ॥१५॥ किंतु तद्विषयं प्रोचे सत्प्र
भुर्यं प्रतिश्रवं । पातालद्वारबलाजेया मयार्प्या त्वयि मण्डली ॥१६॥ इति स प्रस्तरायोक्तः
सद्विश्वासोक्तिवादिने । दृढः संस्थो न चाप्युर्व्यां निराकार्य्यः कदाचन ॥१७॥ लूनेष्वपि

तदंशेषु केषुचिन्न पतेद्भवः । खृष्टदेहस्तदादेशदायभाक् प्रेरितव्रजात् ॥ ९८ ॥ धर्म्मा
ध्यक्षावलीदत्तं तदादेशं परम्परा । धरन् ह्येकत्वपुण्यत्वशक्तियोनिं निरन्तरं ॥ ९९ ॥
तन्मण्डल्यङ्गभीक्षेथां सुर्य्योत्थं केरले स्थितं । अन्यत्त्वेह शकोत्थं यत्पालकौघेऽर्पितोऽस्म्यहं ॥
१००॥ शिष्य उवाच ॥ तन्मण्डल्यामहं वेष्टुं जलसंस्कारतो गुरो । इच्छामि प्रस्तरोक्तं
सद्विश्वासं प्राप्नुवन् हृदि ॥१०१॥ नित्यजीवद्विभोस्तं हि पुत्रमेकं नरीकृतं । अवतीर्णं २१२
नराघानां स्वीयमृत्यापनीतये ॥१०२॥ प्रत्ययन्नेव तद्विद्यकक्षत्त्ववद्पामहं । भागी भवितु
मिच्छामि स्वपापमलमृष्टये ॥१०३॥ गुरुरुवाच ॥ त्वत्प्रार्थितं करिष्यामि ज्येष्ठाख्योऽहं पुरो
हितः । मुदा प्राक् तन्निजाध्यक्षं प्रोच्याज्ञां प्राप्य तस्य च ॥१०४॥ जलसंस्कृतयेऽलं त्वज्ज्ञा
नेन यदितस्तु ते । हृदा रक्ष्यं भवेद्यत्नाद्ध्येयं चापि सर्व्वदा ॥१०५॥ तदेव ज्ञापयामि त्वां

ग्रन्थानां नवसंविदः । निकुरूम्बं सतां प्रत्नग्रन्थेषूक्तेषु ते पुरा ॥१०६॥ मण्डलीनिस्यनीत्यैं य
न्निःश्वासेन सदात्मनः । पृथक् रवृष्टानुगैः सद्भिर्लिखितं ह्याद्रियामहे ॥१०७॥ सर्वादौ सु
समाचारचतुष्टयमधीयते । मृत्युपर्य्यन्तसत्रवृष्टयेषूचरितसूचकं ॥१०८॥ प्राकरग्राहिणाद्यस्तु
रचितः प्रेरितेन वै । मत्थायेनैस्त्रयेल्यर्थे चिरात् तद्भाषयापि च ॥१०९॥ यावन्या त्व
धुना शेषग्रन्थानामिव तस्य हि । मूलमाप्तं प्रभूत्तीः सभव्यवाक्पूरणा वदत् ॥११०॥ तद्द्वि २१३
तीयस्तु सरवैव प्रस्तरस्य व्यरचत । मार्केण रौम्यवर्गार्थं ह्रस्वो यावन्यभाषया ॥१११॥
तृतीयश्च तथा सुष्ठुरचितो भिषजा स्वयं । लूकेन यवनार्थं वै सरवा पौलस्य धीमता ॥
११२॥ चरमोऽन्यास्मृतानां तु प्रभुवाचां सकर्म्मणां । स्मृत्यै सर्वत्र तासां च रहस्यार्थोप
दिष्टये ॥११३॥ तत्प्रेरितगणातीवप्रिययोहन्निना किल । यिरूषलेमसंदाहात्परे विर

चितः सता ॥११४॥ तच्चतुर्थसमाचारात्प्राक् तृतीयात्परे त्वपि । निजाद् ग्रन्थेन नूत्नेन लूकोक्ताः प्रेरितक्रियाः ॥११५॥ ततः पौललिपीनां तु चयः सन्मण्डलीदृतः । ईरितानां पृथङ्नानामण्डलीः प्रति दिष्टये ॥११६॥ तेदका लिखिता रोम्यान् ख्रष्टीयान् प्रति वर्ण यन् । नृणां पापं विशुद्धिं च कृतां ख्रष्टप्रसादतः ॥११७॥ द्वे लिपी तु कुरिन्थाख्यया वन्यपुरवासिनां । मण्डलीं प्रति नुन्ने तन्नानामलविमृष्टये ॥११८॥ अन्यैका लिखिता तद्ग २१४
ालात्यां प्रति मण्डलीं । ऐफिसीयां च प्रत्येकोभे स्थिते अस्यनीवृति ॥११९॥ फिलिप्पीयां प्रति त्वेका यावनीं मण्डलीं नवां । कुलुस्सीयान् प्रति त्वेका संस्थितामस्यनीवृति ॥१२०॥ द्वे तु थस्सालनीकीयां मण्डलीं प्रति यावनीं । तीमथ्यं च प्रति द्वे स्वार्पिताध्यक्ष्यं किलेफिसे ॥१२१॥ तीतं प्रति तथा क्रोतद्वीपेऽध्यक्षं किलात्मना । अर्पितं तत एका च फिलेमानं प्रती

रिता ॥१२२॥ तत एकैस्त्रयेलीयखृष्टीयान् प्रति सल्लिपिः। भूर्युक्ता किल पौलस्य बार्ण
बस्य तु कैरपि ॥१२३॥ तल्लिपिभ्यः परेऽन्या चाल्पयाकोबस्य सल्लिपिः। यिरूषलेमा
ध्यक्षस्य सामान्याख्या स्थिता सतः ॥१२४॥ तत्परे प्रस्तरस्यापि सामान्याख्यं लिपिद्वयं।
ततश्च प्रेष्ठयोहन्नेः कांश्चित् प्रति लिपित्रयं ॥१२५॥ यहूदस्याल्पयाकोबभ्रातुरेका ततो
लिपिः। सामान्याख्या परे चास्या ग्रन्थ एकोऽद्भुतः स्थितः ॥१२६॥ यं नून्नः खृष्टनामार्थं ५१५
द्मित्यानेन कैशरा। पत्मद्वीपे लिलेखार्य्यो योहन्निर्जिबिदीयजः ॥१२७॥ तस्मिन्
हि खृष्टमण्डल्याः परीक्षा आपदोऽपि च। दोषदण्डांश्च संभव्यानाजगच्छेषमेव सः ॥१२८॥
सदात्मज्ञापितो गुप्तवाक्यैरपि सदर्शनैः। प्रवक्ति सर्व्ववंशानां साधूनामुपदिष्टये ॥१२९॥
एते शिष्यार्य्यमण्डल्या ग्रन्थाः सर्व्वत्र संस्थया। सर्व्वसत्यविवेकाय सदात्मरचिता मताः ॥

१३०॥ मण्डलीपितृभिर्ग्रन्थान् ध्रियन्ते लिखितान् परान् । एतांस्तु केवलान् प्रोक्तान् मन्यन्ते ह्येशरूपकान् ॥१३१॥ अधुना शिष्य तत्पश्चाद्रचितं त्रिशतं समाः । प्रभोः शृणु महास्तोत्रं मण्डली पठितं सदा ॥१३२॥ इति श्रीख्रीष्टसंगीतायां मोक्षमाहात्म्यपर्वणि (दाविद्गीतानामष्टषष्टितमाल्लूकरचितप्रेरितक्रियाग्रन्थान्नानाप्रबन्धेभ्यश्चोद्धृतः) सदात्मशासितमण्डलीप्रबन्धो नाम विंशोऽध्यायः ॥

गुरुरुवाच ॥ त्वामीशं संनुमो वै वयमखिलपतिं त्वां वयं प्रस्तुमश्च विश्वैवं शास्वतं त्वां पितरमपि धरा पूजयत्यार्य्यभक्त्या । त्वां दूताः सर्व्व उच्चैः ससकलबलकाः स्वर्गलोकाश्च सम्यक् त्वां केरूब्यः सिराफ्योऽप्यविरतवचसा नादयन्त्यूर्द्ध्वलोके ॥१॥ पुण्य पुण्य किल पुण्य हे विभो स्वर्गलोककबलेश्वर ध्रुव । गौरवस्य तव तेजसा सदा पूरिते द्युवसुधे मही

यसा ॥२॥ त्वां प्रेरितानां गण ओजसान्वितस्त्वां भव्यवाचामतिशंस्यसंचयः । त्वां साक्षि
सेनेडयते ऽर्जुनाम्बरा त्वां मण्डली सर्व्वधरान्तरे सती ॥३॥ अमितमहिमयुक्तं त्वां किलैते
ह्यनन्तं पितरमिति समस्ता एकवाचेडयन्ते । सममपि तव पुत्रं सत्यमेकं प्रशंस्यं सममपि
च भद्रात्मानं वरादेशदं नः ॥४॥ त्वं तेजोनृप एव खृष्ट पितुरप्यार्य्यः सुतो ऽनादिकस्त्वं नॄन्
मोचयितुं समिच्छुरनवज्ञातार्य्यकन्योदरः । त्वं संजित्य तु मृत्युदंशमखिलप्रत्येतृवृन्दार्थ २१७
कं द्वारं व्याददिषे तदैव वरद स्वर्गीयराज्यस्य राट् ॥५॥ त्वमेवैनत्सर्व्वं मरणपुनरुत्थः
प्रकृतवान् विभोर्दक्षे हस्ते स्वपितृमहिमन्यासिष इतः । त्वमागन्ता तस्मात् पुनरपि
विचारार्थमिह न इति प्रत्येतारो वयमतिदृढं त्वद्भृतगणाः ॥६॥ अत आत्मभुजिष्यसंचयं
तव हि क्रीतममूल्यकासृजा । उपकुर्व्विति सर्व्वदा वयं नु दयालो ऽर्थयितार ईशज ॥७॥

तामतः स्वभृतकान्निजपुण्यव्यूह एव गणय स्वदयायाः । निजवृन्दमधिकारमवाशीर्वाद
राट् तमवरोहय नित्यं ॥८॥ त्वां संस्तुमः प्रत्यहमेव ते च सन्नाम शंसाम इहाप्यनन्तं ।
अस्मान् प्रभो सद्दयया ततोऽद्य सर्व्वाघहीनान् परिरक्ष नित्यं ॥९॥ अस्मभ्यं त्वं निजसु
करुणां देहि देहि प्रभो नोऽस्मास्वेवं ते पततु करुणास्माकमाशा त्वयीव । त्वय्येवाहं निजमपि
दृढं सर्व्वविश्वासमार्य्य न्यास्यं मा चाहमिह सततं संहताशीभवानि ॥१०॥ इति श्रीखृष्ट २१८
संगीतायां मोक्तृमाहात्म्यपर्व्वणि (इषायभव्यवाक्यानां षष्ठसर्गादम्ब्रोष्यरचितात्वामीशेत्यादि
गीतात्त्वोद्धृतः) सर्व्वशक्तिमन्मोक्तृस्तोत्रं नामैकविंशोऽध्यायः ॥

समाप्तं चेदमष्टसप्तत्यधिकसार्द्धसहस्रश्लोकात्मकं मोक्तृमाहात्म्यनामकं चतुर्थं पर्व्व ॥

तथैव श्रीपितृपुत्रसदात्मसहायादीशभक्तपुरोहितेन श्रीमन्मिल्लेन खृष्टसंगीता संपूर्णा